Before concluding this introduction, I will be failing in my duty, if I do not gratefully acknowledge my indebtedness to my Guru, the late Mahāmahopādhyāya Kuppuswāmi Śāstriar, M.A., I.E.S. Professor of Sanskrit and Comparative Philology, Presidency College, Madras, (1912-1935) who taught me intrinsically and initiated me into the comparative study of the Bhāṭṭa and Prābhākara Systems of Mīmāṁsā for a period of five years-1910-1915 A.D. The basic views, regarding both the Bhāṭṭa and Prābhākara Systems, expressed by me in this introduction, have been developed by me from the original views contained in my Guru's two learned papers. 'Prābhākara School of Karmamīmāṁsā' and 'Further light on Prābhākara Problem,' published in the *Proceedings of the Second and Third Sessions of the All-India Oriental Conference,* held at Calcutta and Madras respectively. As an humble tribute to my Guru I *dedicate* this edition to him.

Oriental Institute,
Baroda. **K. S. Ramaswami Sastri.**
Dated 5th October, 1955

INTRODUCTION TO THE FIRST EDITION

The religion of the Vaidikas, or those who believe in the authority of the Vedas and observe the Vedic rites, is quite distinct from that of the Upaniṣads, or those who believe in the doctrines and philosophy expounded in the Upaniṣads. The former is usually called Karmamīmāṁsā, while the latter is termed Brahmamīmāṁsā. The Mīmāṁsakas or commentators on the Vedas have their own theory of knowledge, ethics, and philosophy, and base it upon the Vedas. The Brahmamīmāṁsakas, on the other hand, take their stand on the Upaniṣads, and expound their theory of knowledge, ethics, and philosophy, which is not merely distinct from that of Vaidikas, but quite opposed to it. While the three important schools of the Brahmamīmāṁsakas, the dualists, the qualified monists, and the monists, centre their religious philosophy in what they call Brahman or universal soul, omniscient omnipotent, and all-pervading, and attempt to realise their Brahman rather by Rājayoga method of contemplation than through the Vedic rituals, the Karma-Mīmāṁsakas deny the existence of an omnipotent and omniscient deity, and declare that the mere performance of the rites laid down in the Vedas enables the performer to attain the promised paradise after death. Thus while the Vaidika looks upon action as chief means to acquire happiness in this as well as in the next world, the follower of the Upaniṣad proclaims true knowledge, with renunciation of all action, as the only means to realise self and eternal bliss.

Thus, the Karma-Mīmāṁsaka is a man of the world in the full sense of the word, and boldly engages himself in all those worldly activities which are regarded as moral, either according to *Vṛddhavyavahāra,* opinion of the elders in society, or according to the Vedas. For the thorough performance, in all details, of the Vedic rites which promise him a paradise, he is obliged to devote himself to the six professions, performance of sacrifice, officiating in the sacrifice of others for reward, learning, teaching, begging, and giving alms to others. On occasions of distress and unfavourable circumstances, he is at liberty to take to agriculture, trade or military life, and earn wealth thereby for the performance of the obligatory Vedic sacrifices. His temple is a room in his house and his idol is fire in the altar in the room. He has no other temple or idols of gods than the above two. It is his duty to learn while young, and to marry and beget children, always keeping the sacred fire near at hand. A cow or two he is obliged to possess to supply him with milk and butter for his daily and fortnightly sacrifices. Cattle-rearing is thus a sacred duty he has to perform.

Such, in brief, is the religion of the Vaidikas, and is in the opinion of all Indian scholars the oldest of all Hindu religions.

Jaimini is the name of the founder of this religion. According to Indian tradition he was the contemporary of Parāśara and Vyāsa-Bādarāyaṇa, who lived during the Mahābhārata war in the 10th or 11th century B. C. In the opinion of western scholars he is not earlier than the first or second century B. C. With a view to regulating and systematising the Vedic rites and expounding

the ritualistic philosophy, he is said to have composed the *Mīmāṁsā Sūtras,* treating of a thousand controversial topics in twelve Adhyāyas. These *Sūtras* set forth the doubts as to the precise order and detail in which the various rites making a particular sacrifice are performed, and discussing the alternative suggestions made in order to get rid of doubts expound the reasons in defence of the conclusions arrived at. In the course of these discussions, principles of ethics, psychology, logic, religious philosophy are all briefly enunciated and expounded. But the *Sūtras* are so enigmatic and discussion so subtle that the subjects treated of are beyond the comprehension of the ordinary reader. Hence Śabaraswāmin about the third or fourth century A. D. wrote an elaborate commentary on the *Sūtras* and supplied the longfelt want. For the purpose of making the subject still clearer and expounding the general principles of this Vedic religion there came other commentators in time. At the close of the 9th century A. D. when Śaṅkara was propounding his monistic philosophy, there flourished two celebrated teachers of Mīmāṁsā, Bhaṭṭa Kumārila, representative of the orthodox school, and Prabhākara or Guru of the liberal school. While both are equally determined in denying the existence of an omniscient deity and in maintaining the eternal existence of a self-revealed text like the Vedas, they are opposed to each other in their views on some important quasi-religious matters, such as caste, ethics and education.

While Bhaṭṭa Kumārila takes elaborate pains to prove that a Brahmin by birth is a creature forming a distinct species like a cow, horse, goat and the like, however illegitimate and obscure

his birth might have been, Guru seems to have been of the opinion that Brāhmaṇya or Brahminhood is not at all a distinct ethnic group, but merely a professional class. Again, on the question of ethics they seem to have differed from each other as widely as the poles. While Kumārila attempts to base secular ethics on the authority of the Vedas, Guru seems to have held that goodness or badness of secular acts depended upon the views of elders in society, and that as the views of society on matters secular were ever changing as contrasted with the immutability of religious acts laid down in the eternal texts of the Vedas, secular acts once considered good might be regarded as bad in a succeeding generation.

Similarly, on matters educational, Guru holds the teacher responsible for the education of the youth, and says that it is the duty of teachers to kindle a taste for education in the youth and teach him what is worthy of teaching. He goes on further to say that it is next to impossible that a boy or youth, naturally quite incapable of knowing what would do good to him or what bad, should go to seek education from a teacher and consider himself responsible for his ignorance or enlightenment. It is therefore quite clear, he says, that all grown-up men or parents in general should hold themselves responsible for the education of the rising generation. Bhaṭṭa Kumārila on the other hand relieves the teacher from this onerous duty and throws the burden on the student himself. Accordingly, while Bhaṭṭa Kumārila explains the Vedic injunction *Svādhyāyaḥ adhyetavyaḥ,* "one should study the Vedas" literally, and holds the student himself responsible for his own study, Guru takes the same sentence in the causative

sense, and says that the teacher should cause the student to learn the Vedas and the like, holding the teacher responsible for the learning of the youth.

It is probable that there are other equally important questions on which these two authorities on Vedic religion held quite diverging views. But unfortunately for us, the works of Guru on the *Mīmāṁsā Sūtras* are yet to be discovered, and it is hoped that before long manuscripts of Guru's two commentaries called *Bṛhatī,* great and small, will be recovered and published. As to Bhaṭṭa Kumārila's works on Mīmāṁsā many of them have already been printed and Oriental scholars are fully acquainted with the views of his school on matters both religious and secular. Unfortunately, liberal views held by the Guru school seem to have been so detested by the orthodox school that no care is taken in the preservation of this important literature. In the *Tantrarahasya* embodying the views of Guru School (herein presented for the first time to the public in the *Gaekwad's Oriental Series* published by the liberal Government of H. H. the enlightened Sayaji Rao, Maharaja of Baroda) a list of works belonging to the Guru School is enumerated in the few introductory verses in the beginning. They are the two commentaries on the *Mīmāṁsā Sūtras* by Guru himself called *Guru Bṛhatī* and *Laghu Bṛhatī,* and *Prakaraṇapañcikā* and other works by Śālikanātha. Bhavanātha is another author who is said to have written two commentaries on the works written by Guru.

The present work *Tantrarahasya* by Rāmānujācārya, a learned Brahmin of the Godāvarī District, seems to have been an

extensive work, inclusive of a commentary on the whole of Jaimini's *Mīmāṁsā Sūtra.* Only the first five chapters of this work, however, being an introduction to his commentary on the *Sūtras,* have been so far obtained. As in this introduction he has clearly presented in brief the views of the Guru School on the Vaidika religion, as explained above, its publication will not fail to be a valuable addition to the stock of knowledge so far gathered on the Mīmāṁsā religion of the Hindus.

This Introduction consists of five Chapters. In the first, the author explains the theory of knowledge, as propounded by Guru. In the second, Categories of knowable objects are expounded. The third deals with the authority of the Vedas and ethics. The fourth treats of the nature of a Śāstra, and, the fifth deals with the necessity of expounding a Śāstra.

The theory of knowledge expounded by the Mīmāṁsakas is quite different from that of the logicians. The latter say that perception of an object comes home when the soul comes in union with mind and the mind with sensory organs, and those organs with the object in question. Perception can be valid only when the object is perceived as it really is with reference to its intrinsic properties and functions. The perception of a conch-shell as a piece of silver is invalid in as much as it has no properties and functions of silver. The Mīmāṁsakas, on the other hand, say that every sensation occuring through the cutaneous, olfactory, auditory and other sensory nerves is valid, whether or not the object in question is perceived as it really is. At the time of perception it is valid, and its invalidity comes home only when

the object perceived or mistaken for another does not serve the purpose of the object for which it is mistaken. Differing from the Bhāṭṭa School which regards negative evidence as valid perception, the Prābhākaras reject negative evidence or *Abhāva* as an evidence.

In the list of categories of knowable things, the Bhāṭṭas include *Jāti* or Genus or Species as a separate category, and regard Brahminhood as a distinct ethnic category. Under *Jaimini Sūtra* I. 2. 2, Kumārila discusses the question at length, and arrives with sophistic reasoning at the conclusion that Brahminhood is a *Jāti* or an ethnic element or group quite distinct from other castes.

Following the views of Guru on this question, the author of the *Tantrarahasya* says in one sentence that Brāhmaṇatva is not at all a *Jāti*. This view is quite opposed not merely to that of Kumārila but also to that of Patañjali. Under Pāṇini II. 2. 6. Patañjali also discusses the question, and bases the distinction of Brahmin caste on its colour and facial characteristics. He says that "Penance, learning and birth make a Brahmin. In his physical characteristics, a Brahmin is gaura (white), of pure character and conduct, tawny-eyed (Piṅgalākṣa) and red-haired. It is not possible, he says, to mistake for a Brahmin a man who is as black as a heap of black beans and seated in his shop. Patañjali might have had some reason in the white colour of the early Brahmin to regard him as a man of distinct species and race like that of the modern European, whose racial vanity is exactly on a par with the caste vanity of the Brahmin. But Kumārila had

no such colour distinction to base his caste system upon. He had on the other hand, as referred to by himself, a number of instances of Brahmins born of doubtful parentage, and of persons passing for Brahmins by imitating Brahmin-customs. In defence of the Brahminhood of persons of illegitimate birth he says that by strictly observing the customs of true Brahmins, the man of illegitimate birth will regain Brahminhood for his descendants in the fifth or seventh generation, as stated in the *Sūtras* of Gautama and Āpastamba. The Prābhākaras accepted no such hollow reasoning and gladly rejected the view as unsound. They say that it is Śāstra and faith in the Śāstra that has brought about caste.

Coming to the theory of ethics, our author distinguishes religious from secular acts. He says that those pious acts which are done for ends neither visible nor realisable in this life, and which are known as causes of certain invisible results only through the Vedas, are religious acts. They are all *Mānāntara-ameya,* i.e., not perceivable except through the Vedas. As to worldly or secular acts, their goodness or badness is dependent upon *Vṛddhavyavahāra,* the opinion of the elders in society. It is through this opinion or social consciousness that an act is deemed good or bad. From time to time the opinion of the elders, or social consciousness as mirrored in the opinion of the elders, is changing, and therefore the opinion of ancients is no authority on the acts of present generation.

As regards the chief incentive for activity, there is a consensus of opinion among the Mīmāṁsakas, that it is pleasure, to be realised either in this or the next world. They all reject

utility as no chief incentive, and say that utility is too common a feature of all activity to be seriously thought of. It is a proverb that not even an idiot undertakes a work unless he is quite aware of the usefulness of its results. As to those self-sacrificing activities for which no kind of pleasure seems to be an incentive even there the innate self-pleasure experienced in self-denial for the sake of others is the true incentive. Hence it is that the Vedantists who condemn all activity as sinful, and consider renunciation and self-contemplation as the highest virtue, regard the innate self-pleasure in contrast with objective pleasure as the sole incentive for the withdrawal of their mind from the objective to the subjective world.

To the Mīmāṁsakas it is public opinion that decides what is pleasant and what is unpleasant in results of secular acts. Regarding religious acts, all obligatory acts laid down in the Vedas ought to be done, however unpleasant and difficult they might be.

In the last two chapters the author goes to explain what a Śāstra means and what is taught in a Śāstra. According to the author a Śāstra is a treatise which lays down certain acts, the results of which can be verified by no known means. Accordingly, a Śāstra is solely based upon authoritative revealed texts and has nothing to do with reasoning. It appeals only to faith, but not to reason.

The so-called revealed texts are handed down from generation to generation and have no beginning. They are regarded as eternal, as no author is known of them.

The interpretation of the Śāstras is however dependent upon reasoning. Without the aid of reasoning no revealed text can be correctly interpreted. There is no difference in the means availed of to interpret a Śāstra or any secular literary work based upon reasoning.

Little or nothing is known about the date of the author. In his introductory verses he says that he lived in Dharmapuri on the bank of the Godāvarī, and was a worshipper of God Nṛsiṁha, an incarnation of Viṣṇu.

Judging by the style of his work, it may be presumed that he was not older than the 18th century A.D. and later than Khaṇḍadeva and Anantadeva, who all lived at the close of the 17th century A.D.

The edition of the text is based upon three manuscripts belonging to the Government Oriental Library in Mysore. Of them one is a palm-leaf manuscript and two are paper manuscripts all written in Telugu characters. The palm-leaf manuscript is almost correct and the best of the three.

Mysore, R. Shamasastri
14th December, 1922.

श्रीरामानुजाचार्य विरचितं

।। तन्त्ररहस्यम् ।।

|| श्रीः ||

तन्त्ररहस्य विषयसूचिका ||

प्रथमः प्रमाणपरिच्छेदः १-२५ पृष्ठानि || पृ. सं.

मङ्गलाचरणम्	....	१
सूत्रभाष्यकृतोर्नमस्कारः	....	,,
भाष्यव्याख्यातुः प्रभाकरगुरोर्नतिः	....	,,
पञ्चिकाकर्तुः शालिकनाथस्य प्रशंसा	....	,,
नयविवेककृतो भवनाथस्य प्रशंसा	....	२
स्वचिकीर्षितग्रन्थे इतरवैलक्षण्यं ग्रन्थकरणप्रतिज्ञा च	....	,,
पूर्वनिबन्धृषु कृतज्ञता स्वप्रवन्धप्रयोजनं च	....	,,
प्रमाणलक्षणम्	....	,,
प्रमाणलक्षणप्रविष्टदलप्रयोजनम्	....	,,
स्मृतेः प्रामाण्यनिरासः	....	,,
याथार्थ्यस्य सर्वज्ञानसाधारण्यनिर्वाहः	....	२-६
आचार्यसम्मतप्रमाणलक्षणम्	....	६
आचार्यमते प्रामाण्याप्रामाण्ययोस्स्वतस्त्वपरतस्त्वे	....	,,
उक्तार्थे आचार्यग्रन्थानुवादः	....	,,
तद्व्याख्याविकल्पाः	....	,,
आचार्यसम्मतलक्षणदूषणम्	....	,,
तत्सम्मताप्रामाण्यपरतस्त्वस्यायुक्तत्वम्	....	,,

पुनर्त्तदभिमतार्थस्य विस्तरेण दूषणम् ६
प्रमाणविभागः १२

प्रत्यक्षनिरूपणम्

प्रत्यक्षलक्षणम् १२
नैयायिकाभिमतप्रत्यक्षलक्षणदूषणम् .... ,,
स्वमते साक्षात्त्वस्वरूपम्, तत्परीक्षा च .... ,,
प्रत्यक्षविभागः .... ,,
निर्विकल्पकस्य स्वरूपविषयकत्वम् .... ,,
सविकल्पकस्य विशिष्टविषयता .... ,,
प्रमाणफलविभागः .... ,,

अनुमाननिरूपणम्

अनुमानलक्षणम् १४
अनुमानलक्षणे दलप्रयोजनम् .... ,,
व्याप्तिग्राहकनिर्णयः .... ,,
संबन्धनियमस्यास्वाभाविकत्ववादिमतम्, तन्निरासश्च .... ,,
अनुमानविभागः १७
स्वार्थपरार्थानुमानयोर्लक्षणम् .... ,,
प्रतिज्ञादयस्त्रय एवावयवाः .... ,,
इतरावयवानावश्यकत्वम् .... ,,
अनुमानप्रमाणफलविभागः .... ,,

उपमाननिरूपणम्

उपमानलक्षणम्, प्रमाणान्तरानन्तर्भावः १८

अर्थापत्तिनिरूपणम्

अर्थापत्तिप्रमाणविषयः, तदुपपादनं च १८
अनुमानान्तर्भावनिरासः .... ,,
अर्थापत्तिप्रमाणप्रवृत्तौ रीतिभेदा वादिनां, तत्तन्निरासश्च .... ,,

अभावप्रामाण्यपरीक्षणम्

अभावप्रामाण्यवादिमतानुवादः २१
विस्तरेणाभावप्रमाणनिरासः .... ,,

द्वितीयः प्रमेयपरिच्छेदः २६-३२ पृष्ठानि.

पदार्थविभागः २६
द्रव्यविभागः .... ,,
वायोः प्रत्यक्षत्वम् .... ,,
पृथिव्या एव शरीरारम्भकत्वम् .... ,,
वृक्षादेश्शरीरनिषेधः .... ,,
आत्मनो मानसप्रत्यक्षवेद्यत्वनिरासः २७
तमसोऽतिरिक्तद्रव्यत्वनिरासः .... ,,
गुणविभागः .... ,,
कर्मणो नित्यानुमेयता .... ,,
जातेः प्रत्यक्षद्रव्यमात्रवृत्तिता .... ,,
जातिसिद्धिः २८
जातेः व्यक्त्यपेक्षया भेदाभेदनिरासः .... ,,
सत्ताख्यजातिनिरासः २९
विशेषनिरासः .... ,,
समवायस्य नित्यत्वमनित्यत्वं च ३०

शक्तिः, तस्याः कार्यानुमेयत्वं च	....	३०
संख्याया अतिरिक्तत्वम्	....	,,
सादृश्यं पदार्थान्तरम्	....	,,
प्रमेयसामान्यस्य भोक्त्रादिरूपपञ्चकोशविश्रान्तिः	....	,,
मोक्षस्य पुरुषार्थता	....	३१
तत्प्राप्त्युपायः	....	,,
अमुमुक्षुः कर्माधिकारी	....	३२
प्रमेयज्ञानसाफल्यम्	....	,,

तृतीयः शास्त्रपरिच्छेदः ३३-६३ पृष्ठानि.

शब्दप्रमाणलक्षणं, तस्यैव शास्त्रपदार्थता	....	३३
शास्त्रस्य लौकिकवचनाद्वैलक्षण्यम्	....	,,
लौकिकवचनस्यानुमानात्मकत्वम्	....	,,
शब्दार्थयोस्संबन्धः	....	,,
शब्दार्थसंबन्धस्यापौरुषेयता	....	,,
औत्पत्तिकपदार्थः	....	,,
वर्णनित्यत्वम्	....	,,
शब्दार्थसंबन्धस्यापौरुषेयत्वे विवादपरिहारः	....	३६
पदाद्वाक्याच्च तत्तदर्थप्रतीतिप्रकारः	....	,,
तत्र वैयाकरणमतम्, मतान्तराणि तत्तन्निरासश्च	....	,,
अन्त्यवर्णमात्रवाचकत्वमतनिरासः	....	,,
अभिहितान्वयवादिमतं तन्निरासश्च	....	,,
अन्वितस्वार्थे पदानां व्युत्पत्तिसमर्थनम्	....	४३
अन्विताभिधानवादे विवादपरिहारौ	....	४४

आकाङ्क्षायाः लक्षणम्, तत्परीक्षा च ४५
सन्निधेः ,, ,, ... ४६
योग्यतायाः ,, ,, ... ४७
आकाङ्क्षादित्रयस्य परस्परमपि कार्यकारणभावः ४८
अन्विताभिधानाभिहितान्वयवादयोः लाघवगौरवचर्चा,
अन्विताभिधानस्य न्याय्यत्वं च ४९
जरद्गवादिवावयदृष्टान्तेन सर्वपदानामर्थासंस्पर्शित्वशङ्कापरिहारौ.... ५५
लौकिकवाक्यानां लिङ्गविधया बोधकत्वेऽनुपपत्तिपरिहारः ५६
लौकिकवाक्यस्य स्वतः प्रामाण्यशङ्का ५७
वक्तृज्ञानानुमानेनैव तेषां प्रामाण्यव्यवस्थापनम् .... ,,
पदसंवादात्मकतया वेदस्य पौरुषेयत्वशङ्का ५८
तत्परिहारेण वेदापौरुषेयत्वनिगमनम् ५९
चित्रादिवाक्यानामप्रामाण्यशङ्कातत्परिहारौ .... ,,
शास्त्रद्वैविध्यम् ६०
प्रत्यक्षशास्त्रस्वरूपम् .... ,,
अन्यस्य नित्यानुमेयता .... ,,
स्मृत्याचारयोश्शास्त्रानुज्ञापकत्वव्यवस्थापनम् .... ,,
द्विविधस्यापि शास्त्रस्यासन्निकृष्टविषयता .... ,,
वैदिकशब्दानामपि कार्यपरत्वे व्युत्पत्तिसमर्थनम् .... ,,
सिद्धार्थपरादपि वाक्याद्व्युत्पत्तिशङ्का ६१
सिद्धार्थपराणां पदानां लोके लाक्षणिकत्वात् वेदे सिद्धब्रह्मपराणां
सत्यादिवाक्यानां कार्यपरैकवाक्यतया कार्यपरत्वनिर्वाहाच्च
सर्वत्र पदानां कार्यपरतायां विवादपरिहारः ६२

वर्णनित्यत्वादेः पूर्वोक्तार्थस्य निगमनम् ६३

अर्थवादानां विध्यन्तरानुप्रवेशेनैव प्रामाण्यम्, अर्थस्य ज्ञानस्य चाशास्त्रत्वम् .... ,,

चतुर्थः शास्त्रप्रमेयपरिच्छेदः ६४-९९ पृष्ठानि

अपूर्वस्य शास्त्रप्रमेयत्वम् ६४

तस्यैव विधिपदार्थता, कृत्स्नस्यापि शास्त्रस्य तत्परत्वम् .... ,,

अभिधाभावनामाहुरिति कारिकार्थः .... ,,

इष्टसाधनताया विधित्वमिति मतानुवादः .... ,,

अनुभवविरोधात्तद्दूषणम् ६५

इष्टसाधनताया अपर्यवसानलभ्यत्वनिरासः .... ,,

लिङादेः प्रत्ययस्यैव विधित्ववादनिरासः ६६

लिङाद्यभिहिता शब्दभावना विधिरिति मतम् .... ,,

सर्वाख्यातानां कृत्यर्थकत्वावश्यकतया तन्निरासः ६७

लिङादिज्ञानस्य तज्जनितसंस्कारस्य वा विधित्वमतम् .... ,,

लिङादीनां पुरुषप्रवर्तकत्वम् ७३

इष्टसाधनत्वमेव विधितत्त्वमिति आचार्यमतानुवादः ७४

तदभिमतशास्त्रार्थान्वयप्रकारः .... ,,

विध्यवस्थाभेदाः ७९

तत्र उत्पत्त्यात्मकप्रथमावस्थायाः स्वाभाविकत्वम्, अन्यासां तत्सिद्ध्यर्थता .... ,,

आचार्यमतनिगमनम् ८२

अपूर्वकार्यपरिग्रहेण परोक्तविधिपदार्थस्यायुक्तता .... ,,

इष्टसाधनतायाः प्रवर्तकत्वनिरासः ८२

अपूर्वकार्यत्वनिर्णयः	....	८२
अपूर्वमेव विधितत्त्वमिति स्वमतम्	....	,,
तत्र व्युत्पत्तिसमर्थनम्	....	,,
यागादेः कर्मणः तच्छक्तेर्वा स्थायित्वाश्रयणेनपूर्ववैयर्थ्यशङ्का	....	८४
तयोस्स्थायित्वोपपादनेनापूर्वस्यावश्यकत्वव्यवस्थापनम्	....	,,
अलौकिकेऽपि कार्ये व्युत्पत्तिवादिमतं, तन्निरासश्च	....	८६
इष्टसाधनताज्ञानस्य प्रवर्तकत्वनिरासः	....	८७
क्रियागता भावनागता वा इष्टसाधनता विधिप्रत्ययवाच्येति पक्षस्य निरासः	....	,,
इष्टसाधनतायाः कार्यतारूपत्वं, तस्या एव च प्रवृत्तिहेतुत्वमिति मतनिरासः	....	,,
इच्छायाः प्रवृत्तिहेतुत्वनिरासः	....	८८
प्रैषादिपरत्वमपि कार्यपरतारूपमेव नान्यत्	....	,,
प्राधान्यं फलस्वैव, तस्यैव च वाक्यार्थत्वमिति शङ्कानिरासः	....	,,
फलस्य नियोज्यविशेषणतयैवान्वयस्य विस्तरेण समर्थनम्	....	८९
विश्वजिदादौ फलकल्पनाप्रकारः	....	,,
नित्यनैमित्तिकनिषेधानामफलत्वम्	....	९०
कार्यताया निष्फलत्वादप्रवर्तकत्वशङ्का	....	९१
नित्यकर्मणामकरणे दोषाभावः	....	,,
काम्यानामफलार्थत्वम्	....	,,
कृत्स्नवेदस्य कार्यपरत्वम्	....	,,
अपूर्वकार्यस्य नियोगाद्यवस्थाः	....	,,
श्येनयागस्य हिंसात्वादनर्थत्वम्	....	९२

भाट्टमते तस्यैवाहिंसात्वाद्धर्मत्वम् ९२
अपूर्वाणां प्रयोजकत्वम् .... ,,
धात्वर्थस्य कृतिकार्यान्वयित्वम् ९३
नित्यकाम्ययोर्धात्वर्थान्वयभेदः ९५
विषयकाणीयम् ९६
गुरुमते शास्त्रार्थान्वयप्रकारः .... ,,
ग्राहकग्रहणम् ९७
सन्निपत्यारादुपकारकान्वयभेदः ९८
प्रयाजादीनां समुच्चयेनान्वयः .... ,,

पञ्चमः शास्त्रारम्भपरिच्छेदः १००-११२

सपरिकरविध्याख्यधर्मतत्त्वस्य मीमांसापेक्षत्वम्
मीमांसाशब्दार्थश्च १००
मीमांसाया अनारम्भणीयत्वपूर्वपक्षारम्भः .... ,,
स्वाध्यायोऽध्येतव्य इत्यत्रत्यतव्यप्रत्ययप्रतीयमान-
भावनाभाव्यविचारः .... ,,
अनारभ्याधीतत्वादिनाऽध्ययनविधेर्नियामकत्वासंभवोपपादनम्.... १०१
''यदृचोऽधीते'' इत्याद्यार्थवादिकदेवताप्रसादादिफलार्थतया
मीमांसाया अनारम्भणीयत्वमिति पूर्वपक्षनिगमनम् .... ,,
विश्वजिन्न्यायेन स्वर्गार्थत्वादध्ययनस्यानुवचनमात्रेण शास्त्रार्थसमाप्ते-
रध्ययनानन्तरं धर्मजिज्ञासानियमाभावान्मीमांसा नारम्भ-
णीयेति प्रकारान्तरेण पूर्वपक्षः १०२
सिद्धान्तनिरूपणारम्भः १०३
तव्यप्रत्ययवाच्यभावनायां स्वाध्यायस्यैव
भाव्यत्वेनान्वयोपपादनम् .... ,,

अध्ययनविधेः क्रत्वनुप्रवेशकल्पनया नियामकत्वोपपादनम् १०३

उपनयनकालविशेषव्रतविशेषाणामध्ययनाङ्गत्वम् १०५

स्नानस्य मीमांसाश्रवणोत्तरकालिकत्वम् .... ,,

तत्प्रमाणभूतधर्मजिज्ञासासूत्रार्थः .... ,,

तत्रत्यजिज्ञासात्रैविध्यम् .... ,,

अध्ययनविधेरपूर्वविधित्वपरमतान्तरानुवादः .... ,,

अध्ययनस्यार्थज्ञानार्थत्वम् १०६

अर्थज्ञानार्थत्वेऽपि विधिवैयर्थ्यपरिहारः .... ,,

अध्ययनविधेरार्थिकनियमपरत्वोपवर्णनम् .... ,,

अत्रैवर्णिकानामध्ययनाधिकारनिरासः .... ,,

अध्ययनस्यार्थज्ञानार्थत्वेऽनर्थकेष्वव्याप्त्याशङ्का १०७

क्षत्रियवैश्ययोर्वैश्यस्तोमाश्वमेधाध्ययनानर्थक्यशङ्का .... ,,

जप-यज्ञपारायणादिफलकत्वस्याप्युपपादनेन तत्परिहारः .... ,,

नानाप्रयोजनत्वेऽप्यध्ययनविधेर्वैरूप्यपरिहारः .... ,,

अध्ययनस्य स्वाध्यायसंस्कारत्वम् .... ,,

स्वाध्यायस्याध्ययनसंस्कार्यत्वनिरासेन स्वमतोपक्रमः १०८

अर्थज्ञानकामनावतोऽध्ययनाधिकारित्वनिरासः .... ,,

अध्ययनस्याध्यापनविधिप्रयोजननिर्वृत्तेरेव प्रयोजनत्वात् अर्थज्ञानफलकत्वाभावान्मीमांसा नारम्भणीयेति स्वमतेन पूर्वपक्षः .... ,,

आचार्यककामनावतोऽधिकारसमर्थनम् .... ,,

उपनीयेत्यादिवचनस्याध्यापनविध्यनुवादपरत्वशङ्कापरिहारौ १०९

अध्यापनविधेराचार्यकमात्रफलकतया नार्थज्ञानार्थत्वमिति मीमांसानारम्भणीयत्वशङ्का ११०

सिद्धान्तनिरूपणारम्भः १११

अध्ययनविधेराचार्यकफलकत्वाकल्पनेऽप्युपपत्तेः कर्तृगामित्वेनान्तरङ्गत्वादर्थज्ञानस्यैव तत्फलत्वनिरूपणम् .... ,,

अध्ययनविधेरध्यापनविध्यधिकारप्रयोजनत्वनिरसनम् .... ,,

इत्थं चार्थज्ञानार्थत्वादध्ययनस्याध्ययनविधेः केवलाध्ययनमात्रेणाकृतार्थत्वात् विचारफलकं मीमांसाशास्त्रमारम्भणीयमेवेति सिद्धान्तनिगमनम् ११२

'अथात' इति सूत्रस्य गुरुकुलादनिवृत्तिपरत्वम् .... ,,

एतद्ग्रन्थकरणोद्देशः .... ,,

एतच्छास्त्रप्रतिपाद्यविधितत्त्वस्य विष्णुसादृश्येन प्रशंसनम् .... ,,

उदाहृतवाक्यानामाकरनिर्देशः ११३

मूलप्रतिकृतितः समुपलब्धपाठभेदाः ११७

—०—

श्रीः

।। श्रीरामानुजाचार्यविरचितं तन्त्ररहस्यम् ।।

।। प्रमाणपरिच्छेदः ।।

पश्यन् गोदावरीमग्रे प्राङ्मुखः पद्मकासनः ।
नरसिंहवपुर्विष्णुरव्याद्धर्मपुरे वसन् ।। १ ।।

गोदावरीरोधसि संनिविष्टा गरीयसी धर्मपुरी चकास्ति ।
तत्रावतीर्णस्य नृसिंहमूर्त्तेर्विष्णोः पदं चेतसि संस्मरामि ।। २ ।।

नमामि जैमिनिमुनिं येन षोडशलक्षणी ।
मीमांसा निर्मिता सूत्रैः श्रुतितात्पर्यसिद्धये ।। ३ ।।

स जीयाच्छबरस्वामी नानाशाखासु विश्रुतः ।
सूत्रार्थं विशदीकर्तुं येन भाष्यमभाष्यत ।। ४ ।।

आलोच्य शब्दबलमर्थबलं श्रुतीनां
टीकाद्वयं व्यरचयद्बृहतीं च लघ्वीम् ।
भाष्यं गभीरमधिकृत्य मिताक्षरं यः
सोऽयं प्रभाकरगुरुर्जयति त्रिलोक्याम् ।। ५ ।।

बृहतीं तथैव लघ्वीं टीकामधिकृत्य शालिकानाथः ।
ऋजुविमलां दीपशिखां विशदार्थामकृत पञ्चिकां क्रमशः ।। ६ ।।

तथाऽन्यां शालिकानाथो नानाप्रकरणात्मिकाम् ।
मानमेयविवेकार्थं चक्रे यत्नेन पञ्चिकाम् ।। ७ ।।

टीकाद्वयं पञ्चिकाश्च भवनाथस्तु संक्षिपन् ।
चक्रे नयविवेकाख्यं प्रबन्धं सर्वसंमतम् ।। ८ ।।

भिन्नं क्वचित्कुत्रचिदप्यभिन्नं विरुद्धमेकत्र तथाऽविरुद्धम् ।
तन्त्रद्वयं चापि गुरूक्तरीत्या वितन्यते तन्त्ररहस्यशिक्षा ।। ९ ।।

पूर्वपूर्वकृतिषु प्रपञ्चितं मानमेयमितितत्त्वनिर्णयम् ।
संक्षिपामि गुरुतन्त्रनीतिभिः प्रीतयेऽत्र विदुषां मिताक्षरम् ।। १० ।।

अनुभूतिः प्रमाणम् । परीक्षकाणां तत्रैव प्रमाणव्यवहारात् । स्मृतिव्यतिरिक्ता च संवित् अनुभूतिः । स्मृतिश्च संस्कारमात्रजं ज्ञानम् । तत्रैव स्मृतिव्यवहारात् । तत्र संस्कारग्रहणेन प्रत्यक्षादिज्ञानव्युदासः । तेषामिन्द्रियादिमात्रजत्वात् । मात्रग्रहणेन प्रत्यभिज्ञायाः व्युदासः । तस्यास्संस्कारसचिवेन्द्रियजत्वात् । स्मृत्यनुभवयोर्विवेकः प्रपञ्चयिष्यते ।

ननु स्मृतिरपि त्वन्मते यथार्था । सा किमिति न प्रमाणम् । सत्यम् । न हि याथार्थ्यं प्रामाण्यनिमित्तम् । तस्य सर्वसंवित्साधारणत्वात् । किं त्वनुभूतित्वमेव । स्मृतिस्तु सत्यपि तस्मिन् केवलसंस्कारजन्यत्वेनानुभूतिविलक्षणा पूर्वानुभूतमेवार्थं तदित्यवरुन्धाना च सती न स्वातन्त्र्येणार्थं परिच्छिनत्तीति न प्रमाणम् । तदंशे विकलस्मृतिप्रमोषोऽपि प्रतीतिपारतन्त्र्याभावेऽपि संस्कारजत्वेन न प्रमाणमेव । अत एवोभयविधपारतन्त्र्याभावाद्गृहीतग्राहित्वेऽपि धारावाहिकवित्तयः प्रमाणमेव ।

कथं याथार्थ्यं साधारणम् । सर्वस्यापि ज्ञानस्यार्थाव्यभिचारित्वेन तन्नियमात् । ननु कथमव्यभिचारः । इदं रजतं पीतश्शङ्ख इत्यादेर्विपर्ययस्य स्थाणुर्वा पुरुषो वा इत्यादेस्संशयस्य स्वप्नस्य वाऽतथात्वात् । रजतप्रतिपत्तिश्च

पुरोगतां शुक्तिमेव रजतत्वेनाध्यवस्यति । रजतमात्रगोचरत्वे च 'इदं रजतम्' इति सामानाधिकरण्यं न स्यात् । रजतार्थिनः पुरोवर्तिनि शुक्तिशकले प्रवृत्तिर्न स्यात् । अवगतिप्रवृत्त्योरेकविषयत्वनियमात् । एव 'पीतश्शंखः' इत्यादिवित्तयोऽपि अन्यथाख्यातिरूपाः ।

किं च साधारणे याथार्थ्ये भ्रमाभ्रमविभागः कुतः । तस्य याथार्थ्यायाथार्थ्य-निबन्धनत्वात् । 'नेदम्' इति बाधश्च कुतः । तस्य पूर्वप्रतिपन्नविषयाप-हारलक्षणत्वात् । याथार्थ्ये च तदयोगात् ।

उच्यते । यस्यां संविदि योऽर्थोऽवभासते स तस्या विषयः । नान्यः । तस्य तत्रानवभासात् । अनवभासमानस्य विषयत्वेऽतिप्रसङ्गात् । तेनान्यस्य अन्यथाभानं प्रतीतिविरुद्धमेव । ततोऽत्र न रजतप्रतीतिः शुक्तिगोचरा । तत्र तस्य अनवभासात् । किं तु रजतगोचरैव ।

ननु तर्हि पुरोवर्तिनि 'इदं रजतम्' इति विशिष्टनिर्वाहः कथम् । इत्थम् । प्रथममिन्द्रियार्थसन्निकर्षे सति शुक्तिकामात्रमगृहीतविशेषधर्मकं इदमिति सामान्येन गृह्यते । तदनु दोषवशात् तदंशविकलं तत्सदृशं रजतमात्रं स्मर्यते । लोके च सदृशदर्शनात्सदृशस्मृतिर्दृष्टैव । तच्च स्मरणं तदंशप्रमोषादनुभवसमानाकारम् । एतावत्तावदावयोरविवादम् । तत्र गृह्यमाणस्मर्यमाणयोर्ग्रहणस्मरणयोर्वाभेदा-ग्रहात्केवलं सामान्याकारोपलम्भाद्विशिष्टव्यवहारः । न तु विशिष्टधीतः । तत एव प्रवृत्तिरपि युक्ता । उत्तरकालं च भेदग्रहणे व्यवहारविसंवादाद्बाधोऽप्युपपन्नः । स च न पूर्वज्ञानविषयापहारः । तयोर्यथार्थत्वात् । किं तु व्यवहारविसंवाद एव । न हि ज्ञानं बाध्यम् । तस्य यथार्थत्वात् । किं तु व्यवहारः । दशमाध्यायविचारगोचरो बाधोऽपि व्यवहारस्यैव । न तु ज्ञानस्य । तत्र हि कृष्णलेष्ववघातस्य चरुषु पेषणस्य चानुष्ठानमात्रं बाध्यते । न त्वङ्गत्वप्रतीतिः ।

तस्याः प्रमाणसिद्धत्वात् । तत एव सम्यङ्मिथ्याविभागोऽपि । यत्र व्यवहारविसंवादः तत्र पूर्वज्ञानस्य भ्रान्तत्वम् । यत्र तु न तत्र सम्यक्त्वम् ।

ननु उष्णं जलं, शीतश्शीतमयूखरश्मिः सुवर्णं गुरुतरमित्यादौ व्यवहाराविसंवादात्सम्यक्त्वं स्यात् । न स्यात् । तत्रापि भेदाग्रहनिबन्धनत्वात्प्रतीतेः विद्यमानमपि भ्रान्तत्वं न व्यवह्रियते ।

ननु भवेन्नामेदमंशोऽनुभवः । रजतांशस्तु कथं स्मृतिः । तत्तांशप्रमोषात् । न हि तत्र तदिति प्रतीतिरुदेति । ततोऽनुभवत्वमेवोचितम् । सत्यम् । न तावच्चाक्षुषोऽनुभवः । तदसंप्रयोगात् । नाप्यनुमितिः । लिङ्गाभावात् । परिशेषात्स्मृतिरेव । तदंशप्रमोषस्तु दोषवशात् । अत एव पामराणां तत्रानुभवव्यवहारः । परिक्षकाणां त्वन्यथा । गृहीतगोचरस्य तत्तारहितस्यापि केवलसंस्कारगोचरत्वाद्धारावाहिकवैलक्षण्यमपि ।

ननु दोषाच्चाक्षुषोऽपि विशिष्टानुभव एव किं न स्यात् । न स्यात् । दोषाणां सहजकार्यशक्तिप्रतिबन्धकत्वमेव । न तु विलक्षणकार्यजनकत्वम् । न हि दोषसहस्रसंकुलादपि शालिबीजाद्यवाङ्कुरोदयः । किं चान्यथाख्यातिवादिनाऽपि भवता प्रथमं ग्रहणस्मरणे अङ्गीकृत्यैव ताभ्यां विपर्ययो जायत इत्यभ्युपगतम् । अत एवात्र स्मर्यमाणारोप इति भवतो व्यवहारः । अस्माकं तु ताभ्यामेवागृहीतभेदाभ्यां भ्रान्तिव्यपदेशोपपत्तेः प्रवृत्तिसंभवाच्च न तृतीयज्ञानाङ्गीकारः । लाघवात् । याथार्थ्यनियसभङ्गश्चात्राधिको दोषः ।

ननु यद्गोचरं ज्ञानं प्रवृत्तिः । रजतज्ञानं च न शुक्तिगोचरम् । अतः कथं तत्र प्रवृत्तिरिति चेत् सत्यम् । सम्यग्रजतस्थले तथैव । अत्र तु सा केवलभेदाग्रहनिबन्धना । भेदाग्रहश्चात्र भवताऽप्यङ्गीकार्यः । अन्यथा भ्रान्त्यनुदयात् । न हि विशेषग्रहे तदुदयः । तन्निवर्तकत्वात्तस्य । अत एव

'शुक्तिशकलं रजतज्ञानगोचरं रजतार्थिप्रवृत्तिविषयत्वात् सम्यग्रजतवत्' इति त्वदीयमनुमानं प्रत्युक्तम् । अविसंवादात्तत्र तथा । अत्र तु नैवम् । विसंवादात् । किं च घटशब्दः पटवाचकः चक्षुर्गन्धग्राहकमितिवत् प्रतिज्ञापदयोर्व्याघातश्च ।

किं च ज्ञानस्यार्थव्यभिचारे प्रतीयमानस्तावदाकारो ज्ञानमात्रपर्यवसितः स्यात् । ततश्च सर्वं ज्ञानं साकारमापतेदिति बाह्यसमयसाङ्कर्यम् ।

तथा पीतशङ्खबोधोऽपि यथार्थ एव । तथाहि–नेत्रवर्तिनि स्वच्छे पित्तद्रव्ये तद्रश्मिभिस्सहनिर्गते तद्गतपीतिमाऽत्र गृह्यते । तथा दोषवच्छङ्खमात्रं च । द्रव्यगुणयोस्सहप्रतीतिनियमश्च नास्ति । परस्परसाकाङ्क्षयोस्तयोर्विद्यमानोऽप्यसंबंधो न बुध्यते । ततश्च तत्रासंबन्धाग्रहाद्विशिष्टव्यवहारः । प्रवृत्तिरपि तत एव । द्विचन्द्रज्ञानेऽप्यङ्गुल्यवष्टम्भादिदोषाद्विधाः प्रविभक्तो नायनरश्मिरेकस्मिंश्चन्द्रमसि द्विवित्तिं जनयति । तत्र द्वित्वस्य चन्द्रमसश्चासंबन्धाग्रहात् द्वौ चन्द्रावित्येवं व्यवहारः । तथा सर्वतोदिशमाशुतरसंचारिण्यलातदण्डेऽपि निरन्तरधियो जायन्ते । तत्रान्तरालाग्रहणाच्चक्रबुद्धिव्यवहारः । अलाते च चक्रव्यवहारः । तथा दर्पणे नयनरश्मिर्निपतितः प्रथमं सविशेषं दर्पणं गृह्णाति । पश्चात्तु प्रतिहतः परावृत्तो मुखमात्रम् । तत्र दर्पणस्य मुखस्य च भेदाग्रहात् दर्पणे मुखव्यवहारः । तद्गतानां सव्यदक्षिणमहत्त्वाल्पत्वादिधर्माणां मुखस्य च भेदाग्रहात् मुखे तद्देशादिव्यवहारश्च ।

स्वप्नस्तु स्मृतिरेव । न ह्यननुभूते स समुदेति । दोषाच्च तत्ताप्रमोषः-ग्रहणाकारश्च । अदृष्टवशादर्थानामनुभूतत्वं च नाध्यवसीयते । अवस्थाविशेषोऽदृष्टं च संस्कारोद्बोधकम् । अत एव जाग्रतस्तादृगेव धीः ।

तथा संशयोऽपि नैकं विज्ञानम् । किन्तु द्वे एते स्थाणुत्वपुरुषत्वगोचरे प्रमृष्टतत्तांशे परस्परविनिर्मुक्ते पुरःस्थितोर्ध्ववस्तुदर्शनाज्जायमाने स्मृतिरूपे ।

एतत्सर्वं यथार्थमेव । परस्परविनिर्मुक्तयोस्तयोर्विषययोः पुरःस्थिते धर्मिणि एकस्यापि व्यवस्था नास्तीति व्यवस्थितव्यवहारं प्रवर्तयिता प्रवर्तयितुमशक्नुवन् संशेत इति भवति तत्र संशयव्यवहारः ।

किं च कस्यचिज्ज्ञानस्यार्थव्यभिचारे सर्वस्यापि तथात्वशङ्कायां जगति विश्वासो न स्यात् । ननु त्वन्मतेऽपि कुत्रचिज्ज्ञाने भेदाग्रहनिबन्धनप्रवृत्तौ व्यवहारविसंवादे सर्वत्र तथात्वशङ्कायामविश्वासस्तदवस्थ एवेति चेत् न । वैषम्यात् । याथार्थ्ये हि साधारणे 'यज्ज्ञानं तत्सत्यम्' इति सर्वत्र स्वारसिको विश्वासः । प्रवृत्तिश्च स्वारसिकी । क्वचिदविश्वासे सोऽप्यल्पायासेन निवर्तते । प्रवृत्त्युत्तरकालं व्यवहाराविसंवादे पूर्वज्ञानस्य विशिष्टार्थगोचरत्वनिश्चयात् । विसंवादे तु केवलं परस्परविनिर्मुक्तागृहीतभेदतत्तद्वस्तुगोचरत्वनिश्चयात् ।

अतस्सर्वं ज्ञानं यथार्थम् । याथार्थ्येऽपि स्मृतिरप्रमाणम् । अनुभूतिः प्रमाणमिति सिद्धम् ।।

आचार्यैस्तु–'दृढमविसंवाद्यगृहीतग्राहि विज्ञानं प्रमाणम्' इति प्रमाणसामान्यलक्षणं निबद्धम् । तच्च प्रामाण्यं स्वतः अप्रामाण्यं परत इत्यपि निबद्धम् । तदुक्तम्–

तस्माद्दृढं यदुत्पन्नं न विसंवादमृच्छति ।
ज्ञानान्तरेण विज्ञानं तत्प्रमाणं प्रतीयताम् ।। इति ।।

(श्लो.वा. चोदनासू-८०)

तच्छिष्यैश्च तत्स्वतस्त्वं बहुधा प्रपञ्चितम् । तथाहि-तत्र केचिदित्थं व्याचख्युः-स्वशब्दोऽयमात्मीयवचनः । प्रामाण्यं चार्थतथात्वम् । जायत इति च योग्यतयाऽध्याह्रियते । ततश्चायमर्थः-स्वीयादेव कारणादर्थतथात्वलक्षणं

प्रामाण्यं जायते । न गुणात् । तस्य दोषप्रतिबन्धमात्र एवोपक्षीणत्वात् । गुणाधीने तु प्रामाण्ये वेदस्यापौरुषेयतया वक्तृगुणाभावेन प्रामाण्यं न स्यात् । एतद्विलक्षणमप्रामाण्यं न स्वीयात्कारणादिदमंशस्य स्वतस्त्वम् । दोषात्तु रजतांशस्य मिथ्यात्वमिति । एतन्मतमाचार्यग्रन्थानुगुणं न भवतीति तदीयैरेवोपेक्षितम् ।

अन्ये तु-स्वशब्दोऽयमात्मवचनः । प्रामाण्यं चानधिगततथाभूतार्थनिश्चयः । ततश्च स्वतो ज्ञानस्वरूपात्तादृशं प्रामाण्यं जायते । न तु गुणज्ञानादर्थ-क्रियाज्ञानाद्वा । अप्रामाण्यं तु परतो दोषज्ञानादर्थान्यथात्वज्ञानाद्वेति ।

अयमपि पक्षस्तदीयैरेव प्रतिक्षिप्तः । तत्र तावदप्रामाण्यस्य परतो जन्म यु (अयु) क्तम् । न हि रजतज्ञानस्याप्रामाण्यं दोषज्ञानादिजन्यम् । उत्पत्तावेवाप्रमाणत्वात् । अतथाभूतार्थनिश्चयोऽप्रामाण्यम् । तच्चाप्रमाणज्ञाने स्वत एव भवति । न बाधकज्ञानादिकमपेक्षते । न ह्युत्पत्तौ प्रमाणं सत्पश्चाद्बाधकेनाप्रमाणीक्रियते । अपि तूत्पत्तावेव ज्ञा(भू) तमप्रामाण्यं पश्चाद्बाधकेन ज्ञाप्यते । किं च प्रामाण्यस्यापि स्वतो जन्म अयुक्तम् । स्वत इति ज्ञानस्वरूपमात्रं चेद्विवक्षितं तदा मिथ्याज्ञानस्यापि स्वतः प्रामाण्यं स्यात् । तत्रापि ज्ञानस्वरूपस्याविशेषात् । अथ सम्यग्ज्ञानं विवक्षितं तदा प्रमाणज्ञानात्प्रामाण्योत्पत्तिरुक्ता स्यात् । तदा स्वस्मात्स्वस्योत्पत्तिस्स्यात् । सम्यग्ज्ञानस्वरूपाव्यतिरेकात्प्रामाण्यस्य ।

अपरे तु–स्वशब्दो ज्ञानपरः । योग्यतया च भातीत्यध्याह्रियते । ज्ञानात्तद्गतं प्रामाण्यं ज्ञाप्यते । अप्रामाण्यं तु परतो गम्यत इति । तदपि तदीयैरेव निरस्तम् । न हि ज्ञानमात्मानमात्मीयं वा प्रामाण्यं गृह्णाति । तस्यार्थग्रहणमात्रोपक्षीणत्वात् । न ह्युत्पन्नं ज्ञानमहं प्रमाणं मदीयं वा प्रामाण्यमिति प्रतिभाति । ज्ञानं तु

केवलमर्थप्रकाशान्यथानुपपत्त्या कल्प्यते । प्रामाण्यमपि तत एव । तस्मात्स्वतो भातीत्यनुपपन्नमिति ।

आचार्यमततत्त्ववेदिनस्तु–स्वशब्दोऽयमात्मवचनः । प्रामाण्यं चार्थतथात्वम् । भातीति चाध्याहारः । ज्ञानस्वरूपादेवार्थतथात्वलक्षणं प्रामाण्यं भातीति ज्ञानमात्रस्यार्थतथात्वप्रकाशकत्वं स्वारसिकमिति यावदिति ।

तदुक्तं तदीयैः–

आत्मवाची स्वशब्दोऽयं स्वतो भाति प्रमाणता ।
अर्थस्य च तथाभावः प्रामाण्यमिति गीयते ।। (इति)

(न्यायरत्नमाला, २-२)

यदर्थतथात्वं यद्वशाच्च ज्ञानं प्रमाणं तज्ज्ञानं स्वरूपादेव भाति । न तु गुणज्ञानादर्थक्रियाज्ञानात्संवादज्ञानाद्वेत्यौत्सर्गिकं प्रामाण्यम् । अर्थान्यथात्वलक्षणमप्रामाण्यं न स्वतो भाति । किन्तु कारणदोषज्ञानान्नेदमिति बाधकज्ञानाद्वेति परत इत्युपपादितमप्रामाण्यमिति ।

यथाहुराचार्याः–

तस्मात्स्वतः प्रमाणत्वं सर्वत्रौत्सर्गिकं स्थितम् ।
बाधकारणदुष्टत्वज्ञानाभ्यां तदपोद्यते ।। इति ।। (बृहट्टीका) ।

स्थितं प्राप्तं प्रतिपन्नमिति यावत् । सर्वत्रेति । न केवलं प्रमाणेषु किन्तु ज्ञानमात्र इत्यर्थः । न हि प्रमाणज्ञानान्यधिकृत्येयं चिन्ता यत औत्सर्गिकत्वं न स्यात् । किं नाम । संशयस्मृतिविलक्षणानि । तयोरप्रामाण्यस्य स्पष्टत्वात् न तौ विचारगोचरौ । यदि प्रमाणज्ञानान्यधिकृत्येयं चिन्ता स्यात् तदा तेषामेव स्वतः प्रामाण्यं साधितं स्यात् । तथा च वेदस्योभयवादिसिद्धप्रामाण्याभावेन

विचारविषयत्वान्न तत्साधितं स्यात् । तथाच तत्प्रामाण्यानुपयोगिनी चिन्ता काकदन्तपरीक्षावदकर्तव्या स्यात् । ज्ञानमात्राधिकारेण तु स्वतः प्रामाण्ये साधिते वेदस्यापि सामान्यतः प्राप्तं प्रामाण्यं कारणदोषादेरभावान्निरपवादमिति सप्रयोजना स्यादिति प्रामाण्यमौत्सर्गिकम् । अन्यदापवादिकम् ।

नन्वर्थतथात्वं प्रामाण्यं चेत्स्मृतेरपि तत्प्रसङ्गः । तयाऽपि तथात्वनिश्चयात् । मैवम् । अधिगततयाऽननुसन्धानम्, अर्थस्य च तथात्वं ज्ञानस्य च तत्र निश्चयजनकत्वमिति त्रितयमपि प्रामाण्यमभिमतं लोके । तत्रैव प्रमाणशब्दप्रवृत्तेः । अतो न स्मृतेः प्रामाण्यम् ।

तदयमत्र पूर्वोत्तरपक्षसङ्क्षेपः–घटपदाच्च घटादघटाच्च घटज्ञानोदयदर्शनात् घटसदसद्भावमात्र-साधारणेन ज्ञानमात्रेण घटो दुर्निश्चयः । अतो न तस्य स्वतः प्रामाण्यनिश्चयः । किन्त्वर्थक्रियाज्ञानात्संवादाद्गुणवत्कारणज्ञानाद्वा तन्निश्चयः । क्रियाज्ञानमव्यभिचारात्स्वत एव प्रमाणम् । संवादोऽप्यर्थतथात्वादेव घटते । तथा गुणोऽपि । तस्मात्परत एव प्रामाण्यनिश्चयः न स्वत इति पूर्वः पक्षः ।।

सिद्धान्तस्तु–न ज्ञानमव्यभिचारनिश्चयमुखेनार्थं निश्चिनोति । किन्तु स्वत एव । यदि स्वतो निश्चेतुं न शक्नुयात् तदा निश्चयस्यात्यन्तासम्भव इत्यान्ध्यमेवाशेषस्य जगतो भवेत् । न हि स्वतोऽनिश्चितोऽर्थः परतोऽपि निश्चेतुं शक्यते । परस्यापि पूर्ववदेवासामर्थ्यात् । यथा घटज्ञानमसत्यपि घटे दृष्टमित्यनिश्चायकं तथाऽर्थक्रियाज्ञानमपि स्वप्नावस्थायामसत्यामेव च तस्यां दृष्टमिति न केनापि सा निश्चेतुं शक्यते । तथा घटनिश्चयस्तु दूरत एव । तथा संवादो नाम तद्विषयं ज्ञानान्तरम् । तस्य पूर्वज्ञानात्को विशेषः येन तेनानिश्चितमनेन निश्चीयेत । तथा गुणज्ञानादपि गुणो निश्चेतुं न शक्यते । किं पुनः पूर्वज्ञानप्रामाण्यम् । तस्मात्स्वत एव प्रामाण्यं परतस्त्वप्रामाण्यं

दोषज्ञानाद्बाधकज्ञानाद्वा । वेदे तु दोषाभावात्स्वतः प्राप्तं प्रामाण्यं सुस्थमिति तत्प्रामाण्योपयोगाद्विचारश्च सप्रयोजन इति ।

तत्र सामान्यलक्षणं तावदनुपपन्नम् । संशयविपर्यययोर्याथार्थ्येन आद्यपदद्वयव्यावर्त्याभावात् । धारावाहिकप्रामाण्येनान्त्यपदाव्याप्तेः । तथा स्वातन्त्र्यमनुपपन्नम् । अनुभूतित्वमात्रप्रयुक्तत्वात्प्रामाण्यस्य । तथा परतस्त्वमनुपपन्नम् । संस्कारमात्रजन्यत्वमात्रप्रयुक्तत्वादप्रामाण्यस्य । किं च अर्थतथात्वं प्रामाण्यं चेत्स्मृतेरपि तथात्वप्रसङ्गः । अननुसन्धानं तत्प्रयोजकं चेत् स्मृतिप्रमोषप्रत्यभिज्ञयोरतिव्याप्त्यव्याप्ती । केवलसंस्कारजन्यत्वं चेत्तदेव सर्वत्र स्यात् । किं स्वतः परतो वेति विभागेन ।

यच्चोक्तं स्वारसिकं प्रामाण्यमन्यदापवादिकमिति तत्र स्वारसिकत्वं नाम किम् । ज्ञानस्वभावश्चेत्तर्हि स्मृतावतिप्रसङ्गः । अथ तद्व्यतिरिक्तज्ञानस्वभाव इति चेत् तर्ह्यावयोरविवादः । द्वितीयेऽपि पक्षे कोऽपवादः । दोषश्चेत्तस्य सहजशक्तिप्रतिबन्धकत्वमेव । न त्वप्रामाण्यनिमित्तता । अथ संस्कारमात्रजत्वं चेत् तथैवाविवादः । वेदप्रामाण्यं त्वनपेक्षत्वादेव सिद्धम् । किं स्वतः परतो वेति प्रयासेन । मानान्तरानपेक्षतयैव वेदः प्रमाणमिति प्रथमाध्याये निर्णीतम् । तत्र बाह्यहेतुसमुत्थमप्रामाण्यं सापेक्षत्वलक्षणं तर्कपादे निराकृतम् । वाक्यानां परस्परानन्वयशङ्कासमुत्थं तु त्रिपाद्याम् । ज्ञानयाथार्थ्यं तु **प्रकरणपञ्चिकायां** शालिकानाथेन **नयवीथ्यां** समर्थितम् ।

ननु त्वन्मते स्मृतेरप्यात्मस्वात्मांशयोरनुभूतित्वात्कथं तद्व्यतिरेकस्तल्ल-क्षणम् । न च वेद्यांशस्यैव संस्कारजन्यत्वेन तत्त्वमिति युक्तम् । अंशान्तरस्यापि तदविरोधात् । किंचैकस्यैव स्मृतित्वमनुभवत्वं च विरुद्धम् । अनुभवपारतंत्र्य-मप्यंशत्रयसाधारणम् । उच्यते—न हि प्रतीतिप्रकारमपह्नुत्य तत्त्वव्यवस्था युक्ता ।

इत्थं तु तत्प्रकारः—या काचिद्ग्रहणस्मरणरूपा प्रतीतिः तत्र सर्वत्र साक्षादात्माऽवभासते । न ह्यनवभासमाने तस्मिन् विषयाः प्रतिभान्ति । इत्थं हि सर्वा प्रतीतिरिदमहं जानामीति । न ह्याश्रयानुल्लेखेन काचिद्बुद्धिरुदेतुमलम् । तथात्वे स्वपरसंवेदनयोरविशेषः प्रसजेत् । प्रत्ययान्तरविषयत्वे च मेयमात्रोः न सहोपलम्भनियमः । एकप्रतीतिगोचरत्वे तु तत्संभवः । तस्मात्सर्वा प्रतीतिरात्मांशेऽनुभवाकारा साक्षात्कारवती चेत्यनुभवबलादेवाश्रयणीयम् । तथा स्वात्मांशेऽपि स्वयंप्रत्यक्षा प्रकाशते । अप्रकाशात्मकयोरपि मेयमात्रोर्यत्संबन्धात्प्रकाशः तादृश्यास्तस्याः प्रकाशे किमपरमपेक्षणीयम् । न च तस्यां विषयप्रकाशसमये प्रकाशान्तरमपि । न च सा तदानीं नावभासते । तदनवभासे च सर्वानवभासप्रसङ्गात् । न चाप्रकाशदीपे विषयाः प्रकाशन्ते । एतेन परोक्तं निरस्तम् ।

यथाऽऽहुः— अङ्गुल्यग्रं यथाऽऽत्मानं नात्मना स्प्रष्टुमर्हति ।
स्वांशेन ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति ।। इति ।।

(प्रकरणपञ्चिका)

तत्र किं कर्मकर्तृभावविरोधोऽभिमतः अथार्थप्रकाशकस्य स्वप्रकाशकत्वविरोधो वा । न प्रथमः । अनभ्युपगमात् । न हि वयं ज्ञानस्य स्वापेक्षया कर्मकर्तृभावमभ्युपगच्छामः । न द्वितीयः । प्रतीतिबललब्धत्वात् । अत एव ज्ञानस्य तदभिमतं नित्यानुमेयत्वमप्यपास्तम् । तदनुमापकं च नार्थमात्रम् । तस्य तदविनाभावनियमाभावात् । नापि तज्जन्यो विषयगतो ज्ञातताप्राकट्यापरपर्यायोऽतिशयः । तत्र प्रमाणाभावात् । ज्ञातो घट इति व्यपदेशस्तु ज्ञानसंबन्धमात्रेणाप्युपपन्नः । एतेन सुखादिवन्मानसप्रत्यक्षगम्यं ज्ञानमित्यपि निरस्तं मतम् । तस्मात्स्वयंप्रकाशा सर्वा प्रतीतिरात्मस्वांशयोर्नियमेनानुभवाकारा

साक्षात्कारवती प्रमाणं चेति प्रतीतिबलादेवाश्रयणीयम् । वेद्यांश एव स्मृतित्वमनुभूतित्वं प्रत्यक्षत्वं परोक्षत्वं प्रमाणत्वमप्रमाणत्वं च व्यवस्थितम् । तथाहि–यत्र यो वेद्यांशस्तदित्युल्लिख्यते तत्र तस्यांशस्य संस्कारजत्वं स्मृतित्वं परोक्षत्वमप्रमाणत्वं च भवति । संस्कारजत्वं तु तदंशस्यैव युक्तम् । प्रत्यभिज्ञायां तथा दर्शनात् । स्मृतिप्रमोषस्वप्नयोस्तु तदित्युल्लेखविरहेऽपि संस्कारजत्वमिन्द्रियसंप्रयोगाभावात्परिशेषसिद्धमधस्तादुक्तम् । यथाऽन्यथाख्यातिवादिनः त्वन्मते सामग्र्यैक्येऽप्येकस्मिन् रजतांशस्य दोषजत्वं मिथ्यात्वं च । इदमंशस्य तु सत्यत्वमदोषजत्वम् । तस्यापि तथात्वेंऽशान्तरस्येव बाधप्रसङ्गात् । तथाऽत्रापि कारणभेदेनांशेषु धर्मव्यवस्था स्यात् ।

तथाहि—यत्र तु वेद्यांशे इदमित्युल्लिख्यते तत्रेन्द्रियसन्निकर्षजत्वेंन प्रत्यक्षत्वम् । यत्र तु न तथोल्लेखः तत्र तु लिङ्गशब्दजन्यत्वेन परोक्षत्वमनुभूतित्वम् । यत्र तु तदित्युल्लेखः तत्र केवलसंस्कारजत्वेन स्मृतित्वमिति सर्वमुपपन्नम् । सर्वत्र कार्यानुरोधेन कारणकल्पना । न तु वैपरीत्येन । अतस्सामग्र्यैक्येऽपि कार्यवैलक्षण्येऽवान्तरकारणवैलक्षण्यमेषितव्यम् ।

तत्सिद्धमनुभूतिः प्रमाणम् । स्मृतिव्यतिरिक्ता च संविदनुभूतिः । स्मृतिश्च संस्कारमात्रजं ज्ञानमिति । लक्षणान्तराण्यपिं प्रकरणपञ्चिकायामुपन्यस्य निरस्तानि । नास्माकं तत्रात्यन्ताभियोगः वेदार्थविचारमात्रप्रवृत्तत्वात् ।

तच्च पञ्चविधं प्रत्यक्षानुमानोपमानार्थापत्तिशब्दभेदात् ।

तत्र साक्षात्प्रतीतिः प्रत्यक्षम् । साक्षात्त्वं चापरोक्ष्यं विशदावभास इति । तच्च सर्वसंवित्तीनामात्मस्वात्मांशयोः । ऐन्द्रियकज्ञानेषु त्वंशत्रयानुगतस्साक्षाद्व्यवहारहेतुः पारोक्ष्यविलक्षणः स्वानुभवसिद्धो धर्मविशेषः । इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति तु न लक्षणम् । स्मृतेरात्मस्वांशयोशयाप्तेः । स्मृतावप्यंश-

द्वयेमैन्द्रियकज्ञान इव साक्षादवभासते । अतस्साक्षाद्व्यवहारहेतुर्द्धर्म इत्येव लक्षणम् ।

ननु स धर्मः कीदृशः । न तावदापरोक्ष्यम् । तस्यैव विचारविषयत्वेन अद्याप्यसिद्धेः । नापीन्द्रियजत्वम् । पूर्वोक्तदोषानतिवृत्तेः । नापि स्मृतिलैङ्गिकज्ञानातिरेकः । तेष्वप्यात्मस्वात्मांशयोस्सक्षात्त्वात् । उच्यते–'इदमहं जानामि' इत्यंशत्रये प्रत्येकं तात्कालिकव्यवहारहेतुः धर्मविशेषः । न ह्यनुमानादिषु वेद्यांशे तात्कालिको व्यवहारो दृश्यते । तेषामतीतानागतविषयत्वस्यासंभवात् । लोकप्रसिद्धपरोक्षापरोक्षव्यवहारनियामको धर्मस्त्वयाऽप्यङ्गीकार्यः । न हि नियामकमन्तरेण नियतव्यवहारस्सम्भवति । तर्ह्यङ्गीकुर्मस्तादृशं धर्मम् । स च ज्ञानावान्तरजातिभेद एव । मैवम् । न हि गुणेषु जातिस्सम्भवति । तत्सम्भवं प्रमेयवर्गे निराकरिष्यामः । सम्भवेद्वा । तथापि तदभिव्यञ्जकं किम् । परीक्षकप्रसिद्धा जातयः स्वप्रतीतौ व्यञ्जकसापेक्षा इति हि भवतां राद्धान्तः । इन्द्रियजन्यत्वमिति चेत् । न । त्वदभिमते ईश्वरज्ञानेऽव्याप्तेः । इदमिति व्यवहारानुगुणत्वमिति चेत् न । अतीतानागतविषये तस्मिन् योगिज्ञाने चातिव्याप्तेः । अतोऽस्मदुक्तैव रीतिर्भवतां शरणम् ।

तत्र वेद्यांशगोचरं प्रत्यक्षं द्विविधम् । निर्विकल्पकसविकल्पकभेदात् । तत्राद्यं स्वरूपविषयम् । तथाहि–इन्द्रियसम्प्रयोगानन्तरं प्रथमं द्रव्यगुणजातिषु स्वरूपमात्रज्ञानं जायते । तस्य च न द्रव्यमात्रं विषयः । जातिगुणयोरप्यव-भासात् । अतो योग्यं सर्वमपीति निर्विकल्पकं स्वरूपविषयम् । इतरत्तु विशिष्टविषयम् ।

तथाहि–निर्विकल्पकदशायां वस्त्वन्तरानुसन्धानशून्यतया जातेरनुवृत्ति-र्व्यावृत्तिश्च न प्रतीयते । सविकल्पकदशायां तु तदनुसन्धाने पूर्वाकारावमर्शेन

जातेरनुवृत्तिप्रतीतिः । 'अयं घटः । अयमपि घटः । नतु पटः' इति विशिष्टप्रतीतिसम्भवः । तथा गुणप्रतीतावपि । पूर्वं द्रव्यगुणयोरन्योन्यं व्यावर्त्यव्यावर्तकभेदो न प्रतीयते । सविकल्पकदशायां तु गुणस्य गुणिना सह अन्वय इतरेभ्यो व्यतिरेकश्च पश्चादेव प्रतीयते । 'शुक्लो घटः । न कृष्ण' इति विशिष्टप्रतीतिसंभव इति सविकल्पकं विशिष्टविषयम् ।

कर्म न निर्विकल्पकगोचरम् । तस्य नित्यानुमेयत्वात् । संयोगविभाग-परम्परया हि गतिरनुमीयते । अनुमिते तस्मिन् पश्चाद्विशिष्टप्रतीतिसम्भवः । देवदत्तो गच्छतीति नामकल्पनायामपि वाच्यदर्शनात् स्मर्यमाणशब्दो विशेषणम् । न हि प्रत्यक्षोपात्तमेव विशेषणमिति नियमः । प्रमाणान्तरोपात्तस्यापि तत्सम्भवात् । अतो नामकर्मणी स्वयमप्रत्यक्षे अपि प्रमाणान्तरोपात्ते सती विशिष्टज्ञानहेतुतां भजेते इति द्विविधं प्रत्यक्षम् ।।

प्रमाणफलविभागस्तु—यदा प्रमितिः प्रमाणमिति भावसाधनः प्रमाणशब्दः तदा साक्षात्कारि प्रमाणम् । तदनन्तरं जायमाना हानोपादानोपेक्षाबुद्धयः फलम् । यदा प्रमीयतेऽनेनेति करणसाधनः तदा अपेक्षितं करणं मन इन्द्रियं तदर्थसन्निकर्षो वा । सर्वत्र ज्ञानमेव फलम् । तदुद्देशेनैव करणप्रवृत्तेः । भावसाधनपक्षेऽपि यद्यपि हानादिबुद्ध्यपेक्षया प्रमा स्वयं करणमेव तथापि ज्ञानाज्ञानविभागाभिप्रायेण पक्षद्वयविभागोऽवगन्तव्यः ।।

अथानुमानम् ।

एकाश्रयाश्रितयोरेकदेशयोः ज्ञातसम्बन्धनियमेनैकदेशेन सन्दिग्धस्यैक-देशान्तरस्य परिज्ञानमनुमानम् । तदुक्तम्—

ज्ञातसम्बन्धनियमस्यैकदेशस्य दर्शनात् ।

एकदेशान्तरे बुद्धिरनुमानमबाधिते ।। इति ।। (प्रकरणपञ्चिका.पु.६४)

अत्रैकदेशशब्देनाश्रिताभिधानम् । आश्रयशब्देन पक्षस्य । उदाहरणे तु महानसादौ ज्ञाताग्निसम्बन्धनियमस्य धूमस्य पर्वतोपरि दर्शनात्तद्गतवह्निज्ञानम् ।

किं पुनस्सम्बन्धनियमे प्रमाणम् । न तावत्प्रत्यक्षम् । तस्य सन्निहितदेशवर्तमानकालवस्तुविषयत्वनियमात् । नापि मानसं प्रत्यक्षम् । तस्य बहिरस्वतन्त्रत्वात् । भूयोदर्शनसंस्कारसचिवमपि न समर्थम् । संस्कारस्य स्मृतिमात्रहेतुत्वात् ।

उच्यते—

धूमाग्न्योस्संयोगस्तावत्प्रत्यक्षेण प्रकाशते । सोऽपि द्रव्यविशेषणत्वेन । गुणानां द्रव्यपरतन्त्रस्वभावत्वात् । धूमवह्नी तु विशेष्यतया । देशकालावपि संयोगवद्द्रव्यविशेषणतयैव । न पुनस्संयोगविशेषणतया । तथाहि— संयुक्ताविमाविति हि प्रतीतिः । न पुनरयमनयोस्संयोग इति । सन्निहितदेशवर्त-मानकालता हीदन्ता । सा च द्रव्यपरतन्त्रा । ततश्चात्र प्रथमं महानसादावग्नेर्धूमेन सह संयोगो देशकाला(लान)वच्छिन्न एव प्रतीयते । स तस्मात्स्वाभाविकः । ततश्चाग्नेर्धूमेन सह संबन्धो धूममात्रानुबन्धीति विज्ञायते । तथा च देशान्तरे कालान्तरे वा धूमसत्तैव प्रमाणमपेक्षते । न तु तस्यां सत्यामग्निसंयोगस्य । तन्मात्रानुबन्धित्वेन पूर्वमेवावगमात् । अतः प्राथमिकं प्रत्यक्षमेव धूमाग्न्योस्स-म्बन्धनियमे प्रमाणम् । भूयो दर्शनेन पश्चात्तस्य निरुपाधिकत्व-निश्चयः । यत्नेनान्विष्यमाणेऽप्युपाधेरदर्शनात् । अतो भूयो दर्शनमपि सप्रयोजनमिति गुरुभिरादृतम् ।

यत्र तु प्रथमप्रतिपन्नस्संयोगः पश्चात्कदाचिद्विहन्यते यथाऽग्निना सह धूमस्य । तस्य देशकालावच्छेदः पश्चादनुप्रवेश्यत इति तस्य स्वाभाविकत्वाभावेन औपाधिकत्वम् । उपाधिश्चार्द्रेन्धनसम्बन्धः । तन्मात्रानुबन्धित्वाद्धूमस्य ।

इत्थमन्यत्रापि यत्र व्याप्यव्यापकसम्बन्धो येन येन प्रमाणेन निरुपाधिकः प्रतीयते तत्र तदेव प्रमाणमिति सिद्धम् ।

तदुक्तम्—

यः कश्चिद्येन यस्येह सम्बन्धो निरुपाधिकः ।
प्रत्यक्षादिप्रमासिद्धस्स तस्य गमको मतः ।।

इति ।। (प्रकरणपञ्चिका.पु.७१)

तत्राचार्यमतपक्षपातिनः केचिदाहुः—वह्निधूमौ संयुक्तौ संयुज्येते संयोक्ष्येते इति संयोगस्यैव भावार्थस्य कालत्रयावच्छेदः प्रतीयते । न चावश्यमिदंशब्देनैव कालो निर्देष्टव्यः । लडादिप्रत्ययैरपि सुतरां तन्निर्देशादिति । मा भूद्वा देशकालाभ्यामवच्छेदावगमस्संयोगस्य । तथापि स्वाभाविकत्वमप्रामाणिकम् । न ह्यवच्छेदानवगतिमात्रेण तद(दभावा)वधारणं सिद्ध्यति । सतोऽप्यनवगतिसम्भवात् । तस्मादनिश्चिते चावच्छेदासम्भवे न स्वाभाविकत्वं सिद्ध्यति ।

अत्रोच्यते—व्याप्तिग्राहकप्रमाणेन हि संयोगस्य कालावच्छेदो न प्रतीयत इति वदामः । न त्वनुशासनसिद्धलडादिमुखेन संयोगस्य कालावच्छेदं निवारयामः । तस्य तु व्याप्तिप्रतीतावनुपयोगात् । तद्ग्राहकप्रमाणमुखेनैव तदवच्छेदस्य तद्ग्रहणोपयोगात् । नाप्यवच्छेदानवगतिमात्रेण स्वाभाविकत्वं ब्रूमः । भूयोदर्शनस्यापि सहायत्वात् । तेन हि निरुपाधिकत्वनिर्णये स्वाभाविकत्वं परिशेषात्सुस्थम् ।

किञ्च संयोगादयो हि वस्तुतो द्रव्यपरतन्त्रस्वभावाः । द्रव्यं तु स्वतन्त्रम् । अतस्तस्यैवावच्छेद्यत्वमौत्सर्गिकम् । यत्र त्वविवादस्सम्भवति तत्र विशेषणभूतस्संयोगादिरपि कालेनावच्छिद्यते । यथा वह्नेर्धूमसम्बन्धः । अत एव तस्यौपाधिकत्वमिति ।

तच्चानुमानं स्वार्थपरार्थभेदेन द्विविधम् । स्वयमनुसंहितया सामग्र्या अनुमानोत्पत्तिः स्वार्थम् । परप्रयुक्तवाक्योद्बोधितया तु परार्थम् ।

तच्च वाक्यं त्र्यवयवम् । ते च प्रतिज्ञाहेतूदाहरणानि । तत्र प्रतिज्ञा तु प्रथमप्रयोगार्हा । हेतूदाहरणयोस्तु न प्रयोगक्रमनियमः । एकदेशदर्शनपूर्वकमपि सम्बन्धनियमस्मरणं सामग्र्युद्बोधकम् । तथा सम्बन्धनियमस्मरणपूर्वकमप्येकदेशदर्शनम् । हेतूपनययोस्त्वन्यतरप्रयोगेणापि साध्यसिद्धेरुभयोपादानं व्यर्थमिति मीमांसकाः । निगमनमप्यनर्थकमेव । यथोदितहेतुबललब्धत्वात्साध्यस्य ।

तथा वैधर्म्यदृष्टान्तोऽपि नानुमानाङ्गम् । साध्यधर्मसम्बन्धनियमवलेन हेतोर्गमकत्वम् । तच्च साधर्म्यदृष्टान्तेनैव समर्थितम् । कृतं वैधर्म्यदृष्टान्तेन । अत एव तत्प्रतिपादनपरं कैश्चित्प्रयुज्यमानं वैधर्म्योदाहरणवाक्यमपि व्यर्थमेव । तर्हि विकल्पस्स्यादिति चेन्न । अतुल्योपायत्वात् । एकस्य ऋजुत्वात् इतरस्य वक्रत्वात् । तुल्यप्रकारयोरेव हि विकल्पः । अत एव केवलव्यतिरेक्यनुमानं केचिन्मीमांसका न सहन्ते । साध्यसाधनसम्बन्धस्यान्वयदृष्टान्ते प्रसिद्धत्वात् तस्य चात्राभावात् ।

प्रमाणफलविभागस्तु प्रत्यक्षवत्कर्तव्यः । यदा अनुमितिरनुमानमिति व्युत्पत्त्या साध्यज्ञानं प्रमाणं तदा तदनन्तरभाविनी हानादिबुद्धिः फलम् । यदा त्वनुमीयतेऽनेनेत्यनुमानमिति करणाश्रयः तदानीं न ज्ञानादीनां करणत्वं वैवक्षिकत्वात्करणभावस्य । सर्वत्र लैङ्गिकविषया प्रतीतिरेव फलम् । तत्र लौकिकवचसामनुमानवेषेण प्रामाण्यं शब्दप्रमाणावसरे वक्ष्यामः । अतस्सर्वं **प्रकरणपञ्चिकायां प्रमाणपारायणे** अनुमानपरिच्छेदे वहुशो वर्णितम् । प्रतितन्त्रसिद्धान्तमात्रप्रवृत्तत्वान्नास्माकं प्रपञ्चाधिकारः ॥

अथोपमानम् ।

सदृशदर्शनात्तत्सदृशवस्त्वन्तरगतसादृश्यज्ञानमुपमानम् । यथा पूर्वदृष्टगोः पुरुषस्य वने गवयं तत्सदृशं पश्यतो यद्गोगतगवयप्रतियोगिकसादृश्यज्ञानम् 'अनेन सदृशी मदीया गौः' इति तदुपमानम् । नेदं प्रत्यक्षम् । चक्षुस्सन्निकर्षातिवर्तिन्यां गवि जायमानत्वात् । न स्मृतिः । पूर्वमेतादृशाननुभवात् । तत्पूर्वकत्वात्स्मृतेः । गोमात्रज्ञानं तु स्मृतिरेव । नाप्यनुमानम् । व्याप्तितत्प्रतिसन्धानपूर्वकत्वाभावात् । सदृशदर्शनादित्यनेनैन्द्रियकसादृश्यज्ञानस्योपमानत्वनिरासः । अवशिष्टेन च सादृश्यदर्शनानुबन्धिनः भूयोऽवयवसामान्यज्ञानादेः । सादृश्यस्य च पृथक्तत्त्वान्तरत्वं प्रमेयनिरूपणावसरे भविष्यति ।

अथार्थापत्तिः ।

अर्थान्तरकल्पनायामसत्यां योऽर्थान्तरमनुपपन्नं कुरुते तत्रार्थापत्तिः प्रवर्तते । यथा 'जीवन् देवदत्तो नास्ति' इत्यत्र गृहाभावे दृष्टे श्रुते वा । तत्रासति बहिर्भावकल्पने गृहाभावो जीवनमनुपपन्नं कुर्वन् बहिर्भावं कल्पयति । अनुपपत्तिश्चात्र सन्देहः । तथाहि—अकल्पिते बहिर्भावे गृहाभावे च निर्णीते जीवति वा न वेति सन्देह एव भवति । कल्पिते तु तस्मिन् स प्रशाम्यति । अर्थसन्देहापादकोऽर्थः प्रमाणम् । बहिर्भावकल्पना प्रमा । कल्प्यमानोऽर्थः प्रमेयम् । यद्वा प्रमितिः प्रमाणमिति व्युत्पत्त्या कल्पना प्रमाणम् । तदनन्तरभावि विशिष्टज्ञानं फलमिति ।

ननु गृहाभावदर्शनाद्बहिर्भावकल्पनमनुमानमेव । तथाहि—देवदत्तो बहिरस्ति गृहे अविद्यमानत्वे सति जीवनवत्त्वात् । यो जीवंस्तत्र नास्ति स ततोऽन्यत्रास्ति यथाहम् इति चेत् मैवं—जीवनांशे सन्दिग्धासन्दिग्धत्वात् (सन्दिग्धत्वात्) । ननु जीवनं प्रमाणान्तरप्रतिपन्नं कथं सन्दिग्धम् । सत्यम् । प्रमिते हि वस्तुनि

पूर्वप्रतिपन्नरूपाद्रूपान्तरप्राप्तौ सन्देहो भवत्येव । पूर्वं हि जीवनं गृहसम्बद्धमेव प्रमितम् । सम्प्रति तत्सम्बन्धे निवृत्ते बहिर्देशसम्बन्धे चाकल्पिते जीवने सन्देहों भवत्येव । 'पूर्वं जीवन् देवदत्तो गृह एव दृष्टः । इदानीं स गृहे नास्ति । जीवति वा न वा' इति । तर्हि बहिर्देशसम्बन्धकल्पनादसन्दिग्धं जीवनं लिङ्गमिति चेत्-अनुमेयाभावः । बहिर्देशसम्बन्ध एव अनुमित्सितः । स तु निर्णीतश्चेदनुमेयं नावशिष्यते । केवलगृहाभावोऽपि न लिङ्गम् । मृतजनिष्यमाणयोर्व्यभिचारात् । अतोऽत्र नानुमानावकाशः । अतस्सन्देहापादकोऽर्थोऽर्थापत्तिरिति स्थितम् । न हि धूमादिकं कस्यचिदर्थस्य संशयापादनद्वारेण लिङ्गमिति ततो वैषम्यम् ।

तथा 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्राकल्पिते रात्रिभोजने पीनता (अनुपपद्यमाना) रात्रिभोजने प्रमाणम् । तदुक्तम्—

तत्सन्देहव्युदासाय कल्पना या प्रवर्तते ।
सन्देहापादकादर्थादर्थापत्तिरसौ स्मृता ।। इति । **(प्रकरण.प.,पु.११९)**

अन्ये पुनरेवं मेनिरे–यस्मिन्नकल्पिते योऽर्थः प्रतीतोऽपि पूर्वपरिदृष्टस्वरूपपरिवृत्त्या संशयरूपामनुपपत्तिं भजते सोऽर्थः स्वगतसन्देहव्युदासाय अर्थान्तरकल्पनायां प्रमाणम् । यथा पूर्वोक्तं जीवनसामान्यं भोजनमात्रञ्च । धूमाद्यनुमानं नैतादृशम् । एकत्रा(त्र)निश्चितं करणमपरत्र सन्दिग्धमिति ततो वैषम्यम् । तदुक्तम्—

यत्कल्पनां विना योऽर्थः प्रतीतोऽप्येति संशयम् ।
तेन तत्कल्पनामेके त्वर्थापत्तिं प्रचक्षते ।। इति ।

(प्रकरण.प.,पु.११९)

केचित्तु गृहाभाव एवान्यथाऽनुपपद्यमानस्सन् बहिर्भावकल्पनायां प्रमाणमित्याहुः । तदयुक्तम् । तत्र गृहाभावस्य काऽनुपपत्तिः । असति बहिस्सत्त्वे

स्वस्याभाव इति चेत् तर्हि साध्याभावे हेत्वभावरूपो व्यतिरेक एव । स च हेतुसद्भावे साध्यसद्भावलक्षणेनान्वयेनावगम्यत इत्यन्वयव्यतिरेकमुखेन प्रवर्तमानत्वादिदमनुमानमेवेति नार्थापत्तेः पृथक्प्रामाण्यसंभवः । अतस्सन्देहापादकोऽर्थस्तेनापादितसन्देहोऽर्थो वाऽर्थापत्तिरिति स्थितम् ।।

अत्र केचित्—यत्रार्थानुपपत्तिः प्रमाणान्तरप्रतिपन्ना तत्रार्थान्तरमेव कल्प्यमिति सा दृष्टार्थापत्तिः । यत्र तु वाक्यप्रतिपन्ना 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति तत्र 'रात्रौ भुंङ्क्ते' इति वाक्यमेव कल्प्यम् । 'शाब्दी ह्याकाङ्क्षा शब्देनैव परिपूर्यते' इति न्यायात् । अतस्सा श्रुतार्थापत्तिरिति अर्थापत्तिद्वैविध्यमाहुः । तदयुक्तम् । अत्राप्यर्थस्यैव कल्पयितुमुचितत्वात् । यस्मिन्नकल्पितेऽनुपपत्तिः कल्पिते तु तच्छान्तिः अतः तदेव कल्प्यम् । अन्यथा ह्यव्युत्पन्नपदवाक्यप्रयोगे तु(न)तच्छान्तिरिति तदेव कल्प्यमिति । तर्हि पदार्थज्ञानादेव तच्छान्तिरिति अर्थपरिकल्पनमेवोचितम् । उभयपरिकल्पने गौरवश्च । दृष्टार्थापत्तावर्थस्यैव कल्प्यत्वं दृष्टमिति तदेवात्रापि कल्प्यताम् । शाब्दी ह्याकाङ्क्षा कल्पितार्थान्वयेनापि शाम्यति । तस्यैवाकाङ्क्षितत्वात् । अत एव 'द्वारम्' इत्यादौ अध्याहारस्थले बुद्धिस्थेनैव संत्ररणादिनाऽन्विताभिधानम् । न तु 'संव्रियताम्' इत्यध्याहृतेन शब्देन । बुद्धिसन्निहितेनाप्यन्विताभिधानोपपत्तेः । जिज्ञासावशेन क्वचित्परं प्रति शब्दप्रयोगसम्भवः । न तु नियमेन ।

नन्वर्थकल्पनाय प्रवृत्ताऽर्थापत्तिः । तस्यार्थस्य सविकल्पकज्ञानविषयत्वम् तेषां च शब्दपुरस्सरत्वात्तद्वाचकशब्दपर्यन्तं व्याप्रियत इति चेन्न । सर्वत्र सविकल्पकप्रत्यक्षे स्वार्थानुमाने च तदभावात् । न हि ते शब्दपर्यन्तं व्याप्रियेते । बधिरमूकतिरश्चां तदसम्भवात् । किन्त्वर्थमात्रे । किञ्च सर्वत्र संविकल्पकज्ञानेषु हि स शब्दः श्रवण(स्मरण) विपरिवर्ती । न तु प्रमेयम् । अर्थदर्शनाद्धि

वाचकशब्दस्स्मर्यत इति विचारासहमेतत् । शब्दं तु प्रमाणं स्वावसरे निरूपयिष्यामः । तस्मादर्थापत्त्या सह पञ्च प्रमाणानि । एतत्सर्वं **प्रमाणपारायणे** प्रपञ्चितम् । वेदार्थविचारानुपयोगान्नास्माकं तत्रातिनिर्बन्धः ।।

अभावप्रमाणनिरासः ।

अभावाख्यं षष्ठं प्रमाणमभावग्रहणाय कैश्चिदङ्गीक्रियते । अभावस्य भावविलक्षणतया भावरूपप्रमाणेन तद्ग्रहणाशक्तेः पञ्चप्रमाणानुत्पत्तिरूपमभावरूपं प्रमाणमेषितव्यमिति । तदयुक्तम् । प्रमेयाभावात् ।

ननु कथं तदभावः । 'इह भूतले घटो नास्ति' इति तावदस्ति प्रतीतिः । सा किं भूतलस्वरूपविषया । अथ केवलतद्विषया । अत्रापि चिन्तनीयं किमिदं कैवल्यं नामेति । किं भूतलस्वरूपमथ तद्धर्म इति । नाद्यः । घटवत्यपि प्रसङ्गात् । न द्वितीयः । पूर्वोक्तदोषानतिवृत्तेः । द्वितीये त्वभावाङ्गीकारः ।

किञ्च कण्टकादिविरहिणि भूतलादौ निश्शङ्कः पदन्यासादिव्यवहारस्तावत्किं भूतलमात्रपरिच्छेदनिबन्धनः अथ केवलभूतलपरिच्छेदनिबन्धनः । तत्रापि विकल्पनीयम् । कैवल्यं परिच्छेदस्य विशेषणमुत भूतलस्येति । नाद्यः । कण्टकादियोगिन्यपि प्रसङ्गात् । द्वितीये तु केवलपरिच्छेदो नाम यथाकथञ्चित्परिच्छेदः । तथा च सूक्ष्मकण्टकादिष्वनवगतेष्वपि निश्शङ्कव्यवहारः स्यात् । प्रयत्नपूर्विका तज्जिज्ञासा च निह्नुता स्यात् । द्वितीये त्वभावाख्यं प्रमेयमङ्गीकृतं स्यात् । तदानीं हि तत्परिच्छेदनिबन्धनो व्यवहारो युक्तः । प्रतियोगिपरामर्शार्थं जिज्ञासा च ।

किञ्चाभावानङ्गीकारे नास्ति शब्दो निरर्थकः स्यात् । शशादीनां शृङ्गानुमानं स्यात् । 'इदं रजतम्' इत्यस्य बाधश्च न स्यात् । तदङ्गीकारे तु सार्थकः ।

बाधितविषयत्वं चानुमानस्य युक्तम् । बाधश्च युक्तः । तस्मादस्ति भावविलक्षणं तत्त्वान्तरमिति ।

इदमिदानीं विचारयामः—किं तद्भानप्रमाणबोध्यम् उताभावबोध्यमिति । तत्र न तावत्प्रत्यक्षबोध्यम् । इन्द्रियव्यापारोपरमेऽप्यवगतेः । कथमयं निर्णयः । अभावस्तावत्कुत्रचित्कस्यचित्प्रत्येतव्यः 'इह तन्न' इति । ततश्च यत्र प्रत्येतव्यः तद्ग्रहण एवेन्द्रियमुपरमते । नाभावग्रहणे । तेन सह सम्बन्धाभावात् । तस्मादभावप्रमाणगोचरोऽभावः ।

कथमयं विभागोऽवसितः । उच्यते–गृहादिस्वरूपमनुभूय देशान्तरगतः पुरुषः वस्त्वन्तराभावप्रश्ने सति भावान्तरं जिज्ञासमानस्य प्रष्टुस्तथैव नास्तीत्युत्तरं प्रतिपद्यते ।

तदुक्तम्—

स्वरूपमात्रं दृष्ट्वा च पश्चात्किञ्चित्स्मरन्नपि ।
तत्रान्यनास्तितां पृष्टः तदैव प्रतिपद्यते ।। इति । (श्लो.वा.अभाव.२८)

न च तत्रेन्द्रियव्यापारस्समस्ति । देशविप्रकर्षात् । तस्मादभावप्रतीतिर्नैन्द्रियिकी । तेन प्रत्यक्षोऽभावो न शक्यो वक्तुम् । तत्र पूर्वमेवाभावो गृहीतः पश्चाद्बुद्धिस्थ इति च न वक्तुं शक्यते । प्रतियोगिनस्तदानीं बुद्धावनारोहात् । न च निर्विकल्पकेन पूर्वमनुभूतः पश्चात्सविकल्पकेन स्मर्यत इति वाच्यम् । नियमेन प्रतियोगिसम्मितवेषस्याभावस्य सर्वदा निर्विकल्पकागोचरत्वात् । तत्सम्भवे वा स्मृतिरपि तादृशी स्यात् यथानुभवं स्मृतेः ।

नाप्यनुमानम् । लिङ्गाभावात् । न ह्यत्र अभावव्याप्तं लिङ्गमुपलभ्यते ।

उपमानार्थापत्त्योरनवसर एव । तस्मात्तत्र तत्र भावप्रमाणपञ्चकानुत्पत्तिरेवा-भावावगमे प्रमाणम् ।

ननु प्रमाणानुत्पत्तिर्लिङ्गतया प्रमाणं स्यात् । न । उभयोरप्यभावात्मकत्वेन भावग्राहकप्रमाणेन तयोर्व्याप्तिग्रहासम्भवात् । तस्मादभावाख्यं प्रमाणं स्वमहिम्नैव स्वविषयमुपस्थापयति ।

केचित्तु दृश्याभावस्थले दृश्यानुपलब्धिः प्रमाणम् । अन्यत्र तु भावरूपमभावरूपं यथायोग्यं प्रमाणं स्यादित्याहुः । तस्मात्प्रमेयसद्भावादभावाख्यं प्रमाणमङ्गीकर्तव्यमिति ।

अत्रोच्यते—द्विविधा तावद्भूतलादीनामवगतिः । एका संसृष्टविषया अपरा तदेकविषया । साऽपि द्विधा–प्रतियोगिन्यदृश्ये दृश्ये च । तत्र दृश्ये प्रतियोगिनि या तदेकविषया बुद्धिस्सैव तस्य प्रतियोगिनोऽभाव इत्युच्यते । न हि तदेकविषयबुद्धिमात्रमभावः । विशेषानवगमात् । किन्तु दृश्ये प्रतियोगिनि । ततश्च यस्मिन् प्रतियोगिति दृश्ये या तदेकविषया बुद्धिः सा तदभाव इति विशेषव्यपदेशलाभः । तेन 'इह भूतले घटो नास्ति' इत्युक्ते घटे दृश्ये भूतलमात्रं ना(त्रम) बोधीत्युक्तं भवति ।

ननु किमिदं प्रतियोगिनि दृश्यत्वं नाम । अन्यत्र प्रमितस्य अन्यत्र प्रसक्तिरिति त्वन्मतस्थितिः । अन्यथा अप्रसक्तप्रतिषेधापातात् । सैवास्तु दृश्यता । अस्माकं तु ज्ञानविशेषः । योऽप्यभावाख्यं तत्त्वमङ्गीकुरुते तेनापि तदेकविषयां बुद्धिमङ्गीकृत्यैवाभावप्रतीतिरिष्यते । अधिकरणप्रतीतेः प्रतियोगिप्रसक्तेश्च तत्प्रतीतिकारणत्वात् । तत्र कीदृशस्याधिकरणस्य प्रतीतिस्तत्कारणमिति चिन्तनीयम् । किं सद्वितीयस्य अथाभावविशिष्टस्य

अथानपेक्षस्यैकाकिन इति । नाद्यः । घटघटितेऽप्यधिकरणे प्रतीते तदभावप्रतीतिप्रसङ्गात् । न द्वितीयः । आत्माश्रयात् । अभावं हि प्रतीत्य तद्विशिष्टमधिकरणं बुद्ध्वा पश्चात्स एवाभावः प्रतिपत्तव्य इत्यभावावगतिरेवाभावावगमकारणं यतः । अतोऽप्रतीतेऽप्यभावे स्वरूपमात्रप्रतीतिरङ्गीकार्येति तृतीयः पक्षः परिशिष्यते । तावतैवाभावव्यवहारोपपत्तौ किमतिरिक्ततत्त्वान्तराभ्युपगमेन । नीलपीतादिवत्तादृशतत्त्वान्तरानुपलम्भात् । 'वायुपरमाणवोऽनीलरूपाः, सलिलपरमाणवो गन्धशून्याः' इत्यादिष्वनुमानात्मिका तदेकविषया बुद्धिः ।

अयं भावः—चतुर्विधेष्वभावेषु यस्य यस्याभावस्य यद्यदधिकरणं त्वन्मते दृश्ये प्रतियोगिनि तत्तदधिकरणमात्रगोचरा बुद्धिरेवास्माकमभाव इति । नास्तिशब्दश्च तादृशाधिकरणमात्रवाचकः । नञ्शब्दश्च स्वरूपमात्रपर इति हि प्राभाकराः ।

निश्शङ्कपदन्यासादिव्यवहारोऽपि तदेकविषयबुद्धिमात्रनिमित्तकः । जिज्ञासाऽपि दृश्यत्वापत्तये युक्तैव । तथा प्रत्यक्षबाधो लिङ्गबाधश्च तदेकविषयबुद्धिमात्रनिमित्तको व्यवहारबाधमात्रनिमित्तको वा । शुक्तिकायां रजतव्यवहारो लिङ्गाभासे लिङ्गव्यवहारश्च बाध्यते । न हि ज्ञानं बाध्यते । किन्तु व्यवहार एवेति प्राभाकराः ।

ननु यद्यभावोऽपरो नास्ति तर्हि यत्र प्राक्संसर्गबुद्धिरासीत् तत्र कथं तदेकविषया बुद्धिराविर्भवति । त्वन्मते वा कथं तत्राभावप्रतीतिः । मुद्गराभिघातादिवशादिति चेत्—तत एवास्माकमपि तदेकविषया बुद्धिर्जन्यते । एतेन देशान्तरं नीतस्य घटस्य तत्र स्थितिरेव तदेकविषयबुद्धिनिमित्तमिति व्याख्यातम् ।

ननु यद्यभावोऽपरो नास्ति तर्हि मुद्गराभिघातादिना कपालमालोत्पत्तौ यत्र तदेकविषया बुद्धिस्तत्र पश्चात्संसृष्टविषयाऽपि न स्यात् । त्वन्मते वा किमिति न स्यात् । तत्र भावविनाशादिति चेत्, अस्माकमपि तथा स्यात् । तर्ह्यभावाङ्गीकार इति चेत्, वयमपि विनाशमङ्गीकुर्मः । न (स) तु भावान्तरोदय एव । भाव एव त्वेकाकी सद्वितीयश्चेति द्वयीमवस्थां लभते । तत्रैकाकी भावोदय एव विनाशशब्दवाच्यः । त्वन्मतेऽपि तादृश्यवस्थाऽवश्याङ्गीकार्येत्यधस्तादुक्तम् । एवं निरन्वयविनाशिष्वपि बुद्धिप्रभृतिषु धर्मिणः स्वरूपावस्थानमेव भावान्तरोदयोऽवगन्तव्यः ।

किञ्च प्रमाणान्तरवादिनोऽप्यनुपलब्धिलक्षणा प्रमाणानुत्पत्तिर्न सत्तयाऽभावबोधिका । स्वापादौ सर्वाभावप्रतीतिप्रसङ्गात् । किञ्च कस्यचिद्वस्तुनः कुत्रचित्पूर्वमदृष्टस्य पुनस्तस्मिन्नेव देशे दृश्यमानस्य दर्शनसमानकालीनोऽभावोऽवसीयते 'इदमिह पूर्वं नासीत्' इति । ततश्च तस्य दर्शनाद्दर्शनाभावो निवृत्त इति प्राक्कालीन एव दर्शनाभावोऽनुसन्धीयमानोऽभावप्रतीतिकारणमिति वक्तव्यम् । ततश्च विदितैवानुपलब्धिरभावप्रतीतिकारणमिति वक्तव्यम् । तथा चानुपलब्धेरप्यभावरूपतया तद्ज्ञानमप्यनुपलभ्यमित्यनवस्था । तदेकविषया बुद्धिश्चेत् स्वयं प्रकाशतया न प्रमाणान्तरापेक्षिणी । तस्मात्प्रमाणानवक्लृप्तिरपि (रिति) न तन्महिम्ना प्रमेयावक्लृप्तिरिति पञ्चैव प्रमाणानीति सिद्धम् । शाब्दं स्वावसरे वक्ष्यामः । एतत्सर्वममृतकलायां शालिकानाथेन समर्थितम् ।।

इति श्रीरामानुजाचार्यविरचिते तन्त्ररहस्ये

प्रमाणपरिच्छेदः प्रथमः ।।

प्रमेयपरिच्छेदः ।

तत्र चाभ्युपगमसिद्धान्तन्यायेन कणादतन्त्रसिद्ध एव प्रमेयवर्गोऽङ्गीक्रियते । तस्य तत्प्रतिपादनार्थं प्रवृत्तत्वात् । न तु पृथगत्र व्युत्पाद्यते । तत्राप्यनभिमतांशो निराक्रियते । विशेषांशस्तु व्युत्पाद्यते ।

तथाहि—

द्रव्यगुणकर्मसामान्यसमवायशक्तिसङ्ख्यासादृश्यान्यष्टौ पदार्थाः ।

तत्र द्रव्याणि

पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नव ।

तत्र वायुः प्रत्यक्ष एव । त तद्गतस्पर्श एव प्रत्यक्षः शीतोष्णस्पर्शभेदेऽपि 'स एव वायुः' इति प्रत्यभिज्ञानात् । नन्वनुष्णाशीतस्पर्शो वायुः । स कथं तद्भेदे प्रत्यभिज्ञायते । स्फटिकवदुपपत्तिः । यथा हि शुक्लोऽपि स्फटिकः तत्तदौपाधिकगुणसम्बन्धेऽपि 'योऽयं शुक्लस्स एवायं रक्तः' इत्याश्रयांशे प्रत्यभिज्ञायते ।

तत्र पृथिव्येव शरीरारम्भिका । नेतराणि भूतानि । तदनुपलम्भात् । इदानीन्तनस्त्रीपुम्परम्परायाश्च तथा दर्शनात् । विपरीतमसदेव । तच्च जरायुजाण्डज-स्वेदजभेदेन त्रिप्रकारमेव । उद्भिज्जं तु वृक्षादिकं न शरीरम् । भोगानुपलम्भात् । तदायतनं हि तत्प्रयोजकम् ।

यदपि—

श्मशाने जायते वृक्षः कङ्कगृध्रोपसेवितः ।। (आगम?)

शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ।। (मनु.स्मृ.१२-९)

इति वचनं तद्विधिपरतन्त्रतया न स्वतन्त्रम् । 'यजमानः पशुः (प्रस्तरः)आदित्यो यूपः' इतिवत् । प्रमाणविरोधात् ।

तथा आत्मा च न मानसप्रत्यक्षः । कर्मकर्तृभावविरोधात् । 'मां जानामि' इति व्यपदेशस्तु भाक्तः । किन्तु विषयेषु प्रकाशमानेषु ज्ञानाश्रयतया प्रकाशते । सर्वाऽपि संवित् त्रितयप्रकाशिका । अवश्यं ज्ञातुरनुभवो मेयानुभवेष्वनुवर्तते । अन्यथा स्वपरसंवेद्ययोरनतिशयः स्यात् । विषयैस्सहोपलम्भनियमश्च एवं सत्युपपन्नः । न ह्यात्मा विषयाननुविद्धोऽवभासते विषयाश्च बोद्धर्यनवभासमाने भासन्ते । तस्मात्सैव संविद्विषये प्रमाणम् । सैव पुरुषं विषयीकरोतीति तत्संवित्तिफलभागित्वेऽपि पुरुषस्य न कर्मता । कर्तृतैव । परसमवेतक्रिया-फलशालि कर्मेति कर्मज्ञाः । अतो न मानसप्रत्यक्षः ।

तमो नाम द्रव्यान्तरं न भवति । अन्धानामिव केवलं नीलिमाभिमानः । अपवारितालोकं केवलं भूभागादिकमेव छाया ।

गुणास्तु रूपरसगन्धस्पर्शपरिमाणपृथक्त्वसंयोगविभागपरत्वगुरुत्वद्रवत्वस्नेह-संस्कारशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माः ।

एतेषां नित्यानित्यविभागस्तथोत्पत्तिस्थितिविनाशप्रकारश्च कणादतन्त्रसिद्धः । वेदार्थविचारानुपयोगान्नास्माकं तत्राभिनिवेशः ।

कर्म तु नित्यानुमेयम् । संयोगविभागपरम्परया हि गतिरनुमीयते । देशाद्देशान्तरप्राप्त्या सूर्यगत्यनुमानं भाष्ये प्रपञ्चितम् । इदमेव कर्म स्वतस्साध्यतया साक्षाद्विधेयम् । सिद्धस्वभावयोस्तु द्रव्यगुणयोस्तदुपरागात् । स्वतः 'दध्ना जुहोति' इति होमोपरक्ततयैव दधि विधीयते । तथा 'अरुणया क्रीणाति' इत्यारुण्यमपि ।

जातिस्तु प्रत्यक्षद्रव्यमात्रे वर्तते । नान्यत्र । अनुपलम्भात् । इत्थं हि तस्याः प्रतीतिः–प्रत्यक्षेषु घटपटादिद्रव्येषु तत्तदाश्रयग्राहकैरिन्द्रियैः

संयुक्तसमवायाद्गृह्यमाणा नानाव्यक्तिषु स्वयमेकाकारतया ताभ्योऽत्यन्तविलक्षणा प्रथमपिण्डग्रहणे स्वरूपमात्रेण प्रतीयमाना द्वितीयादिपिण्डग्रहणेषु सैवेयमिति पूर्वाकारावमर्शेन प्रत्यभिज्ञायमाना पामरपरीक्षकाविशेषेण प्रकाशते ।

तदुक्तम्—

जातिराश्रयतो भिन्ना प्रत्यक्षज्ञानगोचरा ।
पूर्वाकारावमर्शेन प्रभाकरगुरोर्मता ।। इति ।।

(प्रकरण-प.पु. १७)

अनुवृत्ता हि जातिः । अनुवृत्तिश्च तद्धर्मः । अतः प्रथमपिण्डग्रहणसमये पिण्डान्तरानुसन्धानशून्यतया तदनुवृत्तिर्न प्रतीयते । द्वितीयादिग्रहणेषु तु तत्सम्भवात्सा प्रतीयते । यत्र हि भेदमध्यवस्यत एव पुंसोऽभेदज्ञानं तत्रानुपपत्त्या जातिः कल्प्यते । जातिप्रत्यभिज्ञा च तत्रैव स्यात् । अत एवैकवर्तिकावर्तिनीषु क्षणविध्वंसिनीषु बह्वीषु ज्वालासु ज्वालात्वं न प्रत्यभिज्ञागोचरम् । तत्र शुक्तिरजतवद्भेदाग्रहेण व्यक्तिभेदानुपलम्भात् ।

केचित्तु जातिं व्यक्तिभ्यो भिन्नामभिन्नां चोररीचक्रुः । तदनुपपन्नम् । विरोधात् । न चोपलम्भबलेन तदविरोधः । तस्यैवासम्भवात् । भिन्नबुद्धिबोध्यं हि वस्तु भिन्नम् । अभिन्नबुद्धिबोध्यमभिन्नमिति लौकिकाः । तत्र वस्तुद्वय-प्रतीतिसमये जातिर्व्यक्तितो भिन्नाभिन्नवेषेण व्यक्तिर्वा जातितस्तथा प्रतीयेत । ततो द्विरवभासोऽयं स्यात् । नैवं दृश्यते । तस्माद्भेद एव तयोः । सत्यपि तस्मिन् 'इह कुण्डे बदरम्' इतिवत् 'इह गवि गोत्वम्' इति नेहप्रत्ययः । सर्वं हि रूपं रूपिणमन्तरेण न प्रतीयते । तेन समानेन्द्रियग्राह्यतया जातिरपि व्यक्तिप्रतीत्यनुप्रवेशिनी । कर्मणि त्वनुमेये व्यक्तिप्रतीत्यनुप्रवेशाभावाद्भवत्येव 'इह' प्रत्ययः ।

केचित्तु द्रव्यादित्रिके सत्सदिति प्रत्ययानुवृत्तेः सत्ताख्यसामान्यमाहुः । तदसंत् । न च नानाजातीयेषु सर्षपमहीधरादिषु रूपादिषु कर्मसु वा निर्निमेषं निरीक्षमाणस्य पूर्वाकारानुकारिणी सत्ताबुद्धिरुदेति । प्रयोगानुवृत्तिस्तु पाचकादि-शब्दवत् केवलमुपाधिनिबन्धना । उपाधिश्च प्रमाणसम्बन्धयोग्यत्वम् । किञ्चोत्तरत्रिके सच्छब्दप्रयोगः केवलमुपाधिनिबन्धन इति भवदभ्युपगमः । सर्वत्र तथैव स्यात् । अनेनैव न्यायेन प्रत्यक्षाप्रत्यक्षनिष्ठा द्रव्यत्वपृथिवीत्वगुणत्व-शब्दत्वकर्मत्वादयोऽपि निराकृताः । अनुगताकारापरिस्फुरणात् । प्रयोगानु-वृत्तिस्त्वौपाधिकी । उपाधयश्च तत्तल्लक्षणान्येव । तानि च जातिव्यञ्जकतया त्वयाऽप्यङ्गीकृतानि ।

ननु गोत्ववत्सत्ताद्रव्यत्वादीनि झटिति सर्वाविशेषेण न परिस्फुरन्ति । किन्तु शास्त्रमुखेन शिक्षितधियां व्यञ्जकानुसन्धाने सतीति चेत्, हन्त सकलजनमनोनिह्नवः, यदेकमेव वस्तु प्रतिपत्तृव्यवस्थया प्रतीयत इति । तथा च गोत्वमपि सास्नादिमत्यां विप्रतिपन्ननिराकरणायोगात् । अनेनैव न्यायेन ब्राह्मणत्वक्षत्रियत्वादिकमपि न निर्वहति । तर्हि तत्तद्वर्णव्यवस्थया प्रवृत्तानि शास्त्राणि न स्युरिति चेत् मैवम्–सन्ति चानादौ संसारप्रवाहे लोकप्रमाणसिद्धा ब्राह्मणादिशब्दवाच्या अनिदम्प्रथमाः काश्चन स्त्रीपुंव्यक्तयः । तत्प्रभवत्वमेव ब्राह्मणत्वादिकम् । तन्मात्रगोचरं च शास्त्रम् । तच्च व्यञ्जकतया त्वदङ्गीकृतमिति न किंचिदनुपपन्नम् । एतत्सर्वं जातिनिर्णयाख्ये प्रकरणे प्रपञ्चितम् ।

वैशेषिकास्तु–समानगुणकर्मजातिषु नित्यद्रव्येषु परस्परव्यावृत्तिनिमित्तं विशेषाख्यं धर्ममाहुः । तदनुपपन्नम् । पृथक्त्वेनैव व्यावृत्तिसिद्धेः । ननु पृथक्त्वस्य सर्वद्रव्यसाधारणतया नित्यद्रव्येषु ततो नात्यन्तव्यावृत्तिसिद्धिरिति चेत् मैवम्–तेषु तस्या एवासम्भवात् । तद्दर्शिनां तत्सम्भव इति चेत् तेषामेवाभावात् ।

न ह्ययोग्यं वस्तु साक्षात्क्रियते । ननु परमाणवः कस्यचित्प्रत्यक्षाः, मेयत्वात् घटवदिति तत्सम्भव इति चेत् निरवयवद्रव्यत्वेन बाह्यप्रत्यक्षत्वस्य मूर्तत्वेन मानसप्रत्यक्षत्वस्य चासिद्धिः । तस्माद्विशेषाः कथासु परिशिष्यन्ते ।

अयुतसिद्धयोस्सम्बन्धस्समवायः । स च नित्ययोर्नित्यः । अनित्ययोः नित्यानित्ययोश्चानित्यः । यतः कार्यमुत्पद्यते तत एव तदुत्पत्तिरपि । नित्यानुमेयश्च । प्रत्यक्षेणानुपलम्भात् ।

सर्वभावेष्वतीन्द्रिया शक्तिः कार्येणानुमीयते । तथाहि–यथाभूतादेव वह्नेर्दाहो दृष्टः मणिमन्त्रौषधिप्रयोगे सति तथाभूतादेव वह्नेर्दाहो न दृश्यते । अतो मणिमन्त्रादिप्रतिबन्धनीयं तद्विनाश्यं वा किञ्चिदतीन्द्रियं शक्तिसामर्थ्यादिपदवाच्यमभिधेयम् । तस्य च स्वाश्रयकारणादुत्पत्तिः । कार्यानुत्पत्तौ द्वयी गतिः, अभिभवो वा विनाशो वा । यत्र पुनः कार्यं न जन्यते तत्र विनाशः । यत्र तु जन्म तत्राभिभव इति ।

ननु मणिमन्त्रादिसन्निधानादेव कार्यानुदयः स्यात् । (न) कारणावैगुण्ये कार्योदयविघातासम्भवात् । तर्हि तदप्रयोगोऽपि तदुत्पत्तिनिमित्तमिति चेत् न । प्रयोगस्य प्रतिबन्धकतया तदभावस्य केवलं तन्निवृत्तिरूपत्वमेव । न तु निमित्तत्वम् । कार्योत्पत्तिस्तु निवृत्तप्रतिबन्धायाश्शक्तेरेव ।

किञ्च क्वचित्प्रयोगेऽपि प्रतीकारवशेन कार्योत्पत्तिदर्शनान्न तदभावस्य निमित्तत्वम् । एवमपि निमित्तत्वमङ्गीकृत्य शक्तिरपह्नूयते चेत्, स्पर्शवद्द्रव्यसंयोगेन पतनप्रतिबन्धे तदभावस्यैव तन्निमित्तत्वात्, गुरुत्वं दत्तजलाञ्जलि स्यात् । असति प्रतिबन्धे गुरुत्वात्पतनमिति हि त्वन्मतस्थितिः । तदुक्तं—'संयोगप्रयत्नाभावे गुरुत्वात्पतनम्' (वैशेषिकदर्शन-५-१-७) इति ।

प्रयोगस्तु—मणिमन्त्रादिप्रयुक्तो वह्निस्स्वकार्योत्पत्तौ परिदृश्यमान-रूपातिरिक्तरूपान्तरापेक्षः, सत्यपि तस्मिन्कार्यानुत्पादकत्वात्, यद्यस्मिन्सत्यपि नोत्पादयति तत्तदतिरिक्तापेक्षं, यथा केवलं तथेति । किञ्च शक्त्यनङ्गीकारे कार्यार्थिभिर्नियतकारणोपादानं न स्यात् । तदङ्गीकारे तु यच्छक्तं तदेवोपादीयते नान्यदिति नियमसिद्धिरिति ।

तथा सङ्ख्याऽपि पृथक्तत्त्वान्तरम् । तथाहि–न (सा) द्रव्यम् । गुणादिषु वृत्तेः गन्धो द्विविधस्स्पर्शस्त्रिविध इति । तत्र वृत्तिरौपचारिकीति चेत्, न । मुख्ये बाधकाभावात् । गुणत्वमेव बाधकमिति चेत्, न । तस्यासिद्धेः । न गुणः । बहुषु वृत्तेः । घटत्वादिवत् । न कर्म । प्रत्यक्षत्वात् । तत्प्रतीति-वैलक्षण्याच्च । न सामान्यम् । अनित्यत्वात् । तस्मात्पृथक्तत्त्वान्तरम् ।

तथा सादृश्यमपि न द्रव्यम् । गुणकर्मणोरपि वृत्तेः । गन्धादयो हि परस्परसदृशाः प्रतिभान्ति । गन्धो गन्धान्तरेण, तथा रूपं, तथा क्रिया । अत एव न गुणकर्मणी । नापि सामान्यम् । अनुवृत्तप्रत्ययनिमित्तत्वाभावात् । ननु भूयोऽवयवसामान्यं सादृश्यमिति चेत्, न । प्रतीतिवैलक्षण्यात् । सादृश्यं हि सप्रतियोगिकमेव प्रतीयते 'अयमनेन सदृशः' इति । तत्तु तद्व्यञ्जकम् । तत्रैव सादृश्यप्रतीतेः । तस्मात्पृथक्तत्त्वान्तरम् ।

सर्वं प्रमेयजायं भोक्तृभोगायतनभोगसाधनभोग्यभुक्तिषु पञ्चसु कोशेषु परिसमाप्यते । आत्मा भोक्ता । भोगायतनं शरीरम् । भोगसाधनानीन्द्रियाणि । भोग्याश्चान्तरा बाह्या इति द्विविधाः । बाह्याः पृथिव्यादयः । आन्तरास्सुखादयः । भुक्तिस्सुखदुःखानुभवः ।

मोक्षोऽपि सकलदुःखोच्छेदरूपतया विलक्षणः पुरुषार्थः । तत्प्राप्तिस्तु 'आत्मा वाऽरे द्रष्टव्यश्श्रोतव्यो निदिध्यासितव्यः । तरति शोकमात्मवित् ।'

इत्यादिश्रुतिविहितादात्मज्ञानात् । विनश्वरविविधपुरूषार्थविरक्तस्सकल दुःखध्वंसकामः तदधिकारी । इतरस्तु कर्माधिकारी । तमधिकृत्यैव सर्वाणि कर्मशास्त्राणि प्रवर्तन्ते । मोक्षशास्त्राणि तु तदितरपुरुषमिति प्रमेयपरिज्ञान-मुभयथाऽपि सप्रयोजनम् ।।

इति श्रीरामानुजाचार्यविरचिते तन्त्ररहस्ये

प्रमेयपरिच्छेदः द्वितीयः ।।

शास्त्रपरिच्छेदः ।

इत्थं मानमेयमितयो निरूपिताः । अथ शाब्दं प्रमाणं निरूप्यते । सम्बन्धग्रहणवशेनार्थप्रत्यायकं पदजातं शाब्दम् । तदेव प्रत्यक्षाद्यसन्निकृष्टार्थं शास्त्रम् ।

तदुक्तम्—

'शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्' । इति । (शा.भा.१-१-५)

शब्दज्ञानसापेक्षादात्ममनस्सन्निकर्षादसन्निकृष्टार्थविषयं ज्ञानं तच्छास्त्रं नाम प्रमाणम् । प्रमाणान्तरसन्निकृष्टार्थविषयं तु लौकिकं वचनम् । तत्त्वनुमानरूपम् । अतो न शास्त्रम् । अनुमानरूपता तु वक्ष्यते । शब्दार्थयोस्तावत्प्रत्याय्यप्रत्यायकभावलक्षणस्सम्बन्धः । वाच्यवाचकभाव इति यावत् । स चापौरुषेयः ।

तदुक्तम्—

'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः । तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ।' इति ।

(जैमिनिसूत्र.१-१-५)

औत्पत्तिकः–स्वाभाविकोऽपौरुषेयो नित्य इत्यर्थः । वर्णानां नित्यत्वादर्थानां प्रवाहरूपेण नित्यत्वात्सम्बन्धस्यापौरुषेयत्वम् ।

ननु कथं वर्णा नित्याः । उच्चारणमात्रापवर्गिणः श्रूयन्ते । तथाहि—इदं तावदविवादम्–तत्तद्वर्णोच्चारणापेक्षया पुरुषप्रयत्नप्रेरितः कौष्ठ्यो वायुर्नाभिमण्डलदेशादुद्गच्छन्नुरः- कण्ठशिरोजिह्वामूलदन्तनासिकौष्ठप्रदेशेषु संयुक्तः श्रोतुश्श्रोत्रप्रदेशेन संयुज्यते । तदनु तत्रत्यस्स्तिमितवायुरपक्रामति । तदनन्तरं च वर्णा

उपलभ्यन्ते । तथा कर्णशष्कुल्यवच्छिन्नमाकाशमेव श्रोत्रम् । तद्गुणश्च शब्दः । तेन च समवायाद्गृह्यत इति ।

इदमिदानीं विचार्यते–किमुत्पादकः प्रयत्नः, उताभिव्यञ्जक इति । न तावदभिव्यञ्जकत्वम् । आवरणापनयनेन वा किंचिदभिव्यज्यते, इन्द्रियसंस्कारेण वा, विषयसंस्कारेण वा । न तावच्छ्रोत्रशब्दयोः कुड्यादिरावरणं सम्भवति । तत्समवायस्य यावत्प्रतिसम्बन्धिभावात् । इन्द्रियसंस्कारोऽपि कौष्ठ्येन वायुना तदाप्यायनं तत्संयोगमात्रं वा । द्वयमप्युत्पत्तिपक्षेऽप्यनुकूलम् । शब्दस्याकाशधर्मत्वात् । आकाशस्यैव श्रोत्रत्वात् । विषयसंस्कारोऽपि विषयधर्म एव । स च न सम्भवति । न हि कौष्ठ्यस्य वायोराकाशधर्मेण सम्बन्धः । कथञ्चित्सम्भवेऽप्युत्पत्तिपक्षसाधारण एव । परम्परया सम्बन्धस्याप्युत्पादकत्वदर्शनात् ।

किं च प्रयत्नस्याभिव्यञ्जकत्वे एकेनैव प्रयत्नेन सर्वशब्दाभिव्यक्तिप्रसक्तिः । समानेन्द्रियग्राह्याणां व्यञ्जकभेदानपेक्षत्वनियमात् । न हि प्रदीपादिव्यङ्ग्या घटादयः तन्नानात्वमपेक्षन्ते । प्रयत्नस्याभिव्यञ्जकत्वे तत्तारतम्यानुविधायिता च न स्यात् । मन्दे तस्मिन्मन्दस्तीव्रे च तीव्र इति । न हि प्रदीपादितारतम्ये तदभिव्यङ्ग्यतारतम्यं दृश्यते ।

किं चैक एव ककारादिस्तत्तद्वक्तृभेदान्नानाभूतश्च दृश्यते । तच्चोत्पत्तिपक्ष एव युक्तम् । अभिव्यक्तिपक्षे प्राच्यश्शब्दः प्रतीच्य इति व्यवहारो न स्यात् । उत्पत्तिपक्षे तूत्पादकदेशेन स्यात् ।

ततश्चैवं प्रयोगः–अनित्यश्शब्दः, अनभिव्यञ्जकप्रयत्नान्तरीयकत्वात्, घटवदिति । तस्मात्ताल्वादिस्थानैस्तत्तत्प्रयत्नसंयोगादुत्पन्नः शब्दः शब्दान्तरारम्भक्रमेण श्रोत्रदेशे शब्दमारभते । स तावच्छ्रोत्रसमवायाच्छ्रूयत इत्यु(ति यु)क्तम् ।

अत्रोच्यते–वर्णात्मकेषु शब्देषु सर्वत्र 'स एवायं गकारः, तदेवेदं पदम्' इति प्रत्यभिज्ञा तावद्दृश्यते । न सा सादृश्याद्भेदाग्रहनिबन्धना । नेदमिति बाधादर्शनात् । ज्वालाप्रत्यभिज्ञायां तु भेदस्सिद्ध एव । तत्कारणसम्भवात् ।

तथाहि–ज्वाला तावदवयविद्रव्यम् । तस्याश्च प्रभा गृहोदरव्यापिनी । न हि प्रथमप्ररोपितज्वालाया विशरणमन्तरेण प्रभाप्रचारः सम्भवति । तस्मात्प्रथम-प्ररोपिता नष्टा । द्वितीया त्वन्यादृशीति तत्र सादृश्यनिबन्धनस्तद्ग्रहः । अत्र तु युक्तिमुखेनापि न तादृशी बाधा दृश्यते । अतस्स्पष्टे तद्ग्रहे तत्तद्वर्णगोचरस्य प्रयत्नस्य व्यञ्जकत्वमेव युक्तम् ।

परकीयमनुमानं च विशेषणासिद्धम् । कौष्ठ्यस्य वायोः श्रोत्रप्रदेशसंयोग एव संस्कारः । स्तिमितवाय्वपगमस्तु नान्तरीयकः तत्सहकारी वा । ततश्च तत्संस्कृतं श्रोत्रं शब्दं गृह्णाति । गतिमत्त्वाच्च वायोः तत्संयोगविरामे शब्दोपलम्भविच्छेदः । प्रतिवर्णं व्यञ्जकभेदाच्च न सर्वशब्दोपलम्भप्रसक्तिः । उत्पत्तिपक्षेऽपि कारकभेदोऽङ्गीकृत एव । स एवास्माकं व्यञ्जकभेदः ।

ततश्चैवं प्रयोगः—शब्दः प्रयत्नाभिव्यङ्ग्यः, तदनुत्पाद्यत्वे सति तदनन्तर-मुपलब्धेः । यो यदनुत्पाद्यत्वे सति यदनन्तरमुपलभ्यते स तदभिव्यङ्ग्यः । यथा प्रदीपानन्तरमुपलभ्यमानो घटः । न चात्र विशेषणासिद्धिः । तद्ग्रहणबलेन व्यञ्जकत्वसिद्धेः ।

योऽप्ययं तर्कः—यदि वर्णाः प्रयत्नाभिव्यङ्ग्यास्स्युः, तर्हि प्रयत्नभेदानपेक्षिण-स्स्युः । समानेन्द्रियग्राह्याणां प्रयत्नभेदानपेक्षित्वनियमात् । अपेक्ष्यते च भेदः । तस्मात्तदभिव्यङ्ग्या न स्युरिति । सोऽपि प्रशिथिलमूल एव । शुक्लनीलादिरूपेषु समानेन्द्रियग्राह्येषु स्फुटस्फुटालोकव्यङ्ग्यत्वदर्शनात् । तथाऽल्पेनैव लालाजलेन शर्करामाधुर्यमभिव्यज्यते । सक्तुपृथुकयोस्तु अनल्पेन । तथा कुङ्कुमगन्धो

13.

गोघृतेनैव । मुस्तागन्धस्तु तैलेन । निदाघसमयनिर्दग्धपृथिवीगन्धस्तु जलेनैवेनि । तीव्रमन्दादितारतम्यमपि प्रयत्नस्याभिव्यञ्जकत्वेऽपि तत्तारतम्याद्युज्यते । प्रदीपप्रकाशतारतम्याद्रूपोपलब्धितारतम्यवत् । तथैकस्यैव वर्णस्य तत्तद्वक्तृभेदेन नानाभावोपलब्धिरपि तत्तद्वक्तृसमुत्थस्य परस्परनिरपेक्षस्य प्रत्येकं विलक्षणं श्रोत्रसंस्कारमारभमाणस्याभिव्यञ्जकस्य कौष्ठ्यस्य वायोर्नानात्वादुपपन्ना । प्रत्यभिज्ञाबलेन स्थायित्वस्य तदैक्यस्य चोपपादितत्वात् । तिमिरभिन्ना-भिर्नेत्रवृत्तिभिश्च चन्द्रे नानात्वोपलब्धिवत् । प्राच्यादिव्यपदेशोऽपि व्यञ्जकवक्तृदे-शापेक्षयोपपन्नः । ह्रस्वदीर्घप्लुतप्रतीतिरपि अभिव्यञ्जक-वृद्धिह्रासप्रयुक्ता । अनुवातं दूरे शब्दोपलब्धिः । प्रतिवातं तदनुपलब्धिरपि व्यञ्जकपक्ष एवोपपन्ना । ताभ्यां दूरं कौष्ठ्यवायुप्रेरणात्तन्निरोधाच्च ।

ननु शब्दे प्रत्यभिज्ञा न सम्भवति । तदभिव्यक्तेः क्षणिकत्वात् । तथाहि–स्फटिकादौ प्रथमप्रतीते तदनु संस्कारोद्भेदे तत्सहकृतं चक्षुस्तदनन्तरं 'स एवायम्' इति गृह्णाति । इह तु वर्णाभिव्यक्तिः क्षणिका । तया च संस्कारोद्बोधे श्रोत्रनित्यत्वेऽपि व्यञ्जकव्यापारोपरमात्पश्चात्प्रत्यभिज्ञा नोदेतुमर्हतीति ।

उच्यते—कार्यानुरोधेन हि कारणकल्पना । अत्र तु नाभिव्यक्तिस्संस्का-रोद्बोधिका । किन्त्वदृष्टादिकारणवशात्तदुद्बोधे सति प्रथमाभिव्यक्तिरेव प्रत्यभिज्ञानरूपा परिणमते । यथा—महान्धकारे क्षणिकसमुन्मेषिसौदामिनी-सम्पातमात्राच्चिरपरिचिते वस्तुनि प्रथमत एव प्रत्यभिज्ञा जन्यते । तस्माद्वर्णा नित्याः । एतच्च सर्वं **न्यायशुद्धौ** प्रपञ्चितम् ।

इत्थं वर्णानां नित्यत्वात् अर्थस्य च प्रवाहरूपेण नित्यत्वात्तत्सम्बन्धस्याना-दितया अपौरुषेयत्वम् । तथाहि–इदानीन्तनवृद्धव्यवहारे हीदानीन्तनव्युत्पित्सूनां शक्तिग्रहः । तथा पूर्वव्युत्पित्सूनां पूर्ववृद्धव्यवहारे । तथा पूर्वतराणां पूर्वतरे

इत्यनिदम्प्रथमे संस्का(संसा)रमण्डले शब्दार्थपरम्पराया अनादित्वात्तत्सम्बन्धस्याप्यनादित्वम् ।

किं च शब्दानित्यत्वे व्युत्पत्तिरेव न स्यात् । वृद्धव्यवहारे हि शक्तिग्रहः । स च भूयोभूयः प्रयोगदर्शने स्यात् । वर्णानां तत्तत्पदस्यार्थपरिहारेण स्वस्वार्थावधारणशक्तिरावापोद्वापाभ्यां भूयोभूयः प्रयोगदर्शनादिना । न ह्युच्चारणमात्रापवर्गिणः शब्दस्य पुनः पुनः प्रयोगदर्शनं सम्भवति । तच्च शब्दनित्यत्वे स्यात् इति तन्नित्यत्वप्रसाधनं व्युत्पत्त्यर्थतयापि सप्रयोजनं स्यात् ।

अयं मनोरथः यदि संस्का(संसा)रस्यानादिता स्यात् । तत्तु(सा तु) न सिद्ध्यति । तथाहि—कृत्स्नकार्यकलापे युगपदुपसंहृते सति सर्गादावादिसर्वज्ञस्सर्वशक्तिस्सर्वेश्वरः पुरुषोत्तमः कृपावान् सर्गव्यवहारसमर्थानयोनिजान् पुरुषविशेषान्मनसा निर्माय भोग्यभोगोपकरणभोगस्थानप्रविभक्तं भूतभौतिकसङ्घातं च सृष्ट्वा तेषु तेष्वर्थेषु 'अस्य शब्दस्यायमर्थः' इति सङ्केत्य वेदानप्याविष्कृत्य तेभ्यः पुरुषेभ्यस्समुपदिदेशेति सकलप्रमाणसिद्धम् । तस्मात्सम्बन्धः पोरुषेय इति ।

नैतत्सारम्–स्यातां नाम क्रमेण कार्यवर्गस्य सृष्टिविनाशौ । यौगपद्ये तु प्रमाणं न पश्यामः । वैपरीत्ये तु 'विमतः कालो न कृत्स्नकार्यध्वंसवान्, कालत्वात्, सम्प्रतिपन्नकालवत्' इति यद्वा 'विमतो घटध्वंसः सर्वदा घटान्तरसमानकालीनः ध्वंसत्वात्, ध्वंसान्तरवत् ।'

किञ्च कृत्स्नकार्यध्वंसे सर्वात्मगतादृष्टध्वंसात् पुनस्सृष्टिवैषम्यं न स्यात् । "इदं वा अग्रे नैव किञ्चनासीत् । न द्यौरासीत् । न पृथिवी नान्तरिक्षम् ।" तथा "सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम् । तत्सृष्ट्वा तदेवानुप्राविशत् ।" इत्यादिवाक्यानि त्वर्थवादतया विधिशेषभूतानि । न तु

स्वातन्त्र्येणार्थप्रतिपादनसमर्थानि । कृत्स्नस्यापि वेदस्य अनुष्ठेयार्थतात्पर्यात् । तच्च व्युत्पत्तिसिद्धमिति वक्ष्यते ।

तथा सर्वज्ञपुरुषसद्भावे च 'क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवत्,' इत्यनुमानं न प्रमाणम् । कार्यत्वस्य शरीरिकर्तृकत्वेन व्याप्तेः । शरीरिणश्च सार्वज्ञ्यासम्भवात् । अशरीरिणश्च करणाधिष्ठानाशक्तेः कर्तृत्वासम्भवात् । इदानीन्तनपुरुषपरम्परायाश्च योनिजत्वदर्शनेन अयोनिजपुरुषसद्भावोऽप्यसम्भावित एवेति मीमांसकानामभिमानः । एतत्सर्वं **विमलाञ्जननाम्नि** प्रकरणेऽभिहितम् ।

ननु देवदत्तादिपदेषु सङ्केतनिबन्धनार्थप्रतीतिदर्शनाद्गवादिपदेष्वपि तथा स्यात् । ततश्चापौरुषेयत्वमसिद्धमिति चेत् मैवम् । अत्र सङ्केतस्य प्रत्यक्षसिद्धत्वात् । अन्यत्र वृद्धव्यवहारादेव व्युत्पत्तेस्तदभावात् । ननु देवदत्तादिपदेष्वपि कदाचित्सङ्केतादर्थप्रतीतिर्दृश्यत इति चेत्, न । अनियतो हि तत्र सङ्केतः । व्युत्पत्तिस्तु नियता । तस्मादेकत्र शक्तिग्रहनिबन्धनं वाचकत्वम्, अन्यत्र तु कदाचिद्व्यवहारतो वाचकत्वग्रहेऽपि सङ्केतनिबन्धनम् । वाचकत्वप्रतीतिस्तु भेदाग्रहात् । सङ्केतात्पूर्वं गवादिपदवद्वाचकत्वाप्रतीतिः ।

ननु सम्बन्धस्यापौरुषेयत्वे प्रथमश्रुताच्छब्दादविशेषेण सर्वेषामर्थप्रतीतिस्स्यात् । न स्यात् । व्युत्पत्तेरपि हेतुत्वात् । तस्माद्वर्णा नित्याः सबन्धश्चापौरुषेय इति स्थितम् । तद्ग्रहणं च वाचकत्वशक्तिग्रहात् । स च वृद्धव्यवहारादिति वक्ष्यते ।

ननु कथं पदेभ्यः पदार्थप्रतीतिः वाक्यार्थप्रतीतिर्वा । तत्र शब्दतत्त्वविदो वैयाकरणाः प्राहुः—क्रमिकैराशुतरतिरोहितैर्वर्णैः प्रत्येकं यौगपद्येन च पदार्थप्रतीतेर्वाक्यार्थप्रतीतेश्चासम्भवात्तत्तद्वर्णाभिव्यङ्ग्यं प्रत्यस्तमितवर्णविभागं

पदवाक्यशब्दवाच्यं स्फोटाख्यं शब्दतत्त्वं तन्मूलमेषितव्यम् । तथाहि—न चैकैकवर्णग्रहणेऽर्थप्रतीतिः अतिप्रसङ्गात् । न च युगपद्ग्रहणम् । आशुतरतिरोधानात् । ततो नियतक्रमैः कतिपयैर्वर्णैः पदाभिव्यक्तिः । तथा तादृशैरनेकैर्वर्णैर्वाक्याभिव्यक्तिः । तत एव पदार्थवाक्यार्थविभागश्चोपपन्न इति ।

अपरे तु प्रत्यस्तामितपदवाक्यविभागमखण्डं शब्दत्वमेकमेव । तत्र पदवाक्यविभागस्तु काल्पनिक इति प्रतिपन्नाः । तच्चातीन्द्रियमर्थप्रतीत्यनुपपत्तिकल्प्यमित्येके । अपरे तु श्रोत्रग्राह्यमिति ।

पूर्वत्र वास्तवपदपदार्थव्युत्पत्तिर्वास्तववाक्यार्थव्युत्पत्तिश्च सहकारिणी । उत्तरत्र काल्पनिकी पदतदर्थवाक्यतदर्थव्युत्पत्तिः । अन्यथा सर्वाविशेषेणार्थप्रतीतिप्रसङ्गात् ।

किं च ''वन–नव–नदी–दीन'' इत्यादिषु वर्णाभेदेऽपि पदान्यत्वं प्रतीयते । ततस्तदतिरिक्तं पदम् । न च वाच्यं वर्णा एव पदम् । नदीदीनेत्यादिषु क्रमभेदेन पदभेदबुद्धिरिति । तेषां सर्वगतत्वनित्यत्वाभ्यां देशकालक्रमासम्भवात् । किं चानेकेषु वर्णेषु एकं पदमेकं वाक्यमिति व्यपदेशोऽपि वर्णान्यत्वे प्रमाणम् । किं च वर्णानां वाचकत्वे क्रमभेदे वक्तृभेदे विलम्बोच्चारणे चार्थप्रत्ययस्स्यादिति ।

नैतत्सारम्–यत्नेनान्वेषणेऽपि नानावर्णव्यतिरेकेण निर्भागशब्दतत्त्वानुपलम्भात् । यस्त्वेकं पदमेकं वाक्यमिति व्यपदेशः सोऽप्यनेकेषु अर्थैक्योपाधिनिबन्धनः । दृश्यते हि बहूनामप्यौपाधिकमेकत्वम् । यथा 'सेना वनं राजसूयः' इति । अत एवार्थैकत्वमजानतां नास्त्येकत्वपरामर्शः । यदि ह्यनौपाधिकं शब्दतत्त्वं स्यात्तर्हि संहितापाठमात्रेण व्युत्पन्नानामितरेषां च प्रकाशेत । ननु व्युत्पत्तिरपि सहकारिणीति नातिप्रसङ्ग इति चेत्, हन्त स्वानुभवविसंवादः । न हि व्युत्पन्नः पुमानेभिर्वर्णैरिदं शब्दतत्त्वमभिव्यज्यत इति प्रत्येति ।

किं च यावद्भिर्वर्णैश्शब्दतत्त्वमभिव्यक्तं प्रतिनियतार्थप्रत्यायकं तावतामेव वाचकत्वसम्भवेऽतिरिक्तकल्पनं गौरवपराहतम् । नदीदीनेत्यादिष्वपि बुद्धिभेदः क्रमभेदनिबन्धनः । तथाहि–उच्चारणक्रमानुरोधात्प्रतिवर्णाभिव्यक्ति भिन्ना एव बुद्धयो जायन्ते । प्रतिवर्णोपलम्भप्रभावितभावनाख्यसंस्कारक्रमवशाच्च विलक्षणाः स्मृतयः । तत्क्रमाद्वर्णा अपि क्रमवन्त इव भान्ति । तस्मादेकवक्त्रोच्चारणापादितनैरन्तर्या आनुपूर्वीविशेषशालिनस्स्वरविशेषभाजो वर्णा एव पदम् । तत एवार्थप्रत्ययः । न युगपद्ग्रहणासम्भवः । क्रमेण श्रुतानामपि तेषां तेनैव क्रमेण पश्चात्स्मृतिविषयत्वसम्भवात् । दृश्यते हि क्रमानुभूतेष्वपि युगपदनुसन्धानं 'पञ्च प्रयाजा मयाऽनुष्ठिताः । गोदावर्यां महानद्यां शतवारं स्नातोऽहम्' इति च । अयमर्थस्स्वसिद्धान्तोपन्याससमये प्रपञ्चयिष्यते ।

अतीन्द्रियशब्दकल्पनमप्यनुपपन्नम् । अर्थप्रतीतेरन्यथासिद्धत्वात् । अतिप्रसङ्गश्च । तस्य नित्यत्वे सर्वार्थप्रतीतिप्रसङ्गात् । अनित्यत्वे च तत्कारणं दुर्निरूपम् । वर्णानां च कारणत्वे तदुत्पत्तिर्व्यर्था । उक्तेन मार्गेण तैरेवार्थप्रतीत्युपपत्तेः । अभिव्यञ्जकत्वे तु प्रत्यक्षत्वापातः । किं च वृद्धव्यवहारे आवापोद्वापाभ्यां हि शक्तिग्रहाद्व्युत्पत्तिः । ततश्च यस्य पदस्य आवापे यस्यार्थभागस्यावापः यदुद्वापे चोद्वापः तत्रैव तस्य व्युत्पत्तिरुक्ता । अखण्डशब्दतत्त्ववादे कस्य कुत्र व्युत्पत्तिः । ननु तत्रापि पदविभागं परिकल्प्य तत्र तस्य व्युत्पत्तिरिति चेत्, न । प्रतिपत्तिगौरवात् । नियतक्रमा वर्णा एव हि पदमित्युक्तम् । किं चानेनैव न्यायेन वाक्यार्थप्रतीत्युपपत्तौ तत्र वाक्यं परिकल्प्य तत्र तस्य व्युत्पत्तिर्वक्तव्या । तत्रापि भूयान् प्रतिपत्तौ गौरवक्लेश इति प्रत्यक्षतोऽनुमानतो वा न वर्णातिरिक्तशब्दतत्त्वसम्भव इति ।

अपरे तु वर्णानां प्रत्येकं वाचकत्वेऽतिप्रसङ्गात् आशुतरविनाशित्वेन युगपद्ग्रहणाभावाच्च पूर्वपूर्ववर्णानुभवजनितसंस्कारसचिवोऽन्त्यो वर्णः पदार्थवाचकः । तथा पूर्वपदार्थानुभवजनितसंस्कारसचिवमन्त्यं पदं वाक्यार्थवाचकम् । अत्रापि वास्तवपदपदार्थव्युत्पत्तिस्सहकारिणीति प्रतिपेदिरे । अयं च संस्कारस्स्मृतिहेतोस्संस्काराद्विलक्षणः । तस्य च स्मृतिहेतुत्वात् अस्य चानुभवनिमित्तत्वात् इति । तदप्यनुपपन्नम् । उक्तेन न्यायेनार्थप्रतीतेरन्यथा-सिद्धत्वात् युगपद्ग्रहणस्योपपादितत्वाच्च । अत्र यद्यपि पदपदार्थविभागो वास्तवः, तथापि व्युत्पत्तिर्यत्नोपपाद्या । अन्त्यवर्णस्य पदत्वाभावात् । तथा वाक्यार्थव्युत्प-त्तिरपि । अन्त्यपदस्य वाक्यत्वाभावात् । पक्षद्वयेऽप्युभयोरनियतत्वाच्च ।

अत्र नव्यास्तु पदैरभिहिताः स्वार्थाः स्मारिता वा पदार्था आकाङ्क्षादियुक्ता वाक्यार्थं गमयन्तीति । तदप्यनुपपन्नम् । शक्तिकल्पनागौरवात् । तथाहि– अभिधानपक्षे पदानां स्वस्वार्थाभिधानशक्तिः पदार्थानां वाक्यार्थबोधनशक्तिः । तथा शब्दादन्यतः प्रमाणात्प्रतीतानां पदार्थानां वाक्यार्थबोधकत्वादर्शनात्प्रति-पादितानां च तद्दर्शनात्पदानि पदार्थेषु वाक्यार्थबोधनशक्तिमादधति । तेषां तदुत्पादनशक्तिरपरेति । ननु प्रमाणान्तरप्रतिपन्नानामपि संसर्गबोधनसामर्थ्यं दृश्यते । तथाहि–येन नाम प्रत्यक्षेणाज्ञाताश्रयं श्वैत्यं प्रतिपन्नं हेषारवेणाज्ञात-रूपोऽश्वोऽनुमितः खुरपुटनिष्पेषशब्देन चाज्ञातकर्तृकं गमनमनुमितं तस्य श्वेतोऽश्वो धावतीति संसर्गबोधो दृश्यते । तदुक्तम्—

'पश्यतः श्वेतिमारूपं हेषाशब्दं च शृण्वतः ।
खुरनिष्पेषशब्दं च श्वेतोऽश्वो धावतीति धीः ।।
दृष्टा वाक्यविनिर्मुक्ता–' इति ।। (श्लो.वा.७.३५८)

आरूपमव्यक्तरूपम् । अव्यक्ताश्रयमिति यावत् ।

मैवम्—तादृशस्य पुंसस्संसर्गप्रतीतिरेव नोदेति । किं तु श्वेतं किंचिद्वस्तु दृश्यते । अश्वेन भाव्यं गच्छताऽन्येन केन चिदित्येतावन्मात्रम् । अथाभ्यास-पाटवात्पदनिष्पेषशब्दमश्वसम्वन्धिनमवगच्छति । तदाऽनुमानादेव धावत्यश्व इति धीः । अथ श्वैत्यस्य अनुमिताश्वाश्रयत्वमध्यवस्यति तदाप्यश्वादन्यत्र न सम्भावितमिति परिशेषादेव श्वेतोऽश्व इति धीः । तथा श्वैत्यस्यानुमिताश्रयस्य च धावनसमानाश्रयत्वमनुमिनोति चेत्, श्वेतोऽश्वो धावतीति धीः । धीः अन्यथा नेति यत्किंचिदेतत् ।

अपि च यद्यत्र पदार्थावगमादेव परस्परान्वयावगमः, तदा तस्य कस्मिन् प्रमाणेऽन्तर्भावः । न शब्दे । तत्प्रयोगाभावात् । प्रमाणान्तराभ्युपगमे तु शव्दस्योच्छेदः । तस्मात्पदप्रतिपादितानां पदार्थानामन्यत्रादृष्टं वाक्यार्थबोधन-सामर्थ्यं कल्पनीयम् । पदानामपि तदाधानशक्तिरिति शक्तित्रयकल्पनागौरवम् ।

ननु पदार्थानां संसर्गबोधनशक्तिस्वीकारे खलु गौरवम् । अनन्वितावस्थोऽ-भिहितोऽन्वितावस्थां लक्षयति । अवस्थावस्थावतोर्हि सम्बन्धस्तावदस्त्येव ।

तदाहुर्वार्त्तिककारपादाः–

वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैव हि लक्ष्यते । इति । (बृहट्टीका?)

तदयुक्तमित्यन्ये । नेयं लक्षणा । स्वार्थापरित्यागात् । तत्परित्यागेन हि गङ्गादिषु लक्षणा दृष्टेति । ते हि मीमांसाभ्यासवैकल्येनैवमाहुः । न हि सर्वत्र लक्षणायां स्वार्थस्त्यज्यते । तथाहि—लोके 'छत्रिणो गच्छन्ति' इति छत्रिशब्देन छत्र्यच्छत्रिसमुदायो लक्ष्यते । छत्रिशब्दार्थश्च न त्यज्यते । तथा वेदेऽपि चातुर्मास्येषु 'वैश्वदेवेन यजेत' इति वैश्वदेवशब्देन वैश्वदेवावैश्वदेवगणो लक्ष्यते । स्वार्थश्च न त्यज्यते । अत एव जहदजहल्लक्षणेति तद्द्वैविध्यं परैरङ्गीकृतम् ।

अतोऽन्यथा दूषणमुच्यते । वाच्यस्य गङ्गाशब्दार्थस्य वाक्यार्थेऽनन्वयात्खलु लक्षणा । गामानयेत्यादौ तु गोपदार्थस्यान्वयादयुक्तैव सा । किं च वाक्यार्थमात्रस्य लक्ष्यत्वमनुपपन्नम् । सम्बन्धानुपपत्तिपरामर्शमन्तरेण पदार्थवदेव झटिति प्रतीतेः ।

ननु तर्हि स्मारकत्वपक्षे न गौरवम् । पदस्मारिताः पदार्थाः वाक्यार्थं गमयेयुः । तथाहि—पदश्रवणे व्युत्पत्तिदशायां प्रतिसम्बन्धितयाऽनुभूताः पदार्थाः स्मर्यन्ते । अस्ति च सम्बन्ध्यन्तरदर्शने सम्बन्ध्यन्तरस्मरणम् । तदुक्तम्—

पदमभ्यधिकाभावात्स्मारकान्न विशिष्यते । इति ।। (श्लो.वा.शब्द.१०७)

अभ्यधिकाभावात्—स्मारकत्वातिरिक्ताभिधायकत्वाभावादिति ।

तदयुक्तम् । वाक्यार्थस्याशाब्दत्वप्रसङ्गात् । वाक्यार्थोऽपि पदार्थलक्ष्यः । न तु शक्त्याभिधीयत इति । ननु यथा पदैः पदार्थाः स्मर्यन्ते तथा तैरपि पदानि । सम्बन्धस्याविशेषात् । ततश्च स्मृतैः पदैरन्वयो बोध्यत इति शाब्दत्वमिति चेन्मैवम्—प्रथमं वाचकश्रवणं, तदनु वाच्यस्मरणम्, पुनरपि वाचकस्मरणं, तैस्तत्स्मरणमित्यव्यवस्थाप्रसङ्गात् ।

प्राभाकरास्तु–पदान्येव वाक्यम् । पदार्थ एव वाक्यार्थः । तत्र पदान्येव प्रमाणम् । अर्थान्तरान्वितस्वार्थे पदानां व्युत्पत्तेरित्याहुः । तथाहि—इत्थं तावत्प्रथमं लोके व्युत्पत्तिप्रकारः,–उत्तमवृद्धस्तावत् 'देवदत्त गामानय' इति वाक्यं प्रयुङ्क्ते । तदनु मध्यमवृद्धः प्रवर्तते । तदानीं तटस्थो व्युत्पित्सुरेवं मन्यते—अस्य प्रवृत्तिर्ज्ञानपूर्विका, प्रवृत्तित्वात्, मदीयप्रवृत्तिवत् । तच्च ज्ञानं वाक्यजन्यं, तदनन्तरभावित्वादिति । इत्थं भूयोभूयः प्रयोगदर्शनेन प्रथमं तावद्वाक्यस्य वाक्यार्थे सम्मुग्धा व्युत्पत्तिर्जायते अस्य वाक्यस्य गवानयनमर्थ इति । पश्चात्कदाचित् 'अश्वमानय' इति वाक्यप्रयोगे तथैव प्रवृत्तौ अश्वपदावापे

तदर्थान्वयाद्गोपदोद्वापे तदर्थानन्वयादावापोद्वापाभ्यामश्वपदस्यार्थान्तरान्विते हयार्थे गोपदस्य च तादृशे सास्नादिमदर्थे प्रत्येकं व्युत्पत्तिर्जायते । इत्थं भूयोभूयः प्रयोगदर्शनाद्व्युत्पन्नस्य पुंसः पूर्वं ततश्शब्दार्थमप्रतियतः पुनरेषा विचिकित्सा जायते, यदि प्रत्यायकस्ततो ममापि पूर्वमेव प्रत्याययेत् । अथाप्रत्यायकस्ततो वृद्धमपि न प्रत्याययेदिति । एवं विचिकित्सतः पुनरेषा विचिकित्सा जायते— नूनमस्ति कश्चिद्वृद्धस्य विशेषः, यतोऽयमवबुध्यतेऽहं तु नेति । कोऽसौ विशेष इति निर्णयमिच्छतः पुनर्वृद्धव्यवहारे तेभ्यश्शब्देभ्यस्स्वयमर्थावगमात् प्रत्यायकत्वमेव विशेषः । स च वाचकत्वशक्तिग्रहाधीनः । तद्ग्रहश्च वृद्धव्यवहारे । स च ममेतः पूर्वं नासीत् वृद्धस्य त्वासीदिति निर्धारणा जायते । इत्थं ममेव पूर्ववृद्धस्य तत्पूर्ववृद्धपरम्परायाश्चेत्यनादित्वादपौरुषेयत्वेन स्वाभाविकत्वमपि शब्दार्थसम्बन्धस्यावसीयते । तस्माच्छब्दानां प्रत्यायकत्वं स्वाभाविकम् । तच्च व्युत्पत्त्यपेक्षम् । न पुनस्संकेतकृतम् । सा च शक्तिग्रहाधीना । तद्ग्रहश्च प्रयोज्यवृद्धव्यवहारे । स च विशिष्टार्थज्ञानमूलः । तच्च ज्ञानं वाचकशक्तिमूलमिति विशिष्टविषयैव शक्तिरुन्नीयते । आवापोद्वापौ चान्वितगोचरौ । ततश्च गामानयेत्युक्ते गोपदमानयेत्यन्वितस्वार्थबोधकम् । एवमानयेति पदमपि । ततश्चान्विते शक्तिग्रहादन्विताभिधायित्वं पदानां सिद्धम् । तथा मध्यमवृद्धप्रवृत्तेः कार्यज्ञानपूर्वकत्वात्तस्य च शब्दमूलत्वात् सर्वेषामपि पदानां कार्यपरत्वमवगन्तव्यम् । तच्चावापोद्वापाभ्यां साक्षाल्लिङादिप्रत्ययस्य । इतरेषां तु परम्परया । प्रकृत्यंशस्येव प्रत्ययांशस्यापि ताभ्यां शक्तिग्रहात् । एतच्चोपरिष्टात्स्पष्टीभविष्यति ।

नन्वन्विताभिधानं न सिध्यति । प्रतियोगिनामानन्त्येन तदन्विते शक्तिग्रहा-सम्भवात् । सामान्येनान्विताभिधानं च नाशङ्कनीयम् । वाक्येभ्यो

विशेषान्वयावगमात् । तथापि स्वरूपमात्राभिधानेनापि वाक्यार्थप्रतीत्युपपत्तौ अन्विताभिधानाश्रयणे शक्तिकल्पनागौरवाच्च ।

किं पदान्तराभिहितेनान्विताभिधानमनभिहितेन वा । प्रथमे तदपि पदमन्विततया प्रथमपदाभिहितमर्थमपेक्षते । तदपि पदं द्वितीयपदाभिहितमिति परस्पराश्रयः । द्वितीये पदान्तरप्रयोगवैयर्थ्यम् । एकस्माच्च पदात्सर्वान्वयप्रतीति-प्रसङ्गश्चेति ।

मैवम्–आकाङ्क्षादित्रयस्योपलक्षणत्वात् । आकाङ्क्षितं सन्निहितं योग्यं यदर्थान्तरं तदन्विते शक्तिग्रहणात् । का पुनरियामाकाङ्क्षा । प्रतिपत्तुर्जिज्ञासा । सा किन्निबन्धना । अविनाभावनिबन्धनेति केचित् । तथाहि—क्रिया कारकाविनाभाविनी । तां श्रुतवतः कारकजिज्ञासा स्यात् । एवं कारकमपीति । तद्युक्तम् । जिज्ञासाविरमानुपपत्तेः । उभयाविनाभाविनां पदार्थानामानन्त्यात् । अतोऽन्यदेव निबन्धनम् । अभिधानापर्यवसानमभिधेयापर्यवसानं च ।

'द्वारम्'इत्यादावेकपदप्रयोगे प्रतिसम्बन्ध्यनुपादानेनान्विताभिधानापर्य-वसानात्प्रतियोगिजिज्ञासायां संव्रियतामित्यनेनान्विताभिधानम् । यत्राप्यनेकपद-प्रयोगेऽभिहितोऽर्थो न पर्यवस्यति—यथा 'दिवा अभुञ्जानो देवदत्तः पीनः ।' इति तत्र रात्रिभोजनजिज्ञासायां 'रात्रौ भुङ्क्ते' इत्यनेनान्विताभिधानम् । तथा 'विश्वजिता यजेत' 'अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति, इति वाक्यद्वये नियोज्याकाङ्क्षायां स्वर्गकामपदेनान्विताभिधानम् । नियोज्यजिज्ञासाप्रकारस्तु उपरिष्टाद्वक्ष्यते ।

नन्वेवं 'गामानय शुक्लां दण्डेन' 'रक्तः पटो भवति' इत्यत्र शुक्लरक्तपदा-भ्यामन्विताभिधानं न स्यात् । ताभ्यां विनाऽपि वाक्यपर्यवसानात् । सत्यं तदप्रयोगे । तत्प्रयोगे तु समभिव्याहृतसर्वपदानां सम्भूयकारित्वव्युत्पत्ते-रेकवाक्यताबलात्तद्विषयामाकाङ्क्षामुत्थाप्य ताभ्यमान्विताभिधानम् ।

तदुक्तं भाष्ये—'भवति तु रक्तं प्रत्याकाङ्क्षा' (शा.भा. १-२-१७) इति । अयं तु विशेषः—द्वारमित्यादावाकाङ्क्षावशात्सन्निधिः कल्प्यते । अत्र तु सन्निधिवशादाकाङ्क्षा इति । अत एवोत्थापिताकाङ्क्षा स्वारसिकाकाङ्क्षा इत्याकाङ्क्षाद्वैविध्यमाहुः ।

ननु सन्निधियोग्यत्वे द्वे एव व्युत्पत्तावुपलक्षणं स्याताम् । किमाकाङ्क्षया । मैवम् । तयोस्सतोरप्याकाङ्क्षाविरहेणान्वयादर्शनात् । यथा 'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इत्यत्र राजपुरुषयोः पुत्रापसर्पणनिराकाङ्क्षयोर्न परस्परान्वय इति । सा च प्रतियोगिषु सर्वेषु न युगपद्भवति । किं तु प्रधानोपसर्जनभावेनान्वयार्हतत्तदर्थयोग्यताक्रमेण । तथा हि– 'गामानय शुक्लां दण्डेन' इत्यत्र प्रथमं कर्मविषया पश्चात्तद्विशेषणविषया तदनु करणविषया । एवं 'स्वर्गकामो यजेत' इत्यत्रापि आकाङ्क्षाक्रमेणान्वयो वक्तव्यः । क्रमनियमे च लौकिकानां प्रतिपत्तिरेव प्रमाणम् ।

तदुक्तं वाक्यार्थमातृकायाम्—

अन्वितस्याभिधानार्थमुक्तार्थघटनाय वा ।
प्रतियोगिनि जिज्ञासा या साऽऽकाङ्क्षेति गीयते ।।

परिपूर्णेन योग्यस्य समीपस्याप्यनन्वयात् ।
व्युत्पत्तौ तेन शब्दानामाकाङ्क्षाऽप्युपलक्षणम् ।।

जिज्ञासा जायते बोद्धुस्सम्बन्धिषु यथा यथा ।
तथा तथैव शब्दानामन्विताार्थाभिधायिता ।। इति ।। (प्रकरण.प.लुप्तः)

अथ कस्सन्निधिः । यस्यार्थस्य श्रवणानन्तरमाकाङ्क्षायोग्यताभ्यामर्थान्तरे परिवृत्तिः । सा च न केवलं शब्दनिबन्धना । अध्याहृतेनाप्यन्विताभि-

धानदर्शनात् । ननु तत्रापि शब्द एवाध्याह्रियते । स चार्थमुपस्थापयतीति चेत् । न । अन्विताभिधानानुपपत्तिवशात्खल्वध्याहारः । सा च योग्यप्रतियोग्यर्थोपस्थापनेन शान्तेति न शब्दकल्पनायां प्रमाणम् । एतच्चार्थापत्तिप्रकरणेऽभिहितम् । अतश्शब्दोपस्थितेनाध्याहृतेन वाऽन्विताभिधानम् । आकाङ्क्षावत्सन्निधिरपि क्रमेणैव भवति । तदुक्तम्—

सन्निधिश्शब्दजन्मैव व्युत्पत्तौ नोपलक्षणम् ।
अध्याहृतेनाप्यर्थेन लोके सम्बन्धदर्शनात् ।।

सहसैव न सर्वेषां सन्निधिः प्रतियोगिनाम् ।
सन्निधापकसामग्रीक्रमेण क्रमवानसौ ।।

यथा यथा सन्निधानं जायते प्रतियोगिनाम् ।
तथा तथा क्रमेणैव शब्दैरन्वितबोधनम् ।।

(प्रक.प.वाक्यार्थमातृका?)

अत्राकाङ्क्षायोग्यत्वे सन्निधिनिबन्धने । अनाकाङ्क्षितस्यायोग्यस्य सन्निहितस्यापि वेदे प्रकरणादुत्कर्षः । लोके त्वर्थान्तरापार्थकाप्राप्तकालादिप्रसङ्गः । सन्निधानेऽपि लोकप्रतीतिरेव प्रमाणम् ।

किं पुनरिदं योग्यत्वम् । यत्सम्बन्धार्हम् । तच्च लोकप्रमाणसिद्धम् । यस्य तु योग्यत्वमवधारितं तस्यान्वयः । यस्य तु न, न तस्य । तथा 'वह्निना सिञ्चेत्' इत्यत्र वह्निसेकयोः । अत एव वेदे सन्निहितस्याप्ययोग्यस्य प्रकरणादुत्कर्षः । लोके त्वर्थान्तरादिनिग्रहस्थानप्रसङ्गः ।

ननु तर्हि कथं वैदिकपदानामपूर्वकार्येणान्विताभिधानम् । तस्य मानान्तरागोचरतया तेन सह कस्यचित्सम्बन्धयोग्यत्वादर्शनात् । अत्रापि

सामान्यतो योग्यतावधारणं विशेषान्वयप्रतिपत्तावुपाय इत्यदोषः। यदपूर्वं तदपि कार्यमेवेति लौकिककार्यसंबन्धार्हं यत्तद्वेदेऽपि योग्यमित्यवसीयते। तदुक्तम्—

सामान्येनैव योग्यत्वं यदवधारितम्।
तदन्विताभिधानस्य व्युत्पत्तावुपलक्षणम्॥

(प्रकरण.प.वाक्या?)

अन्ये तु—यदयोग्यतया नावधारितं तद्योग्यम्। तेनालौकिकेनापि विध्यर्थेनान्विताभिधानं सिध्यतीत्याहुः। तन्न। यथा ह्यलौकिके वस्तुनि योग्यता नावधार्यते तथैवायोग्यतेति सर्वस्य सर्वप्रकारेणान्वयस्स्यात्। ततश्च भावार्थस्यैव विषयत्वेनान्वयः अनुपादेयविशेषणविशिष्टस्यैव स्वर्गकामादेर्नियोज्यत्वेनेति नियमो न स्यादित्यलम्।

क्वचिद्योग्यताबलादेव विप्रकृष्टानामपि सन्निधिं परिकल्प्यान्वयः। यथा अनारभ्याधीतानां पर्णतादीनां प्रकृतावन्वयः। योग्यतापरामर्शबलादेवापूर्व-विषयनियोज्यानां लोकप्रसिद्धक्रियाकारकभावेनान्वयप्रकारमतिलङ्घ्य विलक्षण-प्रकारेणान्वयः। प्रथमं शब्दमुखेनान्वितानामपि पश्चादर्थमुखेनाप्यन्वयधीः। अत एवारुणाधिकरणे प्रथमं क्रयेणान्वितानामप्यारुण्यादीनां पश्चात्पार्ष्ठिको द्रव्यान्वयः। तथा प्रथमं विषयीभूतस्य भावार्थस्य पश्चात्करणतया। तथा प्रथमं नियोज्यतयाऽन्वितस्य स्वर्गकामादेः पश्चादप्यधिकारिकर्तृभावेन। आकाङ्क्षादीनां त्रयाणां न केवलमन्वयं प्रत्येव कारणत्वम्। किंत्वन्योन्यमपि कार्यकारणभावस्तत्र तत्रान्वयवशादवगन्तव्य इति गम्भीरोऽयं न्यायमार्गः। तस्मात्प्रतियोग्यानन्त्येऽप्युपलक्षणाश्रयणान्न सम्बन्धग्रहणासम्भवः। अत एव न सामान्यतोऽन्विताभिधानम्। विशेषतो व्युत्पत्तेः।

ननु व्युत्पत्तौ उपलक्षणत्रयाश्रयणे गौरवम् । न । अभिहितान्वयवादिनापि नियतान्वयसिद्ध्यर्थमवश्याङ्गीकारात् । आकाङ्क्षाद्युपलक्षिता एव पदार्था अन्वयं बोधयन्ति नान्य इति । यत एवान्विते शक्तिः अतः पदार्थप्रतिपादनमवान्तरव्यापारीकृत्य वाक्यार्थप्रतिपादकानीति मतं निरस्तम् । अन्वितस्यैव वाक्यार्थत्वात् ।

ननूपलक्षणपक्षेऽप्युपलक्षितानामानन्त्यात् 'गामानय । बधान । मुञ्च ।' इत्येकस्यैव गोपदस्यानन्ताः शक्तयस्स्युः । अभिहितान्वयवादे तु अर्थैक्यादेकैवेति चेन्न । एकयैवाकाङ्क्षितसन्निहितयोग्यप्रतियोगिगोचरया शक्त्या नानाप्रतियोगिभेदेऽपि तत्प्रतियोगिबोधनकार्यभेदोपपत्तेः । यथा–चक्षुरेकयैव रूपरूपवत्तत्समवेतवस्तुगोचरया दर्शनशक्त्या प्रतियोगिभेदेऽपि तत्तद्दर्शनकार्यभेदहेतुः । किं च पदार्थानामाकाङ्क्षाद्युपलक्षितानन्तप्रतियोग्यन्वयप्रबोधने इयमनुपपत्तिस्समानैव । अपि च प्रत्ययस्तावत्प्रकृत्यर्थान्वितं स्वार्थमभिधत्त इति भवताऽप्युक्तम् । तथा प्रकृतिरपि । ततश्च सर्वमपि पदजातं तथैव स्यात् । किमर्धवैशसेन ।

नन्वेवमप्यन्वयवानन्वितः । अन्वयस्तु विशेषणमितरस्तु विशेष्यः । ततश्चोभयत्र शक्तिरवर्जनीयेति गौरवमिति चेन्मैवम् । अन्वयवत्तैवान्वितत्वम् । न त्वन्वयमन्तरेणान्वितत्वस्य पृथगात्मलाभः । न हि घटमन्तरेण पटवत् अन्वयमन्तरेणन्वितत्वं पृथगवतिष्ठते । ततश्चान्वयमन्तरेणान्वितत्वस्य प्रत्येतुमशक्तेः तत्प्रतीतौ च तत्प्रतीतिः । एकैव शक्तिरन्वयपर्यन्ता व्यक्तिवत् । न हि व्यक्तिमन्तरेण जातिः प्रत्येतुं शक्यते । वस्तुस्वभावाद्व्यक्तिप्रतीतावेव तत्प्रतीतिः । आकारभूता हि तस्याः । न ह्याकारिणमन्तरेणाकारप्रतीतिः । तर्हि तयोरप्येकशक्तिगोचरत्वं स्यात् । न स्यात् । यथाऽन्वयवत्त्वमेवान्वितरूपं नैवं व्यक्तिमत्तैव जातिस्वरूपम् । व्यक्तेः पृथग्भूता तदाकारभूता हि सा । अतो नैकशक्तिगोचरत्वं तयोः । तर्ह्युभयप्रत्यायने शक्तिद्वयं स्यात् । न

स्यात् । शक्तिमन्तरेणापि जातिस्वभावादेव व्यक्त्या सहोपलब्धेः । तथाहि– जातिवाची हि शब्दो व्यक्तिमन्तरेण जातिं प्रत्याययितुं न शक्नोति । आकारिणमन्तरेणाकारस्य प्रत्येतुमशक्तेः । अतो जात्यभिधायकतयैव जातिशब्दो व्यक्तिमपि प्रत्याययतीति न शक्तिस्तत्र कल्प्यते । अनन्यलभ्यश्शब्दार्थ इति न्यायात् ।

नन्वेकप्रतीतिविषयत्वेऽप्येकस्यानभिधेयत्वमन्यस्याभिधेयत्वं च कुतः । इत्थम्–तत्र तावदनन्तासु व्यक्तिषु सङ्गतिरशक्या । जात्युपलक्षितास्तु यद्यपि शक्याः । तस्मिन्नपि पक्षे जातौ शब्दस्य शक्तिरवश्याङ्गीकार्या । अन्यथा शब्दाज्जातेरप्रतीतिप्रसङ्गात् । ततो वरं जातावेव शक्तिः । व्यक्तिस्तु जात्यभिधाय-कत्वस्वभावलभ्या लाघवादिति न सर्वसाम्यं व्यक्तिदृष्टान्तस्य । किं तु तत्प्रतीतावेव तत्प्रतीतिः, तदप्रतीतौ च तदप्रतीतिः इति दर्शनरहस्यम् ।

कथञ्चिच्छक्तिद्वयकल्पनेऽप्यभिहितान्वयवादादन्विताभिधानपक्ष एव श्रेयान् । पदानां स्वार्थे तदर्थानां वाक्यार्थे पुनरपि पदानां तदाधाने इति शक्तित्रयम् । अत्र तु शक्तिद्वयम् । पदानां स्मारकत्वपक्षे यद्यपि कथञ्चित्साम्यम् । तथापि वाक्यार्थस्य शाब्दत्वसिद्धये पदानामेव सा अन्वितगोचराऽङ्गीकार्या । किं च इतोऽप्यन्विताभिधानमेव युक्तम् । यतः प्रथमभावीनि पदान्यतिलङ्घ्य पदार्थेषु वाक्यार्थबोधनशक्तिराश्रयितुमयुक्ता ।

किंच पदानां वाक्यार्थाभिधानशक्तिरविवादा भवद्भिरङ्गीकारात् । ततश्च सैवान्वितपर्यन्ता स्वीकार्या । न तु पदार्थानामन्या स्वीकार्या । धर्मिकल्पनातो धर्मकल्पनाया लघीयस्त्वात् । किंच येन नाम पदानां स्मारकत्वमङ्गीकृतं तेनापि तेषां वाक्यार्थे तात्पर्यमङ्गीकृतम् । तथा च तेषामेव साक्षाद्बोधनशक्तिरस्तु किं परम्पराश्रयणेन ।

तदुक्तम्—

प्राथम्यादभिधातृत्वात्तात्पर्योपगमादपि ।
पदानामेव सा शक्तिर्वरमभ्युपगम्यताम् ।।

इति **(प्रकरण-प.** वाक्यार्थ?)

तस्मादन्विताभिधानमेव युक्तम् । तच्च मुख्यपदानामेव । गौणलाक्षणिकयोस्तु प्रतियोगिमात्रोपस्थापकत्वमेव । नान्वितबोधकत्वम् । तत्र तयोश्शक्तिग्रहणाभावात् । तद्ग्रहणे चानेकार्थत्वं तयोः स्यात् । तच्चान्याय्यम् । अक्षादिपदेषु त्वनेकार्थत्वमगत्या । इह तु सम्बन्धानुपपत्तिभ्यां गुणयोगाच्चार्थप्रतीतिसम्भवे तत्रापि शक्तिकल्पनमयुक्तम् । इत्थमाकाङ्क्षादित्रयोपाधिवशेनान्विते शक्तिग्रहणाद्विशेषेणैवान्विताभिधानं समर्थितम् ।

केचित्तु सामान्याकारेणाहुः । तथाहि—क्रियापदं हि कारकसामान्यान्वितं स्वार्थमाह । एवं कारकपदमपि । सर्वोऽपि शाब्दोऽन्वयः क्रियाकारकभावेनैव । अन्वयव्यतिरेकाभ्यां हि शक्तिग्रहः । तौ च सामान्यगोचरौ । अतस्सामान्येनान्विताभिधानमिति । तन्न । तन्मते विशेषवाक्यार्थावगतिर्दुर्लभा । प्रमाणाभावात् । पदानि चेत्-सामान्यान्वितपर्यवसितशक्तीनीति । अथ सामान्यस्य विशेषपर्यवसानात्तत्सिद्धिरिति चेत्, तथापि निर्धारितविशेषावगतिर्दुर्लभा प्रमाणाभावादेव ।

अथ विशेषमात्राक्षेपे पदान्तरोपस्थापिते योग्ये विशेषे पर्यवसानमिति चेत्, एवं चेद्विशेषान्वयव्युत्पत्तिरेव मुखान्तरेणाङ्गीकृता स्यात् । किंच क्रियास्वभावालोचनयाऽपि तस्य कारकमात्रेणान्वये सिद्धे तत्रापि शब्दप्रयासो व्यर्थः । एवं कारकस्वभावालोचनयाऽपि । अस्माकं चेदाकाङ्क्षादित्रयं विशेषव्युत्पत्तावुप-

कारकम् । इतरस्य तु नोपकारकम् । कथंचिदुपकारकत्वेऽपि पदान्तरसन्निधिर्व्यर्थ एवेति विशेषत एव युक्तम् ।

यदि पदान्तराभिहितेनैवान्विताभिधानं तदेतरेतराश्रयः स्यादित्युक्तम् । मैवम् । इत्थं हि पदेभ्यो वाक्यार्थावगतिः—प्रथमं श्रूयमाणानि पदानि परस्परानन्वितान्स्वार्थान्स्मारयन्ति । स्मृतेषु तेषु पश्चाच्छ्रोतुः स्वस्वार्थविषयो विमर्शो जायते–इदमेकवाक्यं भिन्नवाक्यमिदं विवक्षितार्थमविवक्षितार्थमिदं लाक्षणिकं मुख्यमिदमन्वयार्हमिदं प्रधानमप्रधानमिदं विधेयमविधेयं चेत्येवमाद्यात्मकः । ततश्च वाक्यार्थनिर्णयौपयिकन्यायानुसन्धानेन यथावच्छब्दार्थानुसन्धानविषययोग्यायोग्यविभागे सति स्मृत्यारूढानि तान्येव पदान्यन्विताभिधायकानीति स्मृतिदशायां परामर्शदशायामभिधानदशायां च नेतरेतराश्रयः ।

ननु पदान्येव वाक्यमित्युक्तम् । तत्रैकैकं पदं वाक्यं तत्संघातो वा । नाद्यः । पदान्तरप्रयोगवैयर्थ्यात् । न द्वितीयः । सङ्घातस्य चान्यत्वप्रसङ्गात् । मैवम् । पदान्येव वाक्यम् । तान्यपि न सङ्घातात्मना । किं तु प्रत्येकं पदात्मकतयैव । तथाहि—गामानय इत्यत्र गोपदमानयेत्यन्वितस्वार्थबोधकम् । आनयतिपदं तु तदानीं प्रतियोगिमात्रोपस्थापकम् । एवमानयेतिपदमपीत्युभयमपि वाक्यम् । एवं दण्डेनेत्यादीन्यपि । प्रतियोग्युपस्थापकतया । एवमानयेतिपदमपीत्युभयमपि वाक्यम् । एवं दण्डेनेत्यादीन्यपि । प्रतियोग्युपस्थापकतया च न पदान्तरप्रयोगवैयर्थ्यमपि । अभिधानदशायामेकस्मृत्यारूढानि सर्वाण्यपि पदानि युगपदेव बोधकानि । गुणप्रधानभावेनान्वये सति प्रधानैक्याद्वाक्यार्थैक्यम् । तदैक्याद्वाक्यैक्यमपि । प्रधानप्रतिपत्तिश्च नैकनिबन्धना । कथं नु नाम प्रधानं विशिष्टं प्रतीयतामित्येवमर्थं गुणप्रतिपादनमिति गुणा अपि प्रधानशेषभूता इति तत्प्रतिपादनमपि नैकस्मात्पदात् । प्रधानं प्रयोजनं कार्यमिति यावत् । सर्वेषामपि

पदानां कार्यपरत्वव्युत्पत्तेः । एतेन प्रथमं पदं प्रधानं पदं वा अन्विताभिधायि । अतस्तदेव वाक्यम् । अन्यत्प्रतियोगिमात्रोपस्थापकमित्यादिवादा निरस्ताः । प्राथाम्यादेरनियतत्वाच्च ।

केचित्तु पदातिरिक्तं वाक्यं पदार्थातिरिक्तश्च वाक्यार्थ इत्याहुः । तन्मते वाक्यस्यानियतत्वात्तस्य तदर्थे व्युत्पत्तिरशक्या । अपूर्ववाक्यश्रवणे च तदर्थप्रतीतिर्न स्यात् । तत्र तस्याव्युत्पत्तेः । अनियतत्वं च पदान्तरप्रक्षेपे तत्प्रतिक्षेपे च वाक्यान्तरपरिणामात् । नियतक्रमा एव हि वर्णाः पदत्वेन नियताः । किं चाल्पैरेव पदैः अष्टवाक्यानि परिणमन्ते । तत्रानेकशक्तिकल्पनाः स्युः । तथा हि–''शिशो! गामानय गां बधान, अर्भक! गामानय गां बधान, डिंभक! गामानय गां बधान, वत्स! गामानय गां बधान'' इति सप्तभिः पदैः अष्टवाक्यानि । तत्र पदव्युत्पत्तिवादिनः सप्त शक्तयः बाक्यव्युत्पत्तिवादिनस्त्वष्टौ । तथा 'शुक्लाम्' इति पदप्रक्षेपेऽष्टापराः प्रकल्प्याः । पदवादिनस्त्वेका । अस्माकं तु पदान्येव वाक्यं तदर्थ एव वाक्यार्थ इति न किंचिदनुपपन्नम् ।

नन्वन्विते व्युत्पत्तेरन्वितपदार्थप्रतिसंबन्धीनि पदानि । न तैस्स्मरणदशायामनन्वितपदार्थस्मरणम् । उच्यते–अन्वितेऽर्थेऽनन्वितांशस्यापि विद्यमानत्वात् तत्स्मरणमुपपद्यते । प्रतियोगिनस्त्वनियतत्वेन न स्मृतिविषयता । विशिष्टानुभवेऽपि क्वचित्कारणवशाद्विशेष्यमात्रस्मरणं च लोके बहुशो दृश्यते । अथवा यथा निर्विकल्पकगृहीतादप्रमाणभूतादवाच्यादप्यर्थाद्वाचकशब्दस्मरणमेवमभिधायकत्ववेषमनपेक्ष्य केवलमर्थप्रतिसंबन्धिशब्दमात्रादप्रमाणभूतादप्यर्थस्मरणं युज्यते । परस्परप्रत्यासत्तिरेव स्मरणनिमित्तम् । न प्रमाणत्वाप्रमाणत्वे । श्रूयमाणं च पदं नान्विताभिधायकम् । तदानीं प्रतियोगिनोऽनुपस्थानात् । तत्सापेक्षत्वाच्चान्विताभिधानस्य । ततश्च पदोच्चारणानन्तर-

मनन्वितपदार्थस्मरणमुपपन्नम् । मतान्तरेऽपि पदानां स्मारकत्वमभिमतम् । यथा अभिहितान्वयवादे स्मृतेभ्यः पदार्थेभ्यः अन्वितप्रतीतिः तथा स्मृतेभ्यः पदेभ्योऽपि नानुपपन्ना । ननु यदि स्मृतिसन्निहितेन पदार्थेनान्विताभिधानं तत्स्मृतिश्च शब्दात्, तर्हि गोपदस्य गोत्वेनेवार्थान्तरेणापि प्रत्यासत्तेः तस्यापि गोपदेन स्मरणे सति गामानयेत्यत्र आनयतिना नियमेन गोरन्विताभिधानं न स्यात् । एवमानयतेरपि । नैवम्—अभिहितान्वयवादेऽप्यस्य दोषस्य तुल्यत्वात् । गोपदार्थस्यानयतिनेव पदार्थान्तरेणापि सम्बन्धात् । तस्मादावाभ्यामयं दोषः परिहर्तव्यः । परिहारस्तु गोपदप्रयोगे तस्यैव नियमेन स्मरणमनुगतत्वात् । न त्वर्थान्तरस्य । तदभावात् । एवमानयेति प्रयोगेऽपि । तस्मात्तयोरेवान्विताभिधानम् । अर्थान्तरैरन्विताभिधाने एकवाक्यं च न स्यात् । तस्माल्लौकिकं वैदिकं च पदजातमन्वितबोधकतयैव प्रमाणमिति सिद्धम् । य एव लौकिकास्त एव वैदिका इति लोकवेदाधिकरणन्यायात् । एतत्सर्वमभिप्रेत्योक्तं **प्रकरणपञ्चिकायाम्—**

> पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम् ।
> न्यायसंपादितव्यक्ति पश्चाद्वाक्यार्थबोधकम् ।।
>
> स्मृतिसन्निहितैरेवमर्थैरन्वितमात्मनः ।
> अर्थमाह पदं सर्वमिति नान्योन्यसंश्रयः ।। (वाक्यार्थमातृका) ।

न्यायसंपादितव्यक्तीति । वृद्धव्यवहारप्रवर्तितायां शब्दार्थप्रवृत्तौ ये न्यायाः शब्दार्थगोचराः एकवाक्यत्वभिन्नवाक्यत्वादयः पूर्वोक्तास्साधारणाः ये च द्वादशाध्यायीप्रतिपाद्या वेदार्थनिर्णये प्रातिस्विकाः शब्दान्तराभ्यासादयः श्रुतिलिङ्गवाक्यप्रकरणादयः श्रुत्यर्थपठनस्थानादयो वचननामधेयचोदनादयश्च तैर्विमर्शदशायां संपादिते शब्दार्थानामन्वयार्हत्वविभागे सति पश्चात्स्मृत्युपनीतैः

पदैर्योग्यक्रमेण वाक्यार्थावगतिरित्यर्थः । तस्माल्लौकिकं वैदिकं च वाक्यं न्यायसापेक्षमेवार्थबोधकं यद्विप्रतिपन्नार्थमपि । प्रतिपन्नार्थं तु तदनपेक्षमेव झटिति बोधकम् । वेदारम्भश्चाग्रे समर्थयिष्यते । सा च करणीभूतस्य वेदस्येतिकर्तव्यता । यथा चक्षुष आलोकः । यथा वाऽनुमानस्य व्याप्तिस्मरणम् । यथा वोपमानस्य सादृश्यम् । यथा वाऽर्थापत्तेस्संदेहापत्तिः । तदुक्तम्—

धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ।। इति ।।(**बृहट्टीका**)

तस्मादन्विते व्युत्पत्तेस्सर्वमपि पदजातमन्विताभिधायीति स्थितम् ।

नन्वस्त्वन्विते व्युत्पत्तिः । तद्वशात्कथञ्चिदप्रतीतिरपि स्यात् । तथाहि– 'अङ्गुल्यग्रे करिणां यूथशतमास्ते' 'जरद्गवो गायति' इत्यादिना वृद्धव्यवहारे व्युत्पन्नानामपि लौकिकपदानामर्थासंस्पर्शित्वदर्शनासर्वाण्यपि पदान्यर्थासंस्पर्शीनीति कथं तेषां प्रामाण्यम् । अर्थप्रतीतिस्तु केवलं शब्दसाहचर्यप्रभवतया भ्रान्तिरेव । न त्वव्यभिचारिणीति नियमः ।

ननु शुक्तिकारजतादिवल्लौकिकवाक्यानां कारणदोषेण दुष्टतया भेदाग्रहात् भ्रान्तत्वं युक्तम् । वैदिकानां तु निर्दोषतया स्वाभाविकं निश्चायकत्वमेवेति चेन्न । दोषा(ष)सम्भवाद्युक्तं साक्षादिन्द्रियजन्यतया रजतज्ञानस्य तद्दोषा(ष)-दुष्टत्वम् । इह तु शब्द एव हि साक्षात्प्रत्यायकः । वक्तारस्तु केवलं शब्दाभिव्यञ्जकाः । तद्दोषाश्च न तेषु सङ्क्रामन्ति । अतो लौकिकानां स्वतोऽर्थासंस्पर्शित्वम् । वैदिकाश्च न लौकिकेभ्यो भिद्यन्ते । अतस्तेषामप्यर्थासंस्पर्शित्वं स्यात् । किं च व्युत्पत्तिश्च लोके । ततश्च सुतराम् । ननु तर्हि कथमाप्तवाक्येभ्यः प्रवृत्तिः । कथं वा संवादः । न । तत्र संदेहादपि तदुपपत्तेः । कृष्यादिषु संदेहादपि हि प्रवर्तन्ते । संवादश्च यादृच्छिकः । अपि च लौकिकेषु

मानान्तरवशेनाप्यर्थनिर्णयस्स्यादेव । वेदे तु वक्तुरभावात्तदर्थस्य मानान्तरागोचरत्वाच्च न तत्र निर्णय इत्यर्थासंस्पर्शिन एव वेदाः ।

अत्रोच्यते—अर्थासंस्पर्शे जगति शब्दमूला प्रवृत्तिर्न स्यात् । तत्प्रतिपादनं च न घटेत । तस्यापि शब्दमूलत्वात् । यथाकथंचित्संस्पर्शे नियता प्रवृत्तिर्न स्यात् । तस्मात्तत्संस्पर्शोऽङ्गीकार्यः । तत्र लौकिकं पदजातं तावत् लिङ्गतयाऽर्थप्रत्यायकम् । न तु स्वयं प्रमाणत्वेन । तत्र यद्यपि शब्दार्थयोस्सम्बन्धस्तावदौत्पत्तिकः । तत्परिज्ञानं च शक्तिग्रहात् । स च वृद्धव्यवहारप्रवर्तितायां व्युत्पत्तौ । गृहीतसम्बन्धं च पदजातं स्वरसतोऽर्थप्रत्यायकमित्येतावत्सर्वजनसम्मतम् । तथापि लौकिकवाक्येषु वक्तृदोषशङ्कया सा शक्तिस्तिरोधीयते । तथाहि–तत्र पुरुषा भ्रमातिशयदोषप्रमादाशक्तिभिरनन्वितार्थानि वाक्यानि प्रयुञ्जाना दृश्यन्ते । तद्दृष्टान्तबलेन सर्वत्राप्यनन्वितार्थत्वशङ्कायां लौकिकं वाक्यं श्रुतमात्रं नार्थनिश्चायकं यावद्वाक्यस्य प्रमाणमूलत्वं न निश्चितम् । पश्चात्तु 'कदाचिदप्यनन्वितार्थानि वाक्यानि न प्रयुङ्क्ते । अर्थं ज्ञात्वैवान्योन्यान्वययोग्यार्थं पदजातं ब्रवीति । तस्मादाप्तः' इत्याप्तत्वनिश्चये सति पश्चात्तस्माद्वाक्यात्कार्यभूतात्कारणभूतं वक्तृज्ञानमनुमीयते 'इदं वाक्यं स्वार्थसंसर्गज्ञानपूर्वकम् आप्तवाक्यत्वात् मदीयवाक्यवत् ।' पश्चात्तु तज्ज्ञानमर्थाविनाभावि, ज्ञानत्वात्, मदीयज्ञानवदिति ज्ञानेनार्थोऽनुमीयते । इत्थं वाक्यार्थे निश्चिते सति पश्चात्तदेव वाक्यमुद्बुद्धशक्तिकं सत्तस्यार्थस्य वाचकम् । तस्यां दशायामनुमितार्थबोधकत्वादनुवादकमेव । न तु प्रमाणम् । तस्माल्लौकिकं वाक्यं लिङ्गतयैव प्रमाणम् । न तु स्वतः । अनाप्तवाक्यं चेल्लिङ्गाभास एव व्यभिचारात् । शब्दस्य तु न क्वचिदपि व्यभिचारोऽस्ति । तस्य तु शास्त्ररूपस्य स्वत एव प्रमाणत्वात् । लौकिकं तु वाक्यं न शास्त्रम् । किं तु लिङ्गम् । अतस्तदेव व्यभिचारि ।

विचार्यमाणे लिङ्गस्यापि न व्यभिचारः । प्रत्ययितवचनादप्रत्ययितवचनं विवेकेनाप्रतिपद्यमानं(नोऽ)प्रत्ययितवचने दृष्टमग्रहणा(ण)पूर्वकत्व(र्वक्तव्य)-व्यवहारम(रं)प्रत्ययितवचने प्रवर्तयतीति न लिङ्गस्यापि व्यभिचारः । तस्माल्लौकिकमाप्तवाक्यमनुवाददशायामर्थसंस्पर्शि । अनाप्तवाक्यं चेत्केवलं स्वस्वार्थस्मारकतया अर्थासंस्पर्शीति सिद्धम् । वेदे तु वक्तुरभावात् असति शक्तिप्रतिबन्धे स्वरसप्राप्तं वाचकत्वं सुस्थमेवेत्यर्थसंस्पर्शिन एव वेदाः ।

ननु लौकिकानि पदानि लिङ्गतया बोधकानि चेत्, कथं तेषां स्वस्वार्थे शक्तिग्रहः । उच्यते—न हि धूमवदविनाभावबलेनैवानुमापकम् । किं तु वाचकशक्त्यन्तर्भावबलेनैव । न हि यत्किंचिच्छब्दमात्राद्यत्किंचिदर्थमात्र-मनुमीयते । किं तु विशिष्टाच्छब्दाद्विशिष्टोऽर्थः । वाचकत्वमेव शब्दस्य विशेषः । वाच्यत्वमेव चार्थस्य । ततश्च प्रथमं वृद्धव्यवहारे पूर्वोक्तेन मार्गेण वाचकाच्छब्दाद्वाच्यार्थव्युत्पत्तौ सत्यां कुतश्चित्कारणादर्थव्यभिचारशङ्कायां पश्चात्तस्मिन्नेवार्थे तस्य शब्दस्य लिङ्गत्वम् । ततः पश्चादनुवादकतयाऽपि वाचकत्वमिति व्युत्पत्तिसमयेऽनुवादसमये च शक्तिग्रहणमुपपन्नमिति गम्भीरोऽयं न्यायमहाह्रदः ।

ननु प्रत्ययितत्वज्ञानेन व्यभिचारशङ्कायां निवृत्तायां वाक्यं स्वत एवार्थे प्रमाणं स्यात् । किमिति वक्तृज्ञानानुमानं भवेत् । मैवम्–प्रत्ययितत्वं नाम समीचीनज्ञानपूर्वकवाक्यप्रयोक्तृत्वम् । ज्ञानस्य समीचीनत्वनिश्चयश्चार्थ-निश्चयमन्तरेण न स्यादिति न संशयनिवारणमात्रे पुरुषविशेषज्ञानं व्याप्रियते । किंत्वर्थनिश्चयेऽपि । ननु तर्हि निश्चितेऽर्थे संशये च निवृत्ते पश्चात्तत्र प्रमाणं स्यात् । न स्यात् । तस्यां दशायामनुवादकत्वादित्यसकृदुक्तम् । ननु यदि वाक्याद्वक्तृज्ञानानुमानं ज्ञानाच्चार्थानुमानं तर्ह्यनवगतेऽर्थे कथं ज्ञानविशेषोऽनुमातुं

शक्यते । ज्ञानमात्रं च नानुमेयम् । अप्रयोजकत्वात् । अर्थेनैव ज्ञानस्य विशेषः । तदुक्तम्—

अर्थेनैव विशेषो हि निराकारतया धियाम् । इति ।।

(प्रकरण. प.नीतिपथ. ३६)

न चानवगतोऽर्थो ज्ञानस्य विशेषमापादयतीति प्रथमत एवार्थविशेषसङ्घटितं ज्ञानमनुमीयताम् । किमिति पश्चाज्ज्ञानेनार्थानुमानम् । उच्यते—बुभुत्साक्रमेण ह्यनुमानम् । कार्यभूतस्य वाक्यस्य प्रथमं सामान्याकारेण स्वार्थसंसर्गज्ञानपूर्वकत्वमात्रं बुभुत्सितम् । ततश्चानवगतेऽप्यर्थविशेषे तादृशज्ञानविशेषोऽनुमातुं शक्यत एव यादृशार्थप्रतिपादनयोग्यानि पदानि तादृशार्थज्ञानपूर्वकाणीति । इत्थं ज्ञानेऽनुमिते पश्चात्तेन ज्ञानेनार्थोऽनुमीयत इति बुभुत्साक्रमेणानुमानद्वयप्रवृत्तिरिति न किंचिदनुपपन्नम् । एतत्सर्वं **नीतिपथे** प्रकटितम् ।।

ननु भारतादिवत्पदसङ्घातात्मकतया वेदः पौरुषेयस्स्यात् । अत एव कठशाखा कण्वशाखेति समाख्या । न चेयं प्रवचननिमित्ता । तस्य सर्वाध्येतृसाधारणत्वात् । बहवो हि प्रब्रूयुः । कर्ता पुनरसाधारणः । असाधारणेन हि व्यपदेशो युक्तः । पौरुषेयत्वे च वेदस्य तदर्थस्य प्रमाणान्तरागोचरत्वात्तद्विषये वक्तुः प्रमाणान्तराभावादप्रमाणमूलतयाऽनन्वितार्थत्वशङ्का स्यादेवेति चेत्— मैवम् । पुरुषकृतत्वं तावद्भारतादिवन्न स्मर्यते । वैयासिकी भारतसंहिता । पाराशरी विष्णुपुराणसंहितेति स्मर्यते । दुर(दूरेऽ)नुमानं च । मानान्तरागोचरेऽर्थे पुरुषाणां वाक्यरचानुपपत्तेः । समाख्या तु पौरुषेयी प्रमाणान्तरानुसारिणी न स्वयं पौरुषेयत्वं व्यवस्थापयितुं शक्नोति । प्रमाणान्तरं च न दृश्यते । तस्मात्प्रवचननिमित्ता कठादिसमाख्या । प्रकृष्टं वचनं कस्यचिदेवेति तदप्यसाधारणम् । अध्यायानध्यायादिव्यवस्थयाऽधीयमानस्य

व्रतनियमविशेषपूर्वकस्य व्याकरणानुशिष्टस्य स्वरतो विशेषनियतस्यानुष्ठानपर्यन्तस्याविसंवादिपश्वन्नाद्यैहिकफलसाधनस्य शिष्टजनपरिगृहीतस्य महतो ग्रन्थराशेर्भ्रान्तपुरुषप्रणीतत्वशङ्का च निरवकाशा । क्वचित्क्वचिद्विप्रकीर्णविरुद्धाप्रसिद्धार्थतयाऽप्रामाण्यमपि नाशङ्कनीयम् । निरुक्तव्याकरणमीमांसादिमुखेन समीचीनार्थतत्त्वनिर्णयसिद्धेः । प्रमाणान्तरागोचरस्य अपूर्वात्मकस्य वेदार्थस्य बुद्धावारोपयितुमशक्यतया बुद्धिमत्प्रणीतत्वमपि नाशङ्कनीयम् । न हि दर्शपूर्णमासाद्यपूर्वं प्रत्यक्षादिप्रमाणोचरः । किं तु तच्चोदनामात्रगोचरः ।

तदाह सूत्रकारः—

''सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् । (**जै.सू.** १-१-४)

चोदनालक्षणोऽर्थो धर्मः'' (**जै.सू.** १-१-२) इति च ।

तस्मादपौरुषेयो वेदः । पदसङ्घातात्मकत्वं चोच्चारणवशादुपपन्नम् । तदुच्चारणमुच्चारणान्तरपूर्वकम् । तच्च तथा । अपौरुषेयतया च प्रमाणान्तरपूर्वकता नास्ति प्रत्यक्षवत् । अत एव चानपेक्षतया वेदप्रामाण्यमिति ।

ननु 'चित्रया यजेत पशुकामः' इत्यादिचोदनाः पश्वादिफलानुविद्धं स्वमर्थमवबोधयन्ति । न च कर्मानन्तरं फलं दृश्यते दृश्यमानमपि प्रतिग्रहादिनिमित्तमेव । अतः प्रमाणान्तरबाधान्न प्रमाणम् ।

उच्यते—न तावच्छास्त्रेणानन्तरभावितया फलं ज्ञाप्यते । किं तु फलसाधनत्वमात्रमपूर्वस्य । न च प्रतिग्रहादिकमपूर्वसाधनत्वपरिपन्थि ! तत्साधनत्वेऽप्यपूर्वसाधनत्वाविरोधात् । अतः प्रत्यक्षादिसिद्धं प्रतिग्रहादिकं शास्त्रसिद्धमपूर्वमुभयमपि फलसाधनमिति । अतो वेद एव शास्त्रं पृथक्प्रमाणम् ।

तत्र लौकिकं वाक्यं लिङ्गतया प्रत्यायकम् । तत्तु न शास्त्रम् । असन्निकृष्टविषयत्वाभावात् । वैदिकमेव शास्त्रमिति सिद्धम् । तत्तु द्विविधं प्रत्यक्षमनुमानं च । तत्राद्यमध्ययनपरिगृहीतस्वाध्यायात्मको वेदराशिः । द्वितीयस्तु नित्यानुमेयः । तत्र लिङ्गं स्मृतिः आचारश्च । तथाहि—'अष्टकाः कर्तव्याः' इति स्मृतिस्तावत् त्रैवर्णिकैरविगानेन परिगृहीता । न चामूलायाः परिग्रह उपपद्यते । न च प्रत्यक्षं मूलम् । तस्यापूर्वविषयत्वासम्भवात् । स्मृतिस्तु कार्यविषया । ततश्शास्त्रमेव मूलम् । ननु तदपि कथं मूलम् । यत्नेनान्वेषणेऽप्यनुपलब्धेः । अनुपलब्धस्य चाबोधकत्वात् ।

उच्यते—स्मृतिप्रणेतार एव वयमिव तच्छास्त्रं नोपलभन्ते । तत्समानार्थस्मृत्यन्तरदर्शनेन तेषामप्यस्माकमिवानुमानं सम्भवत्येव । एवं मन्वादिभ्यः पूर्वेषामपि स्मर्तॄणां तत्समानार्थस्मृत्यन्तरदर्शनेनानुमानम् । इत्थमनादित्वात्स्मर्तृपरम्पराया लिङ्गभूतायाश्च स्मृतिपरम्पराया नानुमानत्वविघातः । अत एव नान्धपरम्परावदमूलत्वमपि । अनुमितस्य शास्त्रस्य अर्थप्रतिपादकत्वं च लिप्यनुमिताक्षरवदुपपन्नम् । अनन्तचरणाधारे हि महीमण्डले कुत्रचिदप्यश्रवणमनाम्नानात् । तदेव कथम् । आचार्यान्तरानाम्नानात् । तदपि कुतः । तथैव । तत एव नित्यानुमेयत्वं वेदत्वं च तस्यापौरुषेयप्रबन्धरूपत्वात् । अत एव स्मृतीनां विप्रकीर्णशाखामूलत्वमपि परोक्तं निरस्तम् । क्वचित्कदाचित्केनचिदप्यनुपलम्भात् । तथा शिष्टत्रैवर्णिकपरिगृहीताविरुद्धाचारेणापि साक्षाच्छ्रुतिरनुमीयते । मूलान्तरासम्भवात् । आचारात्स्मृतिस्ततश्श्रुतिरिति परोक्तमयुक्तम् । परम्परायां प्रमाणासम्भवात् । तस्माद्द्विविधं शास्त्रम् । उभयमप्यसन्निकृष्टार्थविषयम् ।

स च कार्यात्मा । सर्वेषामपि शब्दानां साक्षात्परम्परया वा लोके कार्यपरत्वव्युत्पत्तेः । वैदिकानामपि लोकाविशेषात् । तथाहि—यथा

मध्यमवृद्धप्रवृत्तिर्ज्ञानपूर्विका तथा कार्यज्ञानपूर्विका च । न हि ज्ञान-मात्रात्प्रवर्तते । किं तु कार्यमेव तदिति ज्ञात्वा । इष्टसाधनताज्ञानस्य प्रवर्तकत्वमग्रे निराकरिष्यते । तच्च कार्यज्ञानं शब्दानन्तरभावित्वाच्छब्दजन्यम् । तस्मिंश्च कार्ये लिङ्लोट्तव्यप्रत्यया एवान्वयव्यतिरेकाभ्यामवधारितशक्तिकाः । ततस्तेषां साक्षात्तत्परत्वम् । इतरेषां तु परम्परया । तथाहि—'देवदत्त गामानय शुक्लां दण्डेन' इत्यादौ विधिप्रत्ययः साक्षादानयेः कार्यतां बोधयति । आनयतिस्तु क्रियाम् । गोपदं तदन्वितं कर्म । एवमितराण्यपि कारकपदानि तदन्वितं स्वार्थम् । अन्विते व्युत्पत्तेः । तथा 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादौ वैदिकपदानामपि कार्यपरत्वव्युत्पत्तेः तत्परत्वं सिद्धम् ।

ननु सिद्धार्थपरादपि वाक्याद्व्युत्पत्तिः दृश्यते । कथं तन्मात्रपरत्वम् । तथाहि—'पुत्रस्ते जातः । क्षेत्रं ते पक्वसस्यम् ।' इत्यादिप्रयोगे मुखप्रसादादिलिङ्गैः श्रोतुर्हर्षोत्पत्तिरनुमीयते । सा च तन्निमित्तमन्तरेण न सम्भवति । प्रियवस्तु-प्रतीतिश्च हर्षहेतुरिति स्वात्मनि प्रतीतम् । तेन वाक्येन प्रियोऽर्थो बोधित इति सामान्येन प्रतीते परिशेषात्प्रमाणान्तरप्रतिपन्नं पुत्रजन्मैव वाक्यप्रतिपाद्यमिति व्युत्पित्सुरवगच्छति । तस्मात्प्रतिपदमावापोद्वापाभ्यां विशेषार्थनिश्चयो भवति । तथा 'काष्ठैः पचति' इत्यादौ वर्तमानप्रयोगे । व्युत्पन्नविभक्त्यर्थोऽ-व्युत्पन्नप्रातिपदिकार्थश्च प्रत्यक्षेण काष्ठानां करणभावमधिगच्छन् प्रसिद्धप चतिपदसमभिव्याहारात्काष्ठशब्दार्थं निश्चिनोति । किं चास्य शब्दस्यायमर्थ इत्यपि लोके व्युत्पत्तिर्दृश्यते । अपि च सिद्धार्थपराण्यपि वाक्यानि लोके प्रश्नोत्तरपराणि दृश्यन्ते । 'कुशलं ते, कुशलं मम' इति । अतः कार्यमात्र-परत्वमनुपपन्नमिति ।

अत्रोच्यते—सर्वपुरुषाणामाद्या व्युत्पत्तिस्तावद्वृद्धव्यवहारत एवेत्यविवादम् ।

व्यवहारश्च प्रत्यक्षेण विशिष्टार्थविषय उपलभ्यते । स च कार्यावगममूलः । तस्यैव प्रवर्तकत्वात् । अतः कार्यान्विते विशिष्टार्थे ज्ञानानुमानद्वारेण शब्दस्य शक्तिग्रहस्सुकर एव । नात्र परिशेषापेक्षा । व्यवहारविषयस्य विशिष्टार्थस्य प्रत्यक्षसिद्धत्वात् । सिद्धार्थाख्याने तु व्युत्पत्तिर्दुश्शकैव । यद्यपि तत्परवाक्यप्रयोगे मुखप्रसादादिभिः हर्षोत्पत्तिरनुमीयते । तया च तद्धेतुप्रतीतिः । तन्निमित्तताऽपि शब्दस्यैव । तथापि परिशेषात्प्रमाणान्तरसिद्धपुत्रजन्माख्यहर्षहेतुप्रतिपादकता दुरनुमाना । कालत्रयवर्तिनां सन्निहितव्यवहितानां प्रमाणान्तरसिद्धानां हर्षहेतूनां पारिशेष्यादवधारणायोगात् । तथा 'अस्य शब्दस्यायमर्थ' इत्यत्रापि सर्वपदार्था-परिज्ञाने व्युत्पत्तिर्दुश्शकैव । कतिपयपदार्थज्ञाने तु प्रसिद्धपदसमभिव्याहार एव । तत्र प्रसिद्धानां पूर्वं कार्यान्वितस्वार्थे व्युत्पत्तेरप्रसिद्धार्थस्यापि पदस्य कार्याध्याहारेणैव तदन्वितस्वार्थावगतिरेषणीया । ततश्च सर्वपदानां तत्परत्वं सिद्धम् ।

एवञ्च लोके यस्सिद्धार्थपरस्स लाक्षणिक एव । कार्यपरं पदजातं परस्परपदार्थान्वयाव्यभिचारीति कार्यान्वयमविवक्षित्वा परस्परपदार्थान्वयमात्रं विवक्षित्वा लोकश्शब्दं प्रयुङ्क्ते । विवक्षावशेन लक्षणयाऽपि तत्र तात्पर्यं निर्वहत्येव । वेदे तु लक्षणानिबन्धनं किञ्चिदपि नेति औत्सर्गिकं कार्यपरत्वमनवग्रहम् । ततश्च सिद्धब्रह्मपराणां सिद्धपरात्मपराणां च 'सत्यं ज्ञानमनन्तं ब्रह्म । विज्ञानमानन्दं ब्रह्म । तेनेदं पूर्णं पुरुषेण सर्वम् । यस्सर्वज्ञस्सर्ववित् । द्वे ब्रह्मणी वेदितव्ये परं चापरं च । द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते' इत्यादीनां वाक्यानाम् 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यादिविधिनैकवाक्यतामाश्रित्य कार्यपरत्वं वर्णनीयम् । 'भूतं भव्याय' इति न्यायात् । साध्यशेषभूतं सिद्धमिति न्यायादित्यर्थः ।

इत्थं वर्णा नित्याः । अर्थाश्च प्रवाहरूपेण । तत्सम्बन्धश्चापौरुषेयः । तत्परिज्ञानं च शक्तिग्रहात् । शक्तिग्रहश्च वृद्धव्यवहारेण । स च कार्यान्वितस्वार्थे । तत्र पदान्येव कार्यान्वितस्वार्थबोधकानि । न त्वखण्डं शब्दतत्त्वम् । नाप्यन्त्यो वर्णः । नापि पदप्रतिपादिताः पदार्थाः । तत्र लौकिकं पदमनुमानरूपम् । न शास्त्रम् ।

असन्निकृष्टार्थं वैदिकमेव शास्त्रम् । तदपि द्विविधमित्युक्तम् । लक्षण-व्यावर्त्यचिन्ता तु अर्थग्रहणेनाभिधेयवचनेन लैङ्गिकं वक्त्रभिप्रायज्ञानमशास्त्र-मित्युक्तम् । असन्निकृष्टार्थमिति पौरुषेयवाक्याभिधेयस्यार्थस्य वक्त्रभिप्राय-निश्चयपुरस्सरं यद्विज्ञानं तन्न शास्त्रमिति । तथाऽर्थवादानां स्वतन्त्राणां सन्निकृष्टार्थपराणां न शास्त्रत्वम् । किं तु विध्यन्तरानुप्रवेशेनैव ।

शब्दग्रहणेन चार्थस्य ज्ञानस्य चाशास्त्रत्वमुक्तम् । तथाहि—प्रकृतौ 'वाससि मिनोति' 'वाससा सोममुपावहरति' इति सोममानमुपावहरणं च विहितम् । **(जै.सू. १०-६-२२)** तत्रैकत्वात्कर्मणो यस्मिन्नेव वाससि सोमो मीयते तेनैवोपावह्रियत इत्यचोदितमपि वासस एकत्वमर्थात्संपन्नम् । विकृतौ त्वहर्गणे पृथक्त्वात्सोमस्य एकस्मिन्नपि वाससि नानाभूतस्यापि सोमस्य मानं शक्यते कर्तुम् । उपावहरणं तु पुञ्जीकृत्य वाससाऽऽनयनम् । तदेकेनाशक्यमिति मानवाससोऽन्यत् तदर्थमुपादीयते । एकत्वं तु प्रकृतावार्थं न शब्दार्थ इति विकृतौ चोदकेन न प्राप्यत इति तत्र वासस एकत्वज्ञानं न शास्त्रमित्युक्तम् । 'आर्थं न चोदकः प्रतिदिशति' इति न्यायात् । विज्ञानमिति न्यायाभासात् वाक्यस्य च वचनव्यक्तिमवधार्य तदर्थज्ञानं न शास्त्रमिति । न हि तच्छब्दविज्ञानात् । यादृशं हि सम्यङ्न्यायावधार्यवचनव्यक्तिकं तादृशमेव शास्त्रमिति ॥

इति श्रीरामानुजाचार्यविरचिते तन्त्ररहस्ये

शास्त्रपरिच्छेदस्तृतीयः ॥

।। शास्त्रप्रमेयपरिच्छेदः ।।

पदवाक्यप्रमाणेषु परां काष्ठामुपागतः ।
जातवेदोगुरुर्यज्वा जयति क्षितिमण्डले ।।

करणंकलेबरमनसां शैथिल्यं सहजमसकृदालोच्य ।
तन्त्ररहस्यं कृतवान् रामावरजः परोपकारार्थम् ।।

अथ शास्त्रप्रमेयं निरूप्यते । तच्चापूर्वरूपं कार्यं लिङादिप्रत्ययवाच्यम् । तदेव च विधितत्त्वम् । कृत्स्नमपि शास्त्रं तत्परमेव । एतच्चाग्रे वक्ष्यते । आचार्यास्त्वन्यथा शास्त्रप्रमेयं विधितत्त्वं च व्याचक्षते । तदुक्तम्—

अभिधाभावनामाहुरन्यामेव लिङादयः ।
अर्थात्मभावना त्वन्या सर्वत्राख्यातगोचरः ।। इति ।।

(तन्त्र. वा. २.१-१)

अर्थात्मा भावना अर्थभावना पुरुषप्रयत्नः तत्प्रवृत्तिरिति यावत् । सा सर्वाख्यातवाच्या । अभिधाभावना शब्दभावना । सा लिङादिवाच्या । ततश्चार्थभावना सर्वाख्यातानां वाच्या । लिङादीनां तु भावनाद्वयमपि वाच्यमित्यर्थः । तन्मतानुसारिभिरन्यथान्यथा विधितत्त्वं व्याख्यातम् ।

तत्र केचिदाहुः—लिङादिप्रयोगानन्तरं पुरुषप्रवृत्तिदर्शनात्तस्याश्चेष्ट-साधनताज्ञानमूलत्वात् तज्ज्ञानस्य च शब्दनिमित्तत्वात् प्रकृत्यर्थस्य प्रत्ययार्थस्य वा इष्टसाधनत्वं तद्वाच्यमिति प्रथमं पार्श्वस्थो व्युत्पित्सुर्निश्चिनोति । तत्रैकप्रत्ययोपादानेन सन्निकर्षातिशयात्प्रत्ययार्थस्य भावनाया एवेष्टसाधनत्वं

लिङादिवाच्यमित्येव निश्चिनोति । एवं च 'स्वर्गकामो यजेत' इत्युक्ते यागभावनेष्टसाधनमित्युक्तं स्यात् । इदमेव प्रवर्तकं विधितत्त्वम् । तदुक्तम्—

पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ।। इति ।।

(**विधिविवेक**. पु. २४३)

एतादृश्या भावनाया भाव्याकाङ्क्षायामपुरुषार्थतया समानपदोपात्तोऽपि धात्वर्थो न भाव्यतयाऽन्वेति । भावनाया विधिप्रत्ययावगतेष्टसाधनत्वव्याघातात् । तच्च व्युत्पत्तिसिद्धम् । तस्मात्पदान्तरोपात्तमपि स्वर्गादिकमेव पुरुषार्थतया भाव्यकोटौ निविशते । धात्वर्थस्त्वाकाङ्क्षादिवशात् करणकोटौ । सन्निधिपठितमितरत्सर्वमितिकर्तव्यताकोटाविति ।

इदं मतं तदीयैरेव दूषितम् ।

तथाहि—

इष्टसाधनत्वं नाभिधेयम् । संविद्विरोधात् । न हि यागानुरक्तो व्यापार इष्टाभ्युपाय इत्यस्माच्छब्दाद्यजेतेत्यस्माच्च तुल्यावगतिर्भवति । भवितव्यं च तया । इष्टसाधनत्वस्यैव विधित्वात् । शब्दान्तरस्य च तत्समानार्थत्वात् । सह प्रयोगाच्च । समीहितसाधनत्ववचनशब्दो विधिशब्दश्च सह प्रयुज्यमानौ दृष्टौ । 'माणवक! सन्ध्यामुपासीनस्य तेऽभ्युदयो भविता । तस्मादुपास्स्व' इति । न च पर्याययोस्सहप्रयोगो दृष्टः । लोकप्रमाणकश्च शब्दार्थनिर्णयः । तस्मान्नेष्टसाधनतावाचित्वं लिङादीनाम् । 'अभिधाभावनामाहुः' इत्यादिश्लोकानुगुण्यं च नास्तीति ।

अन्ये तु—समीहितसाधनत्वं न साक्षाद्वाच्यं येनेदं दूषणं स्यात् । किं त्वपर्यवसानलभ्यम् । तथाहि—लिङादिप्रत्ययस्सुखदुःखपरिहारतदुपायसाधारणं

कार्यमात्रमभिधत्ते । तत्रैव व्युत्पत्तेः । लोके त्रयाणामेव कृतिसाध्यतया कार्यत्वं प्रतिपन्नम् । तस्मिंस्त्वभिहिते भावनारूपायाः क्रियायाः लिङादिवाच्यायाः स्वयं सुखदुःखपरिहाररूपत्वाभावात् पारिशेष्यात्तदुपायत्वं निर्णीयते । तथा च 'कर्तव्यतावचनो भावनायां पुरुषं प्रवर्तयति' इति भूयान् भाष्यवार्तिकयोर्व्यवहारश्चोपपंन्नः । अत्रापि भाव्याकाङ्क्षापरिपूर्तिः पूर्ववदिति । इदमपि मतं श्लोकाननुगुणमिति तदीयैरेवोपेक्षितम् । कार्यतेष्टसाधनतयोर्भेदश्च वक्ष्यते ।

अपरे तु श्रोत्रियाः—लिङादिप्रत्यय एव विधिः । स एव प्रवर्तक इत्याहुः । तदयुक्तम् । तथात्वे तच्छ्राविणस्सर्व एव प्रवर्तेरन् । व्युत्पन्नानां प्रवर्तक इति चेत् कुत्र व्युत्पत्तिः । समीहितसाधनत्व इति चेत्, तर्ह्युपन्यस्तमतादविशेष इति ।

अपरे तु लिङादिप्रत्ययव्यापारो विधिरित्याहुः । कोऽसौ । शब्दभावना । कीदृशी । परप्रेरणात्मिका पुरुषप्रवृत्त्यनुकूला लिङादिप्रत्ययवाच्या तज्जन्या च । 'लिङादयो हि प्रेरणां कुर्वन्ति चाभिदधति च' इति वार्तिककारीयाः । इयमेव चाभिधाभावनामित्यादिश्लोकेनोच्यते । ततश्चाध्ययनविधिपरिगृहीतेषु स्वाध्यायेषु सर्वत्र 'यजेत्' 'जुहुयात्' 'दद्यात्' इत्यादिलिङादिप्रत्ययप्रयोगे 'भावयेत्' इत्युक्तं स्यात् । तस्याश्च किमित्यपेक्षायां समानप्रत्ययोपात्ता पुरुषप्रवृत्तिर्भाव्यतया सम्बध्यते । प्रेरणा हि प्रवृत्तिं भावयति । तत्प्रेरितः खलु पुरुषः प्रवर्तते । ततश्च केनेत्यपेक्षायां लिङादीनां विधेश्च वाच्यवाचकभावसम्बन्धः तत्करणतयाऽन्वेति । अभिहिता हि शब्दभावना प्रवृत्तिं प्रसूते । कथमित्यपेक्षायामर्थवादोदितप्राशस्त्यमितिकर्तव्यतया । अवसीदन्ती हि विधिशक्तिः प्राशस्त्यज्ञानेनोत्तभ्यते । प्रेरणावरोधवलादेवार्थभावनायाः स्वर्गादिकमेव भाव्यतया सम्बध्यते । न तु प्रकृत्युपात्तो धात्वर्थः । अफले प्रेरणानुपपत्तेः । करणाद्यन्वयस्तु पूर्ववदिति ।

एतन्मतमस्मदीयैरेव दूषितम् । तत्र लिङादेस्तादृशो व्यापारो विद्यत इत्यत्र दिव्यदृष्टयो भवन्त एव प्रमाणम् । न तु चर्मचक्षुषो वयम् । शब्दश्रवणानन्तरं भाविनीं प्रवृत्तिं वेत्तीति चेत्, न । तस्यास्त्वन्मते समीहितसाधनता निमित्तम् । अस्मन्मते तु कार्यता ।

किं च शब्दोऽस्मन्मतेऽम्बरगुणः । भवन्मते तु विभु द्रव्यम् । इत्थं हि भवन्मतस्थितिः । वर्णास्तावद्द्रव्यं, न गुणाः । ते च व्यापका नित्याश्च । ध्वनिस्तावत्तद्धर्मः तद्व्यञ्जकः प्रतिवर्णं विलक्षणः क्षणिकश्च । तत्क्रमस्ताव-द्दीर्घत्वादिवद्वर्णेष्वारोपितः । तादृशक्रमविशिष्टा वर्णा एव पदम् । अतः क्रमभेदात्पदभेदः । तद्भेदाद्वाक्यभेदः । तद्भेदाचार्थभेद इति ।

ततश्च कथं तादृशानां व्यापारयोगः । मूर्तद्रव्याश्रितत्वात् । तस्य च लोके वाय्वादय एव प्रेरका दृष्टाः । किं च कथं पुरुषप्रवृत्तिस्तस्या भाव्या । तद्विषयत्वादिति चेत्, न । प्रेरणारूपायास्तस्या योग्यतया प्रेर्यपुरुष एव विषयः । न तु भावना । अयोग्यत्वात् । लोके हि पुरुष एव प्रेर्यते । अतोन तस्यास्तद्विषयत्वम् । किं च सम्बन्धज्ञानस्य वा कीदृशं करणत्वम् । प्रेरणा भावना चैकप्रत्ययवाच्यतया युगपत्प्रतिपन्ने । न तत्रान्यतरवाच्यवाचक-सम्बन्धज्ञानादन्यतरोत्पत्तिर्युक्ता । न च वाच्यवाचकसम्बन्धज्ञानाद्वाच्यो-त्पत्तिर्लोके दृष्टा । भावना च त्वन्मते वाच्या । अपि च प्रेरणा क्रिया । तत्फलं हि प्रवृत्तिः । न हि क्रिया स्वफलप्रसवाय करणमपेक्षते । किं तु स्वोत्पत्तय एव । उत्पन्ना तु सा स्वयमेव फलं प्रसूते । न हि गमनं संयोगविभागारम्भे करणापेक्षम् । अतो न सम्बन्धज्ञानस्य करणत्वम् । प्राशस्त्यस्यापि कथमितिकर्तव्यतात्वम् । तद्धि पुरुषकर्तृकायामेव पुरुषार्थप्रवृत्तौ तत्करणस्य योग्यतया इतिकर्तव्यता भवितुमर्हति । न तु शब्दकर्तृकायां प्रेरणोत्पत्तौ । तत्करणस्यायोग्यत्वात् ।

ननु यत्र यत्रार्थवादश्रुतिस्तत्रास्तु प्राशस्त्यम् । यत्र तु न तत्र कथम् । न हि सर्वत्रार्थवादस्समाम्नायते । ननु तत्राप्यतिदेशतः तत्प्राप्तिरिति चेत्, न, प्रतीतिगौरवात् । ननूपकारमुखेन पदार्थप्राप्तिवत्प्राशस्त्यमुखेन तत्प्राप्तिरिति चेत्, न, अनपेक्षितत्वात् । न ह्युपकारवत्प्राशस्त्यमपेक्षितम् । तदन्तरेणाप्यपूर्वसिद्धेः । प्रवृत्तिस्त्विष्टसाधनताज्ञानात् । विधिशक्तिरपि तावतैवोत्तभ्यते कार्यताज्ञानाद्वा । अर्थवादानां तु क्रत्वीयपदार्थप्राशस्त्यलक्षकतया केवलं विधिविशेषपरत्वमेव । न तु प्रवृत्तिविशेषपरत्वम् । स्तुतश्चास्तुतश्च तावानेव सोऽर्थः न त्वधिकः । अतिदेशकप्रमाणाभावाच्च । प्रकृतिविकृतिभावो ह्यतिदेशमूलम् । नात्र तत्क्लृप्तिः ।

किंच अर्थभावनाया भाव्यत्वमेकप्रत्ययवाच्यत्वात् । तदुक्तम्—

विधिभावनयोश्चैकप्रत्ययग्राह्यताकृतः ।
धात्वर्थात्प्रथमं तावत्सम्बन्धोऽध्यवसीयते ।। इति ।।

(श्लोक.वा.७.७१)

तदयुक्तम् । उभयोरेकप्रत्ययवाच्यत्वस्यैव दुर्घटत्वात् । ननु सर्वाख्यातानां भावनावचनता करोत्यर्थसामानधिकरण्येनाध्यवसीयते । लिङादिषु तु प्रेरणामात्रमधिकम् । करोतिश्च कृतिवाचकः । कृतिश्च प्रयत्नः, सैव भावना । 'जानाति' 'इच्छति' इति प्रयुज्य 'करोति,' 'प्रयतते,' 'प्रवर्तते,' 'भावयति,' चेति चतुर्णां प्रत्येकं पर्यायतया लोके प्रयोगदर्शनात् । युगपत्प्रयोगे पौनरुक्त्याच्च । तथा हि—'किं करोति' पचति, 'किमकार्षीत्' 'अपाक्षीत्,' 'किं करिष्यति' 'पक्ष्यति,' इति सामानाधिकरण्येन प्रश्नोत्तरदर्शनात् करोत्यर्थस्सर्वाख्यातैरभिधीयते इति गम्यते । प्रश्नोत्तरे च समानविषये । सामानाधिकरण्यं चैकार्थनिमित्तम् । अन्यथा करोत्यर्थप्रश्ने आख्यातानां तदुत्तरत्वानुपपत्तेः । तत्र घञादिप्रत्ययप्रयोगे

करोत्यर्थानवगमादाख्यातप्रयोगे च तदवगमादाख्यातार्थता निश्चीयते । केवलाख्यातानां प्रयोगानुपपत्तेः प्रकृत्यंशस्य सहप्रयोगमात्रं, न तु स्वार्थविवक्षयेति ।

तदयुक्तम् । यद्यपि करोतिः प्रयत्नपरः, तथाऽप्यत्र किं करोतीत्यस्य प्रश्नस्य यदि यत्करोति तत्किमिति करोत्यर्थविषयता स्यात्, तदा पचतीत्यस्योत्तरस्य पाकं करोतीत्यर्थता । न चैवं लोकविवक्षा । किं त्वनवगते हि व्यापारविशेषे प्रश्नः । तत्र चोत्तरं पचतीति तद्विशेषविषयम् । सर्वोऽपि प्रश्नः प्रतिवचनं च सामान्यतो ज्ञाते विशेषतश्चाज्ञाते । अत्र च धात्वर्थगोचरे एव ज्ञानाज्ञाने । ततश्च तद्गोचरे एव ते युक्ते । यद्यपि करोतिः प्रयत्नपर एव, तथाऽप्यत्र कस्यचिदभूतस्य भवने अनुकूलस्वभावः करोत्यर्थः । सर्वे च धात्वर्थास्तादृशा इति करोतिना प्रष्टुं निर्देष्टुं च शक्यम् । किं च सप्रयत्नक्रियेषु देवदत्तादिषु ते घटेताम् । निष्प्रयत्नक्रियेषु तु 'किं करोति रथो गच्छति,' इत्यादिषु कथम् । सप्रयत्नेष्वप्यास्ते शेते इत्यादिषु कथन्तराम् । व्यापारमात्रविषयत्वे तु सर्वत्रोपपत्तिः । अतो नाख्यातानां करोत्यर्थता ।

ननु पचतीत्यस्य विवरणं पाकं करोतीति । तत्रापि प्रकृत्यर्थस्य स्फुटत्वात्प्रत्ययार्थस्यैव । ततः करोत्यर्थमाख्यातमिति चेत्, न, तत्रापि धात्वर्थाक्षिप्तकर्तृगतं पचत्यर्थानुकूलमार्थं प्रयत्नमुपादाय विवरणोपपत्तिः । अतो नाख्यातानां भाववचनत्वम् । किं तु धात्वर्थाक्षिप्तकर्तृसंख्यामात्रवाचित्वम् ।

यथाऽऽह भगवान् पाणिनिः—

'द्व्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' (पा. १-४-२१-२२) इति ।

एतच्च मतद्वयसाधारणम् । सर्वाख्यातानां भावनापरत्वं लिङादीनां तु प्रेरणापरत्वं च त्वन्मतेऽधिकम् । अस्मन्मते तु लिङादीनां कार्यपरत्वं

भावनापरत्वं च । किं तु कार्योपसर्जनतया तत्परत्वम् । न तु प्राधान्येन । अत एव अस्मन्मते भावना न वाक्यार्थः । किं तु कार्यमेव । न हि कृतिमनभिधाय कार्यमभिधातुं शक्यते । कृतिसम्बन्धि हि कार्यम् । नचानेकार्थता दोषः । तथैवावगमात् ।

ननु दण्डीत्यत्र प्रत्ययो दण्डं नाभिधत्ते । अथ च तद्विशिष्टपुरुषप्रतीतिः । एवमिहापि कृत्यनभिधानेऽपि तद्विशिष्टाभिधानं स्यात् । मैवम् । न ह्यप्रतीते दण्डे तद्विशिष्टपुरुषप्रत्ययः । अस्ति च तत्र प्रकृतिभूतो दण्डशब्दः । स च तत्प्रत्यायकः । न चेह तथा । प्रकृतीनां भावार्थमात्रपरत्वात् ।

किं च पुरुषो हि चेतनः कार्यं लिङादिभिरवबुध्यते । न चासौ परकृतिसम्बन्धि स्वयं कार्यतया बोद्धुमलमिति स्वकीयेत्यभिधानमेषितव्यम् । अतो न दण्डिन्यायावसरः । यद्यपि कर्त्राक्षेपवत्तद्वारा प्रयत्नाक्षेपोऽपि संभवेत्, तथाऽपि तदानीमपूर्वं तदधीनसिद्धिकं नावगम्यते । प्रयत्नाभिधाने तु तदवच्छिन्नतयाऽभिधीयमानं तदायत्तसिद्धिकमवगम्यते । नान्यथा । न च कृत्यनवच्छिन्नं स्वरूपमात्रेणाभिहितमपूर्वं कृतिमाक्षिपेत् । पूर्वमवगतसम्बन्धं हि वस्तु वस्त्वन्तरेणाक्षिप्यते । न च शब्दमन्तरेणापूर्वस्य प्रयत्नसम्बन्धे कारणमस्ति । अतः कथं तदाक्षेपकम् । कृतिसाध्यैकस्वभावस्यापूर्वस्य स्वरूपेणाभिधानमप्यशक्यम् । अथः कार्याभिधायिनां लिङादीनां कृत्यभिधान-मवर्जनीयमेव । किं तूपसर्जनतयेति सिद्धम् ।

अपरे तु 'अभिधाभावनामाहुः' इति श्लोकार्थानुगुण्यं पश्यन्तः प्रेरणात्मको लिङादिव्यापर एव विधिरित्याहुः । न चात्र प्रमाणाभावः । सर्वशब्दानाम-भिधाव्यापाराङ्गीकारात् । व्युत्पन्नस्य शब्दास्तावदर्थप्रत्यायकाः । अस्ति च तत्रार्थप्रतीत्युन्नेयोऽभिधाऽभिधानो व्यापारः । कोऽसौ । तत्तच्छब्दगोचरं ज्ञानं

तत्तच्छब्दजनितो वा संस्कारः । तद्योगी हि शब्दोऽर्थप्रतीतिं जनयति । तदुक्तम्—'शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम् । पूर्वपूर्ववर्णसंस्कार-सचिवोऽन्त्यो वा वर्णो वाचकः' । (शा.भा. १-१-५) इति । यद्वस्तु यमेवागन्तुकधर्मं प्राप्य कार्याय पर्याप्तं, स एवागन्तुकधर्मस्तस्य व्यापार इति ज्ञानसंस्कारयोर्न शब्दव्यापारत्वानुपपत्तिः ।

ननु ज्ञानमेवाभिधाव्यापारश्चेत्, ज्ञानं प्रति कर्मीभूतश्शब्दः कथमेनं व्यापारमपेक्ष्य करणं स्यात् । देवदत्तश्शब्देनार्थमवगच्छतीति हि प्रयोगो दृश्यते । उच्यते—न हि व्यापाररूपमात्रापेक्षया कर्तृकर्मकरणादिकारकव्यवस्था । किं तु व्यापारस्वरूपैक्येऽपि तस्यैव व्यापारस्य तत्तत्फलावच्छेदमपेक्ष्य । तथा हि—यदा तु तदेव शब्दकर्मकं ज्ञानमर्थप्रतिपत्तिलक्षणफलावच्छिन्नं, तेन च शब्दो व्याप्यते तदाऽन्यार्थप्रवृत्तव्यापारव्याप्यत्वाच्छब्दः करणम् । क्रियाफला-श्रयत्वादर्थस्तु कर्म । तच्च ज्ञानं तदानीमभिधेति व्यपदेशं लभते । तत्र तस्य व्युत्पत्तेः ।

यदा तु व्यापारं प्रति स्वातन्त्र्यविवक्षा तदा कर्ता शब्दोऽर्थमभिधत्ते । यदा तु स एव शब्दो ज्ञानेन विषयीक्रियते, तदाऽर्थप्रकाशलक्षणफलभाक्छब्दः कर्म 'शब्दं जानाति' । तेन(न)हि तदानीं ज्ञानमभिधाव्यपदेशभाक् । किं तु ज्ञानमित्येवोच्यते । अभिधाशब्दस्य तत्राव्युत्पत्तेः ।

परशुवत् यथा उद्यमननिपतनं प्रति कर्मीभूतः परशुः । यदा त एवोद्यमननिपतने द्वैधीभावलक्षणफलावच्छिन्ने, ताभ्यां च परशुर्व्याप्यते, तदा अन्यार्थप्रवृत्तव्यापारव्याप्यत्वात्परशुः करणम् । क्रियाफलाश्रयत्वात् काष्ठं तु कर्म । ते चोद्यमननिपतने तदानीं छिदिव्यपदेशं लभेते । तत्र तस्य व्युत्पत्तेः । यदा तु तमेव व्यापारं प्रति स्वातन्त्र्यविविक्षा, तदा कर्ता, परशुः काष्ठं

छिनत्तीति । यदा तु त एवोद्यमननिपतने ऊर्ध्वाधोदेशसंयोगलक्षणफलावच्छिन्नवाचिभ्यामुद्यच्छतिनियच्छतिभ्यामभिधीयेते तदा तु तत्तत्संयोगफलभाक्परशुः कर्म, परशुमुद्यच्छति नियच्छतीति । तस्मात्तत्तद्धातुवाच्यानां व्यापाराणां प्रातिस्विकस्वरूपैक्येऽपि तत्तत्फलावच्छेदभेदात्तत्कारकव्यवस्थाहेतुत्वं तत्तच्छब्दवाच्यत्वं च द्रष्टव्यम् ।

कारकव्यवस्थाया व्यापारस्वरूपमात्रापेक्षित्वे चलत्यभिहिता क्रिया गच्छतीत्यभिहितेव सकर्मिका स्यात् । गच्छतिर्वाऽकर्मकस्स्यात् । प्रयोगव्यवस्था च न स्यात् । एवं संस्कारलक्षणेऽप्यभिधाव्यापारे यथासम्भवं योज्यम् । तत्र कर्तृकर्मकरणान्येव परस्परप्रविभक्तानि कारकाणि । क्रियायां स्वतन्त्रः कर्ता । क्रियाफलशालि कर्म । अन्यार्थप्रवृत्तक्रियाव्याप्यं करणमिति । संप्रदानापादानाधिकरणानि तु कर्त्रादिकारकसङ्कीर्णस्वभावानि । तथा हि—कर्त्राश्रयः कर्माश्रयो वाऽधिकरणम् । देवदत्तः कट आस्ते, स्थाल्यामोदनं पचति, इति । कर्मोद्देश्यं तु संप्रदानम् । उपाध्यायाय गां ददाति, इति । कर्तृकारकावधिमात्रं त्वपादानम् । वृक्षात्पर्णं पतति, इति यथासम्भवं द्रष्टव्यम् ।

अस्तु सर्वशब्दानामभिधाशब्दवाच्यो व्यापारः । ततः किम् । इदमुच्यते— तत्र प्रकृत्यंशस्येव प्रत्ययांशस्यापि तादृशो व्यापारः समस्त्येव । लिङादीनां तु योऽसौ व्यापारस्स एव विधिः । स च पुरुषप्रवृत्तिभवनफलत्वाद्भावनेति गीयते । तथा च भवनफलभाक्प्रवृत्तिः कर्म । प्रवृत्तिं भावयतीति । लिङादिस्तु पूर्ववत्करणं कर्ता वा स्यात् । यदा तु प्रवृत्त्यवच्छिन्नस्स एव व्यापारः प्रवर्तयतिनाऽभिधीयते तदा प्रवृत्तिफलभाक्पुरुषः कर्म 'पुरुषं प्रवर्तयति,' इति । तथा चैक एव लिङादीनामभिधाव्यापारः तत्तत्फलावच्छेदभेदाद्भावना प्रवर्तनेत्युच्यते ।

ननु कथं लिङादीनां पुरुषप्रवर्तकत्वम् । न हि कश्चिदभिधामात्राव-गमात्प्रवर्तते । समीहितसाधनताऽवगमाधीनत्वात्तस्याः । तदभिधाने च संविद्विरोधात् । सत्यम् । साधनत्वं प्रवर्तकम् । न त्वस्य लिङाद्यभिधेयत्वं येन विरोधस्स्यात् । प्रत्ययश्रवणानन्तरं प्रवृत्तिश्च दृश्यते । तस्माद्यदभिधाने सा संभवति तदभिधेयम् । प्रवर्तना चाभिधेया । तदभिधाने तत्संभवात् । प्रवृत्तिहेतुता च प्रवर्तना । सा च प्रवृत्तेरिष्टसाधनताज्ञानमन्तरेण न संभवतीति प्रेरणात्मको विधिस्समानप्रत्ययवाच्याया भावनाया इष्टसाधनत्वमपि कल्पयति । अतो लिङादिव्यापारस्य पुरुषप्रयत्नभवननिमित्तत्वाद्भावनात्वम् । तत्प्रवर्तकत्वात्प्रवर्तनात्वं च युक्तम् । एवंविधविध्यवरुद्धभावना पुरुषार्थभावनेति निश्चीयते । तस्यैव भाव्यत्वात् । न ह्यपुरुषार्थफलस्य व्यापारस्य प्रवर्तनारूपत्वं हि विधेयत्वम् । अप्रवृत्तप्रवर्तकश्च विधिः । अत एव फलस्याविधेयत्वात् श्येनाग्नीषोमीयवैषम्यविध्यन्वयस्संभवति । निष्फले तदनुपपत्तेः । अतो भावनाया एव प्रथमं विधिसंस्पर्शाद्विधेयत्वम् । तद्वारा च तदितरेषां करणेतिकर्तव्यतानां पश्चात् । फलस्य तु भाव्यतया साध्यत्वेऽपि चोदनाप्रतिपाद्यतया चोदनालक्षणत्वेऽपि न विधेयत्वम् । तत्र विधिसंस्पर्शमन्तरेण रागादेव प्रवृत्तिसंभवात् । विध्यनुष्ठाप्यत्वं हि विधेयत्वम् । अप्रवृत्तप्रवर्तकश्च विधिः । अत एव फलस्याविधेयत्वात् श्येनाग्नी षोमीयवैषम्यमपि । अवशिष्टं सर्वं **शास्त्रार्थसङ्क्षेपे** व्यक्तीभविष्यति । तदेवमभिधाव्यापारमेव प्रवर्तनारूपेण लिङादयोऽभिदधति । तद्बलादेवेष्टसाधनत्वमपि बोधयेयुः । एवदेवाभिप्रेत्योक्तम्—

"कर्तव्यतावचनः प्रत्ययः । (**विधि. वि.** पु. २४३)

श्रेयस्साधनता ह्येषां नित्यं वेदात्प्रतीयते ।" इति च ।

(**श्लो.** वा. २-१४)

उभयत्रापि भावनाद्वये आकाङ्क्षात्रयपरिपूर्तिः पूर्ववदिति ।

अस्मिन्मते स्वव्यापाराभिधानं दुरुपपादमिति मन्वाना आचार्यमततत्त्ववेदिनः प्राहुः—इष्टसाधनत्वमेव विधितत्त्वम् । न च संविद्विरोधः । स्वरूपेणानभिधानात् । प्रवर्तनारूपेण तु शब्दोऽभिधत्ते । प्रवृत्तिहेतुश्च धर्मः प्रवर्तना । स च प्रेषणमध्येषणमभ्यनुज्ञानमिष्टसाधनत्वं च । तेषु चतुर्ष्वपि प्रवर्तनासामान्यमनुगतम् । ततश्च तदभिदधता लिङादिशब्देन निर्विशेषस्य तस्यासंभवाद्वेदे च पुरुषधर्माणां प्रैषादीनामसंभवात्पारिशेष्यात्कर्तुरिष्टसाधनतैव बोध्यते । सामान्यवाचित्वान्नानेकार्थत्वं, लाघवं च । नाऽत्र स्वव्यापारभिधानदोषः, तदतिरेकात्प्रवर्तनायाः । नापि संविद्विरोधः, इष्टसाधनत्वातिरेकात्तस्याः । न सहप्रयोगविरोधश्च, प्रवृत्तिनिमित्तभेदात् । साधनशब्दस्तु साधनत्वमेव साक्षादभिधत्ते । लिङादयस्तु तदेव प्रवर्तनावेषेणाभिदधति । तस्मात्प्रवर्तनावेषापन्नं भावनागतेष्टसाधनत्वमेव लिङादिवाच्यं विधितत्त्वमिति सिद्धम् ।

अस्यास्तु पुरुषप्रवृत्त्यर्थं प्रवृत्तेः प्रवृत्तिस्स्वर्गादिस्थानीया भाव्या । प्रथमं विधिप्रत्ययप्रतिपन्नायाः प्रवृत्तेः पश्चादुत्पत्त्यविरोधात् । समीहितफलसाधनत्वज्ञानं परार्थप्रवृत्तव्यापारजन्यतया यागादिवत्करणम् । प्राशस्त्यज्ञानं त्वितिकर्तव्यता । श्लोकानुगुण्यमपि । तथा हि तस्यायमर्थः—अभिधीयत इत्यभिधा प्रवर्तना । सैव पुरुषप्रवृत्तिं भावयत्युत्पादयतीति भावना । तामाहुरिति । तस्माद्विध्यवरुद्धा भावनैव वाक्यार्थः । सैव शास्त्रप्रमेयमिति सिद्धम् ।

अत्रेत्थं शास्त्रार्थान्वयप्रकारसङ्क्षेपः—लिङादीनां भावना विधिश्चोभयमप्यर्थः । तत्र भावना—प्रयत्नः । विधिस्तु पूर्वोक्ता शब्दभावना प्रवर्तनात्मिका । तयोरेकप्रत्ययोपादानात्प्रथममन्वयः । स च भाव्यभावकभावेनोत्पाद्योत्पादकभावेन पर्यवस्यति । विध्यन्वयबलाद्भावनायास्समीहितसाधनत्वं चावर्जनीयम् ।

एवं च तस्यास्स्वत आकाङ्क्षितं भाव्यं फलमेवावतिष्ठते । ततश्च 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र भावना समानपदोपादानात्सन्निहितमपि धात्वर्थमतिलङ्घ्य पदान्तरोपात्तं फलमेवावलम्बते । ततश्च भाव्यान्विता भावना तत्सिद्ध्यर्थं करणमपेक्षते । तथा च धात्वर्थः करणतयाऽन्वेति । तस्य च क्षणिकस्य कालान्तरभाविफलसाधनत्वमपूर्वमन्तरेण न सम्भवतीत्यवान्तर-व्यापारतया तत्कल्प्यते । ततश्चोभयान्विता सा कथमनेन फलं कुर्यादितीतिकर्तव्यतामपेक्षमाणाऽवतिष्ठते । इत्थमधिकारवाक्ये प्रधानभावनायामाकाङ्क्षात्रयवत्यां 'आग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां च, ऐन्द्रं दध्यमावास्यायाम् ऐन्द्रं पयोऽमावास्यायाम्, अग्नीषोमीयमेकादशकपालं पूर्णमासे' उपांशुयाजमन्तरा यजति, इति तत्सन्निधौ यानि वाक्यान्याम्नातानि तेषु द्रव्यदेवतासम्बन्धस्य मानान्तरानाघ्राततया तद्विधिप्रत्यये कल्पिते तेन च सम्बन्धेन यागे कल्पिते सत्येवं वाक्यार्थस्सम्पद्यते—एतत्कालीनैर्यागैः किंचिच्छ्रेयो भावयेदिति । एताश्चावान्तरभावनाः तत्किं श्रेयो भाव्यमिति विशेषमाकाङ्क्षमाणा एवावतिष्ठन्ते । यानि च तत्र 'व्रीहिभिर्यजेत, यवैर्यजेत' इत्यादीनि वाक्यानि तेष्वपि व्रीह्यादिविशिष्टेन यागेन किंचिच्छ्रेयो भावयेदिति भावना भाव्यविशेषाकाङ्क्षिण्य एव । यानि च 'समिधो यजति,' तनूनपातं यजति इत्यादिप्रयाजादिवाक्यानि तेष्वपि समिदादिनामकैर्यागैः किंचिच्छ्रेयो भावयेदिति । एताश्चावान्तरभावनाः तत्किं श्रेय इति भाव्यविशेषमाकाङ्क्षमाणा एवावतिष्ठन्त इति स्थितिः ।

यानि तु 'व्रीहीनवहन्ति, व्रीहीन्प्रोक्षति, तन्डुलान्पिनष्टि, पुरोडाशं प्रथयति, कपालेषु श्रपयति' इत्यादीनि तेष्वपि द्वितीयाश्रुत्या व्रीह्यादीनां भाव्यत्वावगमादवघातादिभिर्व्रीह्यादीन् भावयेदिति वाक्यविपरिणामेऽपि व्रीहीणामपुरुषार्थतया समीहितत्वानवगमात् भाव्यांशे भावनास्साकाङ्क्षाः । तथा

'भिन्ने जुहोति, 'स्कन्ने जुहोति, 'इत्यादिषु प्रायश्चित्तवाक्येष्वपि भिन्नादिशब्दानां यौगिकत्वेन प्रकृतनिवेशितया प्रकृतिकपाले भिन्ने हविषि च स्कन्ने सति होमेन समीहितं भावयेदिति साकाङ्क्षा एव भावनाः ।

एवं च परस्परमाकाङ्क्षावशात्फलवाक्येनेतरेषामेकवाक्यतया युगपदन्वये प्रसक्ते तत्र प्रथमा(ममाग्नेया)दिवाक्येषु कालसम्बन्धप्रतीतेः दर्शपूर्णमास-शब्दवाच्यत्वसम्भवादिदमधिकारवाक्येनैकवाक्यं भवति । आग्नेयादियागषट्केन दर्शपूर्णमासनामकेन फलं भावयेदिति । 'व्रीहीभिर्यजेत' इत्यादिवाक्येषु तु यागद्रव्यलाभेऽपि देवताया अलाभेन पृथग्यागत्वानुपपत्तेः फलवाक्येनैकवाक्यतायां वाक्यद्वयेऽप्येक एव यागः फलितो भवति । तस्य च यागस्य फलवाक्य एव श्रेयस्साधनत्वेन समीहिततया प्राप्तत्वाद्विधिवाक्यगता भावना समानपदोपात्तं तमेव यागं भाव्यतयाऽवलम्बते । व्रीहींस्तु करणतया ।

ततश्चैवं वाक्यार्थो भवति—यो दर्शपूर्णमासयागः स्वर्गसाधनत्वेन निरूढः, तं व्रीहिभिः भावयेदिति । एवश्चोत्पत्तिशिष्टपुरोडाशावरुद्धे यागे व्रीहीणां साक्षात्साधनत्वेनानन्वयादर्थात्तत्प्रकृतितयाऽन्वयः स्यात् । अवहननादिवाक्येषु तु दर्शपूर्णमासवाक्यैकवाक्यतायां व्रीहिभिर्यजेतेत्यादिविनियोगवाक्यपर्यालोचनया व्रीहीणां दर्शपूर्णमासशेषत्वप्रतीतेः समीहितत्वानिर्वाहाद्दर्शपूर्णमाससम्बन्धिनो व्रीहीनवहननेन भावयेदिति वाक्यार्थो भवति । अत एव यत्र द्रव्यविनियोगो नास्ति तत्र समीहितत्वानिर्वाहात् द्वितीयाश्रुतौ सत्यामपि न द्रव्यभाव्यता । किं तु करणत्वमेव क्रियां प्रति भवति । यथा 'सक्तून् जुहोति' इति ।

एवम्, 'उलूखलमुसलाभ्यामवहन्ति' इत्यवहननाङ्गवाक्येष्वपि व्रीहीनवहन्तीत्यनेन परम्परया दर्शपूर्णमासशेषत्वेनावहननस्य विनियोगेन समीहितत्वनिर्वाहात्तदेकवाक्यतायां दर्शपूर्णमाससम्बन्धितया निरूढमवहन-

नमुलूखलमुसलाभ्यां सम्पादयेदिति वाक्यार्थो भवति । एवं व्रीहिशब्देन दर्शपूर्णमाससम्बन्धित्वस्यैव लक्षितत्वाद्यवानामपि तत्सम्बन्धित्वाविशेषात्तेष्वप्यवहननमुपदेशत एव भवति ।

एवं 'दास्यवहन्ति पत्नीव' इत्यादिवाक्यान्वयोऽपि निरूढानिरूढभावेन द्रष्टव्यः । समिदादिवाक्येषु तु फलवाक्यैकवाक्यतायां सत्यामेवं वाक्यार्थो भवति– समिदादियागैः फलभावनां भावयेदिति । तस्याश्च भाव्यत्वं साक्षान्न संभवतीत्यवान्तरापूर्वद्वारा तत्करणोपकारमुखेन पर्यवस्यति । भिन्ने जुहोतीत्यादिषु प्रयाजादिन्यायेन फलभावनाया भाव्यत्वेनान्वये सति तस्यां भाव्यत्वं स्ववाक्यश्रुतनिमित्तसम्बन्धानुसारेण निमित्ते सत्युपजायमानस्य क्रतुवैगुण्यस्य प्रत्यवायस्य परिहारेण निर्वहतीति कल्प्यते । अत एवैतेषु प्रयाजादिष्विव न यागमात्राधिकृतोऽधिकारी । नापि स्वतन्त्रनैमित्तिकेष्विव केवलनिमित्तवान् । अपि तु यागेऽधिकृतो निमित्तवानित्यधिकृताधिकारित्वम् । तथा 'आर्ज्यमुत्पुनाति' 'पयो दोग्धि' 'दध्यातञ्च्यात्,' 'शाखां छिनत्ति,' 'शाखया वत्सानपाकरोति इत्यादिवाक्येष्वपि अनेनैव प्रकारेणान्वयो द्रष्टव्यः । अत एवाज्यौषधपयोधर्माणामुत्पवनावहननातञ्चनदोहनादीनां सन्निपातिधर्माणां प्रधानवाक्यैकवाक्यताया दर्शपूर्णमाससम्बन्धित्वलक्षणाया अविशेषेऽपि श्रुताज्यव्रीह्यादिनिरूढकारकद्वाराऽन्वयस्यापरित्यागादवान्तरापूर्वभेदाच्चासङ्करेणान्वयसिद्धिः । प्रयाजादीनां त्वारादुपकारिणामुपकारवैषम्याभावात्सर्वकरणशेषतयाऽन्वयः । अत एव तेषां तन्त्रेण सकृदेवानुष्ठानम् ।

तथा 'यस्य पर्णमयी जुहूः, यस्य खादिरस्स्रुवो भवति' इत्याद्यनारभ्याधीतवाक्येष्वपि प्रधानभावनाकाङ्क्षायाः प्राकरणिकैरेवाङ्गैरुपशमेऽपि स्वाकाङ्क्षावशादव्यभिचरितदर्शपूर्णमासक्रतुसम्बन्धित्वेन जुह्वादीनां समीहितत्वाद्दर्शपूर्णमास-

सम्बन्धिनो जुह्वादीन् पर्णखदिरादिद्रव्येण भावयेदिति सर्वक्रतुप्रकृतिभूतदर्शपूर्णमासयोरेवान्वयः । एवं च प्रोक्षणावहननपेषणप्रधान(प्रथन)कपालश्रपणचतुरवदानादिसंस्कृतेन च व्रैहेण पुरोडाशद्रव्येण उत्पवनदोहनातश्चनादिसंस्कृतैश्चाज्यादध्यादिभिर्यथायोगं सम्पादितेन प्रयाजाद्युपकृतेन प्रायश्चित्तप्रशमितवैगुण्येन प्रयोगदशायां तत्तन्मन्त्रस्मारितपदार्थवर्गेण दर्शपूर्णमासशब्दवाच्येन यागषट्केन फलं भावयेदिति महावाक्यार्थस्सम्पन्नो भवति । एवं प्रकृत्यात्मकयोः पशुसोमयागयोरपि प्रधानाङ्गवाक्यानामन्योन्यान्वयप्रकारो द्रष्टव्यः ।

अत्र प्रथमं प्रधानवाक्ये भावनायाः प्रवर्तकैकरसविध्यन्वये केवलायास्तस्या अनुष्ठातुमयोग्यतया श्रुत्यादिभिर्योग्यांशत्रयान्वयपर्यन्तं सा न पर्यवस्यति । इयमवस्था विधिप्रक्रम इत्युच्यते । तथा च योग्यतया वाक्येन भाव्यान्वयः । एकपदोपादानश्रुत्या करणान्वयः । यथायोगं श्रुतिप्रकरणादिभिरितिकर्तव्यतान्वयः । तत्रारादुपकारकाङ्गवाक्येषु विध्यन्वितायाः प्रयाजादिभावनायाः प्रकरणेन साक्षात्प्रधानभावनाया एव भाव्यतयाऽन्वयः । सन्निपातिषु तु प्रकरणसहितैः श्रुत्यादिभिः प्रधानसम्बन्धिनामेव व्रीह्यादीनां भाव्यतयाऽन्वयः । उभयत्रापि समानपदोपादानेन धात्वर्थस्यैव करणतयाऽन्वयः । द्रव्यगुणजातिवाक्येषु धात्वर्थस्य भाव्यत्वात् तृतीयाश्रुत्या द्रव्यादीनामेव करणतयाऽन्वयः । तत्राङ्गेष्वितिकर्तव्यतान्वयस्तु प्रायिक एव । अत्र सर्वत्र साक्षाद्भावनान्वितस्य विधेस्तदंशान्वयस्तु भावनाद्वारक एव । तत्र भाव्यांशस्य साक्षात्परम्परया वा समीहिततया स्वयमेव तत्र रागात्प्रवृत्तेः अप्रवृत्तप्रवर्तकविध्यन्वयायोगात् न तत्र विधिव्यापारः । करणेतिकर्तव्यतांशयोरेव भावनाद्वारा तद्व्यापारः । अत एव 'श्येनेनाभिचरन्यजेत' इत्यभिचारलक्षणस्य हिंसात्मकस्याविधेयतया 'न हिंस्यात्' इति निषेधगोचरतया श्येनस्य प्रत्यवायकरणत्वम् ।

स च विधिरुत्पत्तिविनियोगाधिकारप्रयोगभेदात्क्रमेण चतुरवस्थो भवति । तत्र प्रवर्तनैकस्वभावत्वाद्विधेः प्रयोजकत्वं स्वाभाविकम् । अन्यास्तु तिस्रोऽवस्थास्तदनुपपत्त्या तत्सिद्ध्यर्थं भवन्ति । तथाहि—विधिः प्रतीतस्सन् प्रथमं स्वस्याप्रवृत्तप्रवर्तकत्वसिध्यर्थं श्रुत्यादिभिर्भावनाविशेषणतया प्रतिपन्नानां धात्वर्थद्रव्यादीनां प्रमाणान्तराप्राप्तिं कल्पयति । प्रमाणान्तरप्राप्ते तु तेनैव प्रवृत्तिसिद्धेः स्वस्य प्रवर्तकत्वशक्तिविलोपात् । द्रव्यादीनां तु सामर्थ्यादेव क्रियासाधनतया पक्षे मानान्तरप्राप्ततया नियमोंऽशेऽप्राप्तिं कल्पयति । तथा हि–'यजेत' इत्यादौ यत्किञ्चिद्द्रव्यसाध्यतया व्रीह्यादिद्रव्यस्य प्राप्तावपि नियमेन प्राप्तिं प्रमाणान्तराप्राप्तां कल्पयति । एवं गुणादिविधिष्वपि । यत्र तु क्रियापि प्राप्तैवावहननादिषु तत्रापि नियमं कल्पयति । तस्यां दशायामुत्पत्ति-विधिरित्युच्यते । अस्य च शब्दान्तराभ्यासादयः सहायाः ।

यदा त्वफलसाधनेषु तेषु पुरुषस्य प्रवर्तयितुमशक्यतया तत्साधनता कल्प्यते, तदा विनियोगविधिः । विनियोगो नाम, अङ्गाङ्गिभावावगमः । समीहितमङ्गि । तत्साधनमङ्गम् । तत्र च फलभावनायास्साक्षात्फलसाधनतया तत्सम्बन्धादितरेषां करणेतिकर्तव्यतानां परम्परया । तत्र च विनियोगे श्रुत्यादयस्सहायाः । श्रुत्यादिसहितो विधिरेव विनियोगविधिरित्युक्तं भवति ।

यदा च फलसाधनत्वबलेनानुष्ठेयमिति बुद्धिर्भवति तदाऽधिकारविधिः । विध्यधीना ह्यनुष्ठेयबुद्धिः । यदा त्वनुष्ठापयति तदा प्रयोगविधिरिति । अस्य चार्थवादजन्यप्राशस्त्यं मन्त्रभागावगतपदार्थस्मरणं श्रुत्यर्थपठनाद्यवगतक्रमः कालादयश्च सहायाः ।

अत्र तु सर्वेषामेव विधीनां प्रवर्तकैकरसतया स्वत एवावस्थाचतुष्टयकल्पना-सामर्थ्येऽपि विध्यन्तरसिद्धमुत्पत्यादिकं सम्भवति चेत्तदेवाश्रित्य स्वयं प्रवर्तते ।

न तु तत्कल्पयति । यथा दर्शपूर्णमासविधिराग्नेयादीन् । नियोगविधिरपि स्वकर्मणामन्यतो विनियोगसिद्धिः (द्धेः) स्वयं तदुत्पत्तिमात्रपरः । न तु विनियोगपरः । यथा वा अङ्गवाक्येष्वपि यथार्हं श्रुत्यादिसहितैः स्वस्वविधिभिरेवोत्पत्तौ सिद्धायां साक्षात्परम्परया वा प्रधानभावनाशेषतया विनियोगे च सिद्धे प्रधानभावनासम्बन्धात्तद्द्वारा प्रधानविधिशक्तेरेवाङ्गेषु सङ्क्रमात्तेनैवाङ्गे अधिकारानुष्ठानयोस्सिद्धेः न पृथगङ्गविधयोऽधिकारप्रयोगपराः । प्रधानविधिरप्यङ्गोत्पत्तेरङ्गानां स्वशेषतया विनियोगस्य चाङ्गविधिभिरेव सिद्धत्वात् तदुपजीव्य स्वयं प्रयोगाधिकारमात्रपरः । प्रधानस्य फलशेषतया विनियोगस्य त्वन्यतोऽसिद्धतया स्वयमेव करोति । यत्र तूत्पत्त्यादयो न विध्यन्तरसिद्धास्तत्र स्वयमेव स्वसम्बन्धिनामुत्पत्त्यादिचतुष्टयं करोति—यथा विकृतौ 'सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः' इति विधिः । नात्राग्नेयादिवत्, 'सौर्यश्चरुर्भवति' इति पृथगुत्पत्तिः श्रूयत इति तामपि कल्पयति ।

इत्थमंशत्रयान्वितायां भावनायां प्रतिपन्नायां तस्यानुष्ठानयोग्यतया तत्र विधिः पुरुषं प्रवर्तयतीति प्रथमप्रतीतो विधिभावनान्वयस्तदा पर्यवसितो भवति । इयं च दशा विधिपर्यवसानमित्युच्यते । अत्र भावनाया एव प्रथमं विधेयत्वम् । तद्द्वारा क्रियायाः । तद्द्वारा च द्रव्यादीनाम् । अत्र च यथा प्रधानविधिः फलसिद्ध्यर्थं करणमङ्गानि चानुष्ठापयति तथा तथा फलगोचराऽपि विध्याक्रान्ता प्रधानभावना स्वयं साक्षात्फलं निष्पादयितुमशक्नुवाना तत्र तत्रावतरन्ती तत्तन्निष्पादयति । तदानीमङ्गविधीनां तत्तद्भावनानां च न यथा प्रवर्तकत्वं नैव निष्पादकत्वं चेति । इत्थं प्रकृतावन्वयक्रमः ।

विकृतिषु तु भाव्यकरणान्वितायां विकृतिभावनायां प्रतिपन्नायां कथमनेन फलं साधयेदिति करणोपकाररूपेतिकर्तव्यताकाङ्क्षायां वचननामधेय-चोदनालिङ्गैरतिदेशप्रमाणैः प्रथमं प्राकृत उपकारे तदनु तज्जनकेषु पदार्थवर्गेषु

समर्पित......(तेषु प्राकृत)पदार्थानां वैकृतभावनाशेषत्वमपि 'सोमेन यजेत' इत्यत्र यागविधिनैव पदान्तरोपस्थितस्य सोमस्यापि शेषत्ववत्प्रधानविधित एव भवति । प्रकृतावङ्गविधिभिः प्रकृतिभावनाशेषत्वस्यैव प्रतीतेर्विनियोगस्य च विधिप्रमाणकत्वात् वैकृतप्रधानविधिरेव ना(प्राकृता)ङ्गानां वैकृतभावना-शेषत्वेन विनियोजकः । प्रकृतौ अङ्गप्रधानयोः परस्पराकाङ्क्षावशादन्वयः । विकृतौ त्वङ्गानां प्राकृतसम्बन्धेनैव निराकाङ्क्षतया प्रधानाकाङ्क्षावशादेव परस्परान्वयः । उद्दि(पदि)ष्टेषु त्वङ्गेषु प्रधानस्य प्राकृताङ्गैरेव निराकाङ्क्षतयाऽङ्गाकाङ्क्षा-वशादेवान्वयः । प्रकृतौ प्रधानभावनायाः प्रथमं करणोपकाररूपेतिकर्तव्यता-काङ्क्षायामपि तदुपस्थापकशब्दाभावाच्छ्रुतैरङ्गैः प्रथमं शेषशेषिभावेनान्वये सति तन्निर्वाहार्थं पश्चादुपकारकल्पनम् । विकृतौ तूपकारस्य पदार्थानामप्युपस्थाप-कशब्दाभावादाकाङ्क्षाक्रमेण प्रथममुपकारान्वयः । पश्चात्पदार्थानाम् । अत एव करणोत्पत्त्यपूर्वैः परमापूर्वे जनयितव्ये सामग्रीमेलनरूपस्य सर्वाङ्गनिष्पाद्यस्या-खण्डस्योपकारस्य प्रथममतिदेशः । पश्चादारादुपकारेष्वपूर्वरूपाणां सन्निपातिषु तु कारककिंचित्काररूपाणां द्रव्येषु तु साक्षात्क्रियानिष्पत्तिरूपाणा-मवान्तरोपकाराणामतिदेशः । तदनु पदार्थानाम् । यत एवोपकारपूर्वकः पदार्थातिदेशः अतस्तात्सिद्ध्यर्थं देवतान्तरद्रव्यान्तर-मन्त्रान्तरयुक्तासु विकृतिषु मन्त्रसंस्कारसाम्नां वैकृतदेवताद्रव्यमन्त्रशेषत्वलक्षण-प्रयोगविकार ऊहस्सिद्धो भवति । यथा 'अग्नये जुष्टं निर्वपामि' इति मन्त्रस्य सूर्ययुक्तायां विकृतौ तत्पदप्रक्षेपेण वैकृतदेवतासम्बन्धः । तथा व्रीहियुक्तानामवहननप्रोक्षणादीनां च संस्काराणां नैवारचरुयुक्ते यागे नीवारद्रव्यसम्बन्धः । तथा गीतिविशेषरूपाणां साम्नामृगन्तरयुक्ते यागे तत्सम्बन्धः । यथा 'कवतीषु रथन्तरं गायति' इति अकवतीऋगाश्रितस्य रथन्तरलक्षणस्य गीतिविशेषस्य कवतीऋक्सम्बन्धः । अस्मिन्नपि उपा(ऊहे)प्रकृतिषु यैरङ्गैर्येन प्रकारेणोपकारस्सम्पादितः तैस्तेनैव

प्रकारेण देवतान्तरादियुक्तां विकृतिमुपकुर्यादित्येवंरूपचोदकवाक्यसहायो वैकृतविधिरेव प्रमाणम् । यत्र तु कृष्णलादिष्ववहननेन तथा चरुषु पेषणेन प्राकृत उपकारस्सम्पादयितुमशक्यः, तथा दर्भाणां स्थाने शरैः प्रस्तरितव्यमिति प्रत्याम्नानं, तथा नार्षेयं वृणीत इति प्रतिषेधश्च, तत्र सामान्यप्रवृत्तस्यापि चोदकस्य सङ्कोचात् विकृतावन्व(तावनन्व)यलक्षणो बाधस्सिद्धो भवति ।

एवं प्रकृतिभावनानां षड्विधेनोपदेशेनांशत्रयान्वये विकृतिभावनानां तु भाव्यकरणांशयोः स्ववाक्यश्रुतिभ्र(क्र)मान्वये श्रुत्यादिभिरेवोपदिष्टैश्चाङ्गैरन्वये सति सर्वाङ्गविशिष्टास्तास्ता भावनाः प्राकृतो वैकृतश्च विधिः श्रुत्यर्थपठनादिप्रमाणावगतक्रमेण बहुकरणेषु यागेष्वारादुपकारकाणामुपकारैक्यात्तन्त्रेण देशकालकर्तृभेदे तु तेषामेवावृत्त्या तंत्तत्फलकामिनं प्रत्यवायपरिहारपरं पुरुषं वानुष्ठापयतीति । तस्मात्प्रेरणात्मा लिङादिप्रत्ययवाच्यो विध्यर्थोऽनुष्ठापकतया कृत्स्नशास्त्रप्रमेयमिति सिद्धम् । अयं शास्त्रार्थसङ्क्षेपः । इत्थमेव **न्यायरत्नमालाव्याख्याने नायकरत्ने**ऽस्माभिरभिहित इति ।

तदेतदनुपपन्नम् ।—यदि त्वभिहितो विधिर्लिङादिप्रत्ययवाच्यः स्यादेवम् । न त्वेतदेवम् । लिङादीनां कार्यपरत्वात् । तत्तद्भाद्युपवर्णितं विधिपरत्वं तावत्तदीयैरेवोपेक्षितम् । दूषितं चास्माभिः । यस्तु चरमः पक्षः भावनागतेष्टसाधनत्वमेव प्रवर्तनावेषेण लिङादयोऽभिदधतीति सोऽप्यनुपपन्नः—लिङादीनां भावनावाचित्वस्याधस्तादेव निराकृतत्वात् । प्रवर्तनावेषेण अभिधानं तु दूरे । अत एव तदभिमतशास्त्रार्थान्वयप्रकारोऽप्यनुपपन्नः । अन्यथाऽन्वयश्च वक्ष्यते । अतोऽन्यदेव शास्त्रप्रमेयं विधितत्त्वं च मानान्तरापूर्वमपूर्वात्मकं कार्यम् । तत्रैव लिङादीनां व्युत्पत्तेः ।

ननु कथं तत्र व्युत्पत्तिः । प्रत्यक्षादिप्रमाणगोचरेऽर्थे वाक्येन प्रतिपादिते

सति तत्र व्यवहारात् व्युत्पत्तिर्युक्ता । मानान्तरागोचरे त्वपूर्वे कथं व्यवहारः । कथन्तरां तत्र व्युत्पत्तिः । कथन्तमां च लिङादयस्तत्पराः । न च वेदवाक्यादेव तदवगमः । इतरेतराश्रयत्वात् । तस्य बोधकत्वे सति तत्र व्यवहाराच्छक्तिग्रहः तद्ग्रहे च बोधकत्वमिति ।

किं च क्रियाकार्यपरत्वे शक्तिकल्पनालाघवमप्यस्ति । तथाहि—धातुरेव कार्यभूतां क्रियां ब्रूते । तथाभूतार्थवाचिनस्तु धातोः परे लिङादयः केवलं कर्तृसंख्यामात्रवाचिनस्स्युः । लिङादिश्रवणे तु तथाभूतार्थतया धातुः प्रवृत्त इत्यवगमे सति कार्यभूतधात्वर्थावगमश्च सम्भवति । यथा लडादिभ्यो वर्तमानाद्यध्यवसायः । तेऽपि वर्तमानेऽर्थे वर्तमानाद्धातोर्विहिताः । न तु स्वयं कालवाचका इति ।

अत्रोच्यते—लिङादीनां कार्यपरत्वं तावदविवादम् । स्वर्गकामपदान्वय-सामर्थ्यात्त्वपूर्वकार्यपराः । तथाहि—स्वर्गकामो यजेतेत्यादौ स्वर्गयागा(कामा)दि-पदं न कर्तृमात्रपरम् । किं तु नियोज्यपरमिति षष्ठाध्यायस्याद्येऽधिकरणे निर्णीतम् । नियोज्यस्स उच्यते, यो ममेदं कार्यमिति स्वसम्वन्धितया कार्यमवैति । न चान्यव्यापाराभिनिर्वर्त्यमन्यः स्वसम्बन्धितया कार्यत्वेन वेदितुं क्षमते । तस्मान्ममेदं कार्यमिति प्रत्येता नियोज्यः । तदुक्तम्—

नियोज्यस्स च कार्यं यस्स्वकीयत्वेन बुध्यते । इति ।

(प्रकरण प. पु. १८२)

बोद्धृतयाऽन्वयो नियोज्यान्वयः । स च लोकेऽपि व्युत्पन्नः । तथाहि—पुष्टिकामः क्षीरं पिबेदित्यादौ पुष्टिकामः क्षीरपानं मया कार्यमिति बोद्धृतयाऽन्वेति । तथा 'देवदत्त पच' इति सम्बोधनप्रयोगे देवदत्तः पाकं कार्यतया प्रत्येति । स्वर्गशब्दश्च सुखविशेषवाचकः । तत्साधने स्रक्चन्दनादौ

प्रयोगात् । न च तत्र वस्तुस्वरूपनिबन्धनः प्रयोगः । सुखाव(प)गमे प्रयोगादर्शनात् । सुखसाधनवचनता तदनभिधाने घटेत । उभयाभिधाने च गौरवम् । तदभिधानाभ्युपगमे च तत्साधनताया लक्षणैव । अर्थवादेषु च दुःखासम्भिन्नचिरोपभोग्याभिलाषोपनेयप्रीतिश्रवणाच्च तत्परत्वम् । सा च प्रीतिः देहान्तरभोग्या । कामनायोगाच्च तस्य साध्यत्वम् । न हि सिद्धे कामना । तेन साध्यस्वर्गविशिष्टो नियोज्यः तदेव कार्यं बोद्धुमलं यत्स्वकाम्यसाधनम् । तत्र क्रियैव कार्यतया बोधिता चेत् क्षणभङ्गुरायास्तस्याः कालान्तरे देहान्तरे भोग्यस्वर्गसाधनत्वायोगान्नियोज्यान्वयो विघटेत । तस्मा(त्त)दुत्तीर्णं लिङादिवाच्यम् । तदुक्तम्—

तस्मान्नियोज्यसम्बन्धसमर्थं विधिवादिभिः ।
कार्यं कालान्तरस्थायि क्रियातो भिन्नमुच्यते ।।

(प्रकरण प. पु. १८५)

ननु 'दर्शपूर्णमासाभ्यां यजेत, ज्योतिष्टोमेन यजेत' इति साधनत्वश्रुति-बलात्क्रियैव कालान्तरस्थायिनी स्यात् । यदि वा कर्मशक्तिः । किमपूर्वेण । मैवम्—प्रतीतसिद्ध्यर्थमविरुद्धं कल्पनीयम् । क्रियास्थायिता च प्रमाणान्तर-विरुद्धा । शक्तिमति कर्मणि च नष्टे शक्तेरवस्थानं विरुद्धम् ।

ननु तर्हि यागादिक्रिया देवताराधन भूता कार्यतया लिङादिभिरुच्यताम् । तया आराधिता सा देवता प्रसन्ना कालान्तरे कर्तारमेनं फलेन योजयति । 'स एनं प्रीतः प्रीणाति,' 'स एवैनं भूतिं गमयति' इत्याद्यर्थवादाश्च श्रूयन्ते । 'यज—देवपूजासङ्गतिकरणदानेषु' इति पूजार्थे च यजिस्स्मर्यते । देवतोद्देशेन द्रव्यत्यागो याग इत्यभियुक्तोपदेशश्चेति । तदेतद्धर्ममीमांसका न सहन्ते । वदन्ति च प्रमाणविरोधम् । नानादेशवासिभिर्यजमानैः युगपत्प्रवृत्तकर्माराध्यत्वं विग्रहवत्या

देवताया दुर्घटम् । विग्रहशून्यायाश्च सार्वज्ञ्यं दुरुपपादम् । एतत्सर्वं देवताधिकरणे प्रपञ्चितम् ।

तर्हि यजमानपुरुषसंस्कारतया क्रिया कार्यतयोच्यताम् । संस्कृतश्च पुरुषः कालान्तरे फलभाग्भविष्यतीति । मैवम्—संस्कारत्वे प्रमाणाभावात् । न हि यागादयः पावमानीवत्पुरुषसंस्कारतया श्रूयन्ते । ननु क्रियैव कार्यतयोच्यताम् । तस्याश्च फलसाधनत्वश्रवणान्यथानुपपत्त्या तज्जन्यं कालान्तरस्थायि फलोदयानुगुणमात्माश्रयं किञ्चिदपरं कल्प्यताम् । मा भूत्तस्य लिङ्वाच्यतेति । मैवम्—न च फलानुगुणेनान्येन कल्पितेन क्रियायाः फलसाधनतोपपादिता स्यात् । साक्षाच्छ्रुतं फलसाधनत्वं च न स्यात् । अन्यसाधनत्वात् । न हि साधनसाधनं(तस्य साधनं) स्यात् । न च कल्पितेन श्रुतसाधनत्वनिर्वाहः । कर्मणो नष्टत्वात् । तस्माल्लोके क्रियाकार्यपरतया व्युत्पन्नानां नियोज्यान्वयवशात्तदन्यकार्यपरत्वं युक्तम् । न केवलं वृद्धव्यवहारादेव व्युत्पत्तिः । प्रसिद्धपदसमभिव्याहारादपि लोके दृश्यते । वेदेऽपि 'यवमयश्चरुर्भवति, वाराही उपानहावुपमुञ्चते' इत्यत्र यववराहशब्दयोः प्रियङ्गौ दीर्घशूके वायसे सूकरे च प्रयुज्यमानयोरर्थवादसमभिव्याहारात् दीर्घशूके सूकरे च शक्तिनियमो दृष्टः । 'यत्रान्या ओषधयो म्लायन्तेऽथैते मोदमानास्तिष्ठन्ति' इति यवसन्निधावर्थवादः । तत्रेतरास्वोषधीषु पाकान्म्लानासु दीर्घशूकानामेव मोदमानत्वम् । तदुक्तमाचार्यैः—

फाल्गुनेऽन्यौषधीनां तु जायते पत्रशातनम् ।
मोदमानास्तु दृश्यन्ते यवाः कणिकशालिनः ।। इति ।

(तन्त्रवा-१-३-४)

तथा 'वराहं गावोऽनुधावन्ति' इत्यर्थवादः । वत्सबुद्ध्या गवां सूकरं प्रत्येवानुधावनं युक्तम् । नतु काकमिति ।

एकदेशिनस्त्वलौकिकेऽपि कार्ये व्युत्पत्तिमाहुः । तथा हि—लोके क्रियाकार्यताज्ञानात्प्रवृत्तावपि कार्यताज्ञानमेव प्रवृत्तिनिमित्तम् । न तु क्रियास्वरूपम् । तस्यांशस्य प्रवृत्तावनुपयोगादिति निष्कृष्यालौकिककार्याभिधानं लोकत एव व्युत्पन्नमिति । तदयुक्तम् । यद्यप्येवं कार्यमात्रपरत्वं वक्तुं शक्यं तथाऽपि तस्य कार्यत्वस्य लोके क्रियाश्रितस्यैव प्रवर्तकत्वदर्शनात्तदाश्रितमेव प्रतीयेत । न त्वलौकिकम् । यथा जातिमात्रस्य शब्दवाच्यत्वेऽपि तस्य व्यक्त्याश्रितत्वदर्शनात्तदाश्रितता न प्रतिक्षिप्यते । किं च मानान्तरावेद्ये कार्ये व्युत्पित्सुः कथं व्यवहारं जानीयात् । तदज्ञाने च कथं शब्दशक्तिग्रह इति ।

एवमुक्तेन न्यायेनापूर्वकार्याभिधायित्वे सिद्धे लोके क्रियाकार्यत्वं लाक्षणिकम् । उभयत्र शक्तिकल्पनायां गौरवात् । या ह्यनुष्ठीयमानाऽपूर्वसाधनमतः क्रियाकार्यत्वमपूर्वकार्यत्वमसङ्गतमिति शक्यते तल्लक्षयितुम् । लौकिकानां तु प्रतिपत्तिप्रयोगौ मानान्तरागोचरेऽपूर्वे न संभवतः । तस्य लोकव्यवहारागोचरत्वात् । अतस्तेषां मुख्यार्थानवधारणान्म्लेच्छानां यववराहशब्दयोः प्रियङ्गुकाकयोरिव क्रियाकार्यत्व एव मुख्यत्वाभिमानो लक्षणानभिमानश्च । मुख्यार्थकुशलानां तु मुख्यामुख्यविवेको भवति । ननु क्रियाकार्य एव मुख्यता अन्यत्र लक्षणा स्यादिति चेन्न, मानान्तरागोचरेण तेन सम्बन्धापरिज्ञानात्तत्र लक्षणानुपपत्तेः । किं च यदि लिङादयः क्रियाकार्यपराः अप्रमाणकमेवापूर्वं स्यात् । अत एवोभयानुगतकार्यमात्रपरत्वमनुपपन्नम् । सामान्यस्य विशेषपर्यवसानावश्यम्भावेन प्रसिद्ध एव पर्यवसानं न त्वप्रसिद्धे । ततश्चापूर्वप्रतीतिरेव न स्यात् । इत्थं कामाधिकारेऽपूर्वव्युत्पत्तेः नित्यनैमित्तिकनिषेधाधिकारेषु लिङादीनां तत्परत्वं सिद्धम् । मुख्यार्थलाभात् । नित्याधिकारानुगुण्येन क्रियाकार्यपरत्वाभिधानं कामाधिकारेऽनुपपन्नमिति सर्वत्रैकरूप्यमेव स्यात् ।

तस्मादपूर्वकार्याभिधायिनो लिङादय इति सिद्धम् ।

ननु इष्टसाधनताज्ञानात्प्रवृत्तिः । न कार्यताज्ञानात् । तदुक्तम्—

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।। इति ।

(श्लो.वा. ५. सम्बन्ध. ५५)

प्रयोजनं फलम् । तस्यैव लिङादिवाच्यत्वम् ।

ततश्च क्रियागतेष्टसाधनता भावनागतेष्टसाधनता वा लिङ्वाच्या । इष्टविशेषसमर्पकं च विध्युद्देशगतं स्वर्गादिपदम् । साधनत्वान्यथानुपपत्त्या चापूर्वं कल्प्यम् । न तु वाच्यमिति ।

इदं परिहृतप्रायमपि परिहरामः—तृप्तिसाधनेऽतीते वर्तमाने च भोजनादौ प्रवृत्तेरदर्शनात् भविष्यत्स्वपि फलसाधनेषु सामुद्रिकशास्त्रविदाख्यातेषु शुभसूचकेषु लक्षणेष्वप्रवृत्तेः तथा दैविकेषु भविष्यत्फलसाधनेषु वृष्ट्यातपादिष्वप्रवृत्तेष्टसाधनता प्रवृत्तिप्रयोजिका ।

अत्राह कश्चित्—इष्टसाधनतैव कार्यता नापरा । सैव प्रवृत्तिहेतुरिति । तन्न । अतीतस्य वर्तमानस्य भोजनादेर्भविष्यतश्च वृष्ट्यादेरिष्टसाधनताऽस्ति । न च कार्यता । तेनान्या कार्यता अन्या चेष्टसाधनता । किं तु क्लेशरूपस्य कर्मणः कार्यत्वं फलसाधनत्वाधीनम् । न तु साक्षात् । यद्यप्येकवस्तुनिवेशिता द्वयोः, तथाऽपि भेदोऽस्त्येव । फलं प्रत्युपायत्वं फलसाधनत्वम् । कृतिं प्रति प्रधानत्वं तदधीनसत्ताकत्वं च कार्यत्वम् । न तु कृत्यधीनसिद्धिमात्रम् । तच्च कृतेः प्रवृत्तिः । किं तु सुखं सुखसाधनं वा । सुखसाधने कर्मणि कार्यत्वावगमः तत्साधनत्वनिबन्धनः । न तु स्वतः प्राधान्येन । अतो न तत्कृतिं प्रति प्रधानम् । सुखं हि सर्वः कार्यतयाऽवैति न तु फलसाधनत्वमपेक्षते । तेन साधनतोत्तीर्णा कार्यता । न त्विष्टसाधनतैव ।

तच्च कार्यं लोके प्रत्यक्षानुमानवेद्यम् । कृतिर्हि मानसप्रत्यक्षवेद्या । तत्साध्यत्वमनुमानात् । विशिष्टप्रयोजनताऽपि प्रयत्नस्य प्रत्यक्षवेद्यैव स्वयमेव प्रवृत्तौ । वाक्यमूलप्रवृत्तावपि तादृशं कार्यज्ञानमेव प्रवृत्तिप्रयोजकम् । न त्विष्टसाधनताज्ञानम् । क्रियावाचिभ्यो धातुभ्यः परे विहिता लिङादयो लोके क्रियाकार्यमात्रपराः । वेदे तु प्रसिद्धनियोज्यसमभिव्याहारादपूर्वपराः । तेनान्या कार्यता अन्या साधनता इति स्थितम् । एतेनापूर्वस्यापि फलसाधनतयैव कार्यत्वं ब्रुवाणाः निरस्ताः । फलवदपूर्वस्यापि साधनत्वमन्तरेण कार्यतोपपत्तेः । अत एव नित्यनैमित्तिकाधिकारेषु केवलं कार्यत्वमेव । न तु साधनत्वम् ।

ननु तर्हि इच्छा प्रवृत्तिहेतुः । जानाति इच्छति इति हि न्यायशास्त्रमर्यादा । सा लिङादिवाच्या स्यात् । मैवम् । इच्छा ह्युत्पन्ना प्रवृत्तिनिमित्तम् । न तु ज्ञाता ।

स्यादेतत्—लोके लिङादीनां प्रेषणामन्त्रणाध्येषणेषु प्रयोगात् तेषां च प्रवृत्तिनिमित्तत्वात् तत्परत्वमेव स्यात् । न तु कार्यपरत्वम् । मैवम् । कार्यमेव हि तत्तत्प्रतिसम्बन्धिभेदेन प्रैषादिव्यपदेशं लभते । तथा हि—प्रवर्त्यपुरुषापेक्षया ज्येष्ठेन पुंसा प्रतिपाद्यमानं कार्यं प्रैषः । तथा समेनामन्त्रणं हीने चाध्येषणमिति । ननु कामाधिकारे नियोगस्य फलसाधनत्वाभ्युपगमात् फलस्यैव लौकिकफलवत्कृत्युद्देश्यतया प्राधान्याभ्युपगमात्तस्यैव वाक्यार्थत्वं युक्तम् । मैवम्–न हि नियोज्यविशेषणतया प्रतिपन्नस्य तस्य प्राधान्यम् । किं तु स्वतस्साध्यतया प्रतिपन्नस्य नियोगस्यैव । न ह्यस्मन्मते फलस्य भाव्यत्वम् । किं त्वपूर्वस्यैव । फलं तु नियोज्यविशेषणम् । प्रकारान्तरेणान्वयासम्भवात् । न हि तस्य भाव्यतयाऽन्वयः । अपूर्वस्यैव भाव्यस्य स्वतो लब्धत्वात् । तस्मान्नियोगस्य कार्यतानिर्वाहार्थमेव स्वविषयानुष्ठानप्रवृत्तये स्वनियोज्यस्य फलं साधयति स्वामिवत् । यथा स्वामी स्वसंविधानार्थमेव गर्भदासस्योपकरोति, तथा

नियोगोऽपीति न प्राधान्यपदच्युतिः । तदुक्तम्—

आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये ।
कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव नः ।। इति ।

(प्रकरण. प.पु. १९०)

एवं चापूर्वफलयोः प्रधानोपसर्जनभावात् द्वयोरपि साध्यत्वेनैकतो विधानाच्च न साध्यद्वयम् । अत एव न वाक्यभेदश्च ।

ननु फलस्य कथं प्रकारान्तरेणान्वयासम्भवः । उच्यते । तथाहि प्रथममपूर्वमेव ममेदं कार्यमिति बोद्धृतया नियोज्यत्वेनान्वेति स्वर्गकामः पुरुषः । स पश्चात्तत्सिद्धये तत्साधने कर्मणि मयाऽनुष्ठेयमिदं कर्मेत्यधिकारितया । कर्मणि मादर्थ्यज्ञानमधिकारः । ऐश्वर्यमिति यावत् । तदनुतिष्ठन् कर्तृतया । इत्येकस्यैव तिस्रोऽवस्थाः क्रमभाविन्यः । तत्र नियोज्यत्वं नियोगे । इतरदवस्थाद्वयं कर्मणि ।

न चाविशिष्टो नियोज्यः । अत एवाश्रुतनियोज्ये आकाङ्क्षावशान्नियोज्याध्याहार तद्विशेषणतया फलपरिकल्पनम् । तथाहि 'विश्वजिता यजेत' इत्यत्र लिङाऽपूर्वं कार्यतया प्रतीयते । तस्य च कार्यत्वं स्वतोनुष्ठातुमशक्यतया विषयानुष्ठानमन्तरेण न सम्भवतीति तदनुष्ठाता कर्ताऽऽक्षिप्यते । कर्तृत्वं चाधिकारमन्तरेण न सम्भवति । यो हि नियोगं ममेदं कार्यमिति जानाति, स एव तदनुतिष्ठति । स चाधिकारो न नियोज्यत्वमन्तरेण । यो हि मदीयमिदं कर्मेति जानाति, स एतत्साधनं कर्म मदीयकार्यसाधनतया मदर्थमित्यध्यवस्यति । न च साऽविशिष्टा भवितुमर्हति तद्विशेषणतया पशुपुत्रान्नाद्यादिनानासुखसाधनेषु अनुवृत्तस्सुखसामान्यलक्षणः सर्वापेक्षितस्स्वर्गः परिकल्प्यते । यद्यपि श्रुतनियोज्यस्थलेऽपि नियोगस्य नियोज्याकाङ्क्षा कर्त्रधिकारप्रणालिकयैव तथाऽपि तत्र नियोज्यस्य साक्षाच्छ्रुतत्वात्प्रथमं तेनान्वयः । तदपि तत्सिद्धयेऽ-

धिकारिकर्तृभ्यामिति आकाङ्क्षाक्रममनादृत्यैवान्वयः। अश्रुतस्थले तु त्रयाणामप्यश्रुतत्वाविशेषादाकाङ्क्षाक्रमेणैव कर्त्रधिकारिनियोज्यान्वय इति स्थितिः। यतो नियोज्यान्वयः कर्त्रादिप्रणालिकया, अतो यत्रान्यतोऽनुष्ठानलाभः तत्र न नियोज्यकल्पनं, यथाऽध्ययनविधौ। स ह्यध्यापनविधिप्रयुक्तस्वविषयानुष्ठानो न नियोज्यमपेक्षते। अध्यापनविधिश्चाध्ययनमन्तरेणाध्यापनासम्भवात् अध्ययनमपि प्रयुङ्क्ते। यथा वा उत्तरक्रतुविधिप्रयोज्यमाधानम्। यथा वा प्रयाजादिविधयः। ते हि प्रधानविध्यनुष्ठापितस्वविषया न पृथगधिकारिणं नियोज्यं कल्पयन्तीति।

ननु विश्वजिदादिवन्नित्यनैमित्तिकनिषेधाधिकारेष्वपि फलं किमिति न कल्प्यते। किं च कामाधिकारे नियोज्यस्य स्वविषयानुष्ठानसिद्ध्यर्थं नियोगः फलं तस्य साधयतीत्युक्तमिति तन्न्यायेनात्रापि फलं स्यात्। नैवम्। न हि कामाधिकारे नियोगस्य फलसाधनत्वात्प्रवर्तकत्वम्। किं तु कार्यत्वादेव। फलं तु श्रुतत्वादनुमन्यते। लोके फलसाधनत्वमपि कार्यतयाऽवगमार्थमेवोपयुज्यते। न तु प्रवृत्तये। सा तु कार्यतावगमादेव। साक्षात्फलस्यापि कार्यतयाऽवगम्यमानस्यैव प्रवृत्तिहेतुत्वम्। नित्येषु च निरपेक्षाच्छब्दादपूर्वं कार्यतया प्रतीयते। नियोज्यश्च स्ववाक्येष्वेव लब्धः। 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादौ जीवनवान् 'पुत्रे जाते यदष्टकपालः' इत्यादौ पुत्रजननवान्, 'न कलञ्जं भक्षयेत्' इत्यादौ निषेध्यानुष्ठाने प्रवृत्तः। जीवनादिकं च नियोज्यविशेषणम्। अविशिष्टस्य नियोज्यत्वासम्भवात्। अतस्तत्र निरपेक्षं कार्यमेव स्ववाक्यश्रुतं नियोज्यं स्वविषयानुष्ठानाय प्रयुङ्क्ते। विश्वजिदादौ तु नियोज्यस्याश्रवणाद्विशिष्टस्य तस्य परिकल्पनमिति। [ननु] नित्यनैमित्तिकाधिकारेषु परैः प्रत्यवायपरिहारस्य भाव्यतयाऽन्वयोऽप्यनुपपन्नः।

ननु शब्दात्प्रतीताऽपि कार्यता निष्फलत्वादनुमानेन बाध्यतां, विमतमकार्यं

फलासाधनत्वात्' इति । न । आगमविरोधेऽनुमानानुदयात् । लिङादिप्रत्ययश्च कार्यतयाऽपूर्वं बोधयतीत्युक्तम् । तर्हि कार्यतावगतावपि निष्फलत्वात्तत्र न प्रवर्तत इति चेत्, कामाधिकारे फलसाधनतावगतावपि तत्र कश्चिन्न प्रवर्तते किं कर्तव्यम् । एतावानेव प्रमाणव्यापारः, यत्स्वार्थप्रदर्शनमात्रम् । ननु कामाधिकारेऽनुष्ठानाभावे फलं न सिध्येत् । तच्चानिष्टम् । नित्येषु तु किं स्यात् । विधिसिद्धिर्न स्यात् । ततः किमनिष्टम् । तदेवानिष्टम् । तस्यैव पुरुषार्थत्वात् । अत एव कामाधिकारेऽपि विधिसिद्धिः प्रयोजनम् । फलसिद्धिस्तु नान्तरीयकी । ननु कथं तदसिद्धिरनिष्टम् । तत्सिद्धौ स्तुवन्तस्तदसिद्धौ गर्हमाणाः शिष्टा एवात्रोत्तरप्रदातारः । तदसिद्धावकृतार्थं मन्यमानं स्वकीयमन्तः करणं वा । तस्मात्कार्यमेव प्रधानम् । तदेव वाक्यार्थः । लिङादयस्साक्षात्तत्पराः । इतराण्यपि तत्तत्प्रकरणपठितानि वाक्यानि तत्तत्कार्यान्वितस्वार्थपराणि । सर्वपदानां कार्यान्विते व्युत्पत्तेः ।

तथा हि—तत्तत्प्रकरणपठितानां पदानां नानाप्रकारेणान्वयः । केषाञ्चित्करणतया केषञ्चिन्नियोज्यतया केषाञ्चिदितिकर्तव्यतया केषाञ्चिन्नामधेयतया केषाञ्चिदनुष्ठेयावस्थपदार्थस्मारकतया केषाञ्चित्स्तावकतया प्रगीतानां स्तोत्रमन्त्राणां गुणिनिष्ठगुणप्रकाशकतया अप्रगीतानां शस्त्रमन्त्राणामपि तथाऽन्वयः । प्रैषमन्त्राणां तु परप्रत्यायकतयेति यथायोगमन्वयो द्रष्टव्यः । अतः कृत्स्नो वेदः कार्यपरतयैव प्रमाणम् ।

इदमेव कार्यं मानान्तरागोचरत्वादपूर्वमिति स्वात्मनि पुरुषं नियुञ्जानो नियोग इति गीयते । तदेव स्वप्रकरणपठितपदार्थजातं स्वशेषतया गृह्णन् ग्राहक इति गृहीतं पदार्थवर्गं श्रुत्यादिभिर्वा स्वातन्त्र्येण वा द्वारशेषतया विनियुञ्जानो विनियोजक इति । तत्र श्रुत्यादिविनियोगचिन्ता तृतीये । चतुर्थे तदेव स्वशेषतया गृहीतं पश्चात् द्वारशेषतया च विनियुक्तमितिकर्तव्यताकलापं कदाचित्करणं

चानुष्ठापयन् प्रयोजक इति च ग्राहकत्वविनियोजकत्वप्रयोजकत्वावस्थाः क्रमभाविन्यः । तास्त्वधिकारापूर्वस्यैव । न त्वङ्गप्रधानोत्पत्त्यपूर्वाणाम् ।

क्वचिन्निरुक्तिशक्तस्याप्यप्रयोजकत्वं यथा—काम्यज्योतिष्टोमापूर्वप्रयुक्त्या स्वविषयानुष्ठानसिद्धौ प्रासङ्गिकस्य नित्यज्योतिष्टोमापूर्वस्य । तच्च प्रयोजकत्वं व्यवस्थयैव । नित्यनैमित्तिकाधिकारापूर्वस्य करणांशे इतिकर्तव्यतांशे च । कामाधिकारापूर्वस्य त्वितिकर्तव्यतांशे । करणांशे तु फलरागादेव प्रवृत्तेर्न तत्र प्रयोजकत्वमप्रवृत्तवर्तनस्वभावत्वाद्विधेः । अत एव 'श्येनेनाभिचरन् यजेत' इत्यत्र अभिचारापरपर्यायमरणसाधनहिंसारूपस्य श्येनयागस्य करणस्य रागमूलप्रवृत्तिविषयस्य विध्यनुष्ठाप्यत्वाभावेन 'न हिंस्यात्' इति प्रतिषेध-गोचरस्यानर्थत्वम् । अग्नीषोमीयादिहिंसायास्तु यागाङ्गत्वेन विध्यनुष्ठाप्यत्वान्न तत्र निषेधशास्त्रप्रवृत्तिरिति ततो वैषम्यम् । परमते त्वभिचारापरपर्यायस्य हिंसात्मकस्य मारणरूपस्य फलस्यैव निषेधशास्त्रगोचरत्वादनर्थत्वम् । न तु करणस्य । तस्य विधेयत्वात् । न हि विधिस्पृष्टा प्रवृत्तिरनर्थाय कल्पते ।

क्वचिदवान्तरापूर्वस्यापि परमापूर्वाधीनं प्रयोजकत्वम् । यथा 'मन्द्रं दीक्षणीयायामनुब्रूयात्' इत्यत्र ज्योतिष्टोमाङ्गस्य दीक्षणीयाद्यपूर्वस्य वाङ्नियमं प्रति । यद्यपि सर्वत्र परमापूर्वमेव प्रयोजकं स्वतः कार्यत्वात् तथापि दीक्षणीयां प्रति वाङ्नियमस्य शेषतया विनियोगबलादवान्तरापूर्वद्वारैव परमापूर्वस्य प्रयोजकत्वमिति तस्यापि प्रयोजकत्वव्यपदेशः ।

आग्नेयादिकरणोत्पत्त्यपूर्वाणां तु परमापूर्वं प्रति करणतयैवान्वयात् तस्यैव साक्षात्प्रयोजकत्वे सम्भवति द्वारद्वारितया प्रयोजकत्वकल्पनाया अयुक्तत्वान्न स्वाङ्गं प्रति परमापूर्वायत्तमपि प्रयोजकत्वम् ।

'व्रीहीनवहन्ति' 'तण्डुलान्पिनष्टि' इति विहितयोर्हन्तिपिनष्ट्योस्तु 'प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति, 'प्रोक्षिताभ्यां दृषदुपलाभ्यां पिनष्टि,' इति विहितं स्वाङ्गभूतं प्रोक्षणं प्रति तयोर्लौकिकतया निर्ज्ञातोपायसाध्यत्वान्न परमापूर्वायत्तमपि प्रयोजकत्वम् । दीक्षणीयापूर्वस्य त्वलौकिकतया न निर्ज्ञातोपाय-साध्यत्वमिति वाङ्नियमप्रयोजकत्वम् । इत्थं नियोज्यान्वयवशाल्लिङादीना-मपूर्वपरत्वमभिहितम् ।

स चान्वयः प्रयोजकापूर्वस्यैव, कृत्युद्देश्यतया प्रतीतेः । अध्ययनाङ्गप्रधा-नोत्त्पत्यपूर्वाणां तच्छून्यानामेवाभिधानम् । तथा हि—अध्ययनविधेरध्यापन-विधिप्रयुक्त्यैवानुष्ठानलाभान्नियोज्यशून्याभिधानम् । अङ्गोत्पत्तिनियोगा अपि ग्राहकगृहीतप्रयाजादिविषयत्वादधिकारनियोगत एव लब्धस्वविषयानुष्ठाना-स्सिध्यन्तीति न तेषु नियोज्यान्विताभिधानम् । तथा प्रधानोत्पत्तिनियोगा अप्यधिकारनियोगाक्षिप्त विषयानुष्ठानेनैवाप्तसिद्धय इति न तत्र नियोज्यापेक्षा । यथा ह्यपूर्वप्रतीतौ नियोज्यः प्रतीत्यनुवन्धी, एवं विषयोऽपि । न ह्यविषयकमपूर्वं प्रत्येतुं शक्यम् । किं तु नियोज्यान्वयः प्रायिकः । विषयान्वयस्तु नियत एव । अधिकारापूर्वप्रधानाङ्गोत्पत्त्यपूर्वाणां विषयनियतत्वात् । 'यजेत,' 'जुहुयात्,' 'दद्यात्' इत्यादिषु सर्वाण्यपि कार्याणि यागकार्यं होमकार्यं दानकार्यमिति यागादिभावार्थावच्छिन्नमेव प्रतीयते । अतः प्रकृत्यर्थभूतो भावार्थ एव विषयत्वेनान्वेति ।

ननु 'यजेत' इत्यादौ लिङादिप्रत्ययेन केवलं कृतिस्तत्साध्यमपूर्वं च परस्परान्वितं युगपदमभिधीयते । प्रकृत्या तु केवलं भावार्थः । तस्य कथमुभयावच्छेदकत्वम् । आकाङ्क्षादिपरामर्शेनेति ब्रूमः । तथा हि—कृतिसाध्यं कार्यम् । तच्च कृति(ते)रीप्सिततमम् । कृतिश्च प्रयत्नरूपो व्यापारः । स च प्रत्यात्मं मानसप्रत्यक्षवेद्यः । स च भवितर्यपूर्वे प्रयोजकस्य भावयितुरात्मनो

व्यापारत्वाद्भावनेत्युच्यते । तदुक्तम्—

"भवत्यर्थस्य कर्तुः प्रयोजकव्यापारो भावना ।" इति ।

(प्रकरण. प. पु. १७४)

तस्य च तथाविधस्य नूनं केनचिद्भाव्येन वस्तुनाऽवच्छेदो वक्तव्यः । न ह्यनवच्छिन्नः प्रयत्नस्सम्भवति । अपूर्वस्य च नावच्छेदकत्वम् । तस्य साक्षात्तन्निर्वर्त्यत्वाभावात् । अतस्तत्साध्यभूतः प्रकृत्यर्थो भावार्थ एव कृतिमवच्छिन्दन् कार्यमप्यवच्छिनत्ति । कृत्यवच्छेदद्वारा कार्यावच्छेदकत्वं विषयत्वमिति विषयविदः । विषिणोत्यवच्छिनत्तीत्यवच्छेदकपर्यायो **विषयशब्दः** । अनन्यत्रभावो वा विषयशब्दार्थः । कृत्यपूर्वयोर्मध्य एव भवति नान्यत्रेति । 'यदाग्नेयमष्टाकपालम्,' 'सौम्यं चरुम्,' 'सावित्रं द्वादशकपालं भवति' इत्यादौ अभावार्थस्यापि द्रव्यदेवतासम्बन्धस्य शब्दबलाद्विषयत्वमिति विवरणकारः । इत्थं विषयावच्छिन्नेऽपूर्वे प्रतिपन्ने पश्चत्तस्य करणेतिकर्तव्यताकाङ्क्षायां पूर्वं विषयीभूतो भावार्थ एवापूर्वभावनायां करणम् । कार्यस्य हि करणाकाङ्क्षा स्वारसिकी । अन्यार्थप्रवृत्तव्यापारव्याप्यं करणमिति करणलक्षणम् । अत्राप्यपूर्वार्थप्रवृत्तकृतिव्याप्यत्वाद्धात्वर्थः करणं परशुवत् । यथा द्वैधीभावप्रवृत्ताभ्यामुद्यमननिपतनाभ्यां व्याप्यमानः परशुः द्वैधीभावलक्षणफलावच्छेदलब्धद्वैधीकरणव्यपदेशयोश्छिदिधातुवाच्ययोस्तयोरेवोद्यमननिपतनयोः करणम् ।

ननु प्रयत्नव्याप्यो धात्वर्थः तं प्रति कर्मैव स्यात् । न तु करणम् । उच्यते—न तावत्कर्मत्वमनीप्सितत्वात् । कृति(ते)रीप्सितं तत् । पूर्वमेव कर्तृव्यतिरिक्तानि सर्वाण्यपि कारकाणि कर्तृव्यापारव्याप्यानि । नैतावता कर्मता । तथापि यदीप्सितं तदेव कर्म । अन्यत्तु करणादिकम् । अत्रापि प्रयत्नमात्रापेक्षया छिद्भावार्थः कर्मैव । तन्निर्वर्त्यत्वात् । अन्यार्थप्रवृत्तप्रयत्नापेक्षया तु

करणमेव परशुवत् । यथा परशुरुद्यमननिपतनापेक्षया कर्मैव, परशुमुद्यच्छति नियच्छतीति । अन्यार्थप्रवृत्ततदपेक्षया तु करणम् । अतः कृतिव्याप्यस्यापि करणता नानुपपन्ना । धात्वर्थस्य करणत्वदेव 'उद्भिदा यजेत, ज्योतिष्टोमेन यजेत' इत्यादौ तृतीयानिर्देशः । उद्भिदादिशब्दानां कर्मनामधेयत्वात् तस्य च करणत्वात् । 'अग्निहोत्रं जुहोति, समिधो यजति' इत्यादौ द्वितीया त्वनीप्सितकर्मत्वात् । तत्रापि द्वितीया दृश्यते, ग्रामं गच्छन्वृक्षमूलान्यपसर्पतीति । एवं प्रतीत्यसम्ब(नुब)न्धितया विषयीभूतस्य भावार्थस्य पश्चात्सिद्ध्यनुबन्धितया करणत्वं नानुपपन्नम् ।

किं तु काम्येषु प्रथमं फलं प्रति करणीभूतस्यापूर्वं प्रति पश्चाद्विषयत्वम् । तदनु करणत्वम् । नित्ये तु विषयीभूतस्य करणत्वम् । अत एव काम्ये सकलाङ्गोपसंहारेण करणानुष्ठानम् । नित्ये तु शक्याङ्गोपसंहारेण । तत्र प्रथमत एवापूर्वप्रतीतेश्शक्याङ्गोपसंहारेण कतिपयाङ्गत्यागेऽपि पूर्वप्रतीतविषयविलयाभावेनापूर्वसिद्धिसम्भवान्न सकलाङ्गोपसंहारनियमः ।

अत्र भावनावाक्यार्थवादिनः कथं प्रकृत्यर्थो धात्वर्थः प्रत्ययार्थप्रधानमपूर्वमतिलङ्घ्य विप्रकृष्टेन फलेन प्रथमं करणतयाऽन्वेतीति परिहसन्ति । ते प्रष्टव्याः । त्वन्मते वा कथं भावना सन्निहितं साक्षाद्भाव्यं प्रकृत्यर्थं परित्यज्य विप्रकृष्टं फलमवलम्बते । आकाङ्क्षादिवशादिति चेत्, अत्रापि समानम् । एवं चापूर्वफलयोरेकैव भावना एकत्वात्पुरुषप्रयत्नस्य । सैव कृतिः पश्चात्क(प्राक्क)-रणगोचरा तदनुगो(नुफलगो)चरा । इयं च साध्यविवृद्धिरिति प्राभाकराः । सर्वस्याप्यपूर्वगोचरकृतिसाध्यत्वात् । करणत्वं चापूर्वभावनां फलभावनां प्रत्येव । न त्वपूर्वं फलं वा प्रति । सर्वस्यापि करणस्य व्यापारयोगितानियमात् । अधिकारापूर्वफलयोश्चाव्यापाररूपत्वाद्भावनायाश्च तद्रूपत्वात् । परशुरपि द्वैधीकरणरूपे व्यापार एव करणम् । न तु द्वैधीभावे तस्य व्यापारफलत्वात् ।

ननु विषयीभूतस्य करणत्वे 'दर्शपूर्णमासाभ्यां यजेत' इत्येकेनैव यजिना तन्त्रेणोपात्तानां षण्णां यागानामेकं विषयत्वमिति करणत्वप्येकमेव स्यात् । ततश्च भेदेनेतिकर्तव्यतान्वयो न स्यात् । तथा चाज्यौषधसान्नाय्यधर्माणां विलापनोत्पवनावहननप्रोक्षणदोहनातञ्चनादीनां साङ्कर्येणान्वयः स्यात् । मैवम्—प्रतीत्यनुबन्धि विषयत्वम् । तच्च यथाभिधानमेव स्यात् । प्रतीत्युपायत्वाद-भिधानस्य । तन्त्राभिधानाच्च सहितानां विषयत्वम् । करणत्वं तु सिद्ध्यनुबन्धि । तच्च यथास्वभावमेव स्यात् । स्वभावाधीना साधनानां साधनता । उत्पत्तिवाक्येषु च षडपि यागा द्रव्यदेवताभेदाद्भिन्नस्वभावाः प्रतिपन्ना इति भेदेनैव करणत्वम् । अतः षड्भिरपि यागैस्सावान्तरव्यापारैरेकमेवापूर्वं जन्यते । करणभेदाच्च धर्मव्यवस्था । तेनाधिकारापूर्वप्रयुक्तत्वेऽपि सावान्तरापूर्वाणां करणानां भिन्नत्वादाज्यौषधसान्नाय्यधर्माणां यथाद्वारमसाङ्कर्येणानुष्ठानम् ।

एकस्याप्यनेककरणसाध्यत्वं दृष्टम् । यथा–देवदत्तोऽश्वेन दीपिकया रथेन यातीति । तत्रावान्तरव्यापारो भिन्नः । अत्राप्यवान्तरापूर्वाणि भिन्नानि । तथा 'राजसूयेन यजेत' इत्यत्रापि विषयैक्येऽपि करणभेदः । इष्टिपशुसोमसङ्घातात्मको राजसूयः । तस्माद्विषयीभूतस्य करणत्वं सुस्थम् । एतत्सर्वं विषयकरणीयनाम्नि प्रकरणे प्रपञ्चितम् ।

अत्रेत्थं गुरुमते शास्त्रार्थान्वयप्रकारसंक्षेपः । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्याम्नाय तत्सन्निधौ दर्शपूर्णमासलक्षणकालयोग्याग्नेयादिषट्कमाम्नातम् । तथा आरादुपकारिपदार्थवर्गश्चाम्नातः । तत्र दर्शपूर्णमासवाक्यमेव विध्युद्देशवाक्यम् । तत्रैव विषयनियोज्यान्वितापूर्वप्रतीतेः । तदेव कृत्युद्देश्यतया प्रधानमधिकारापूर्वं च । इतरेष्वपि वाक्येषु प्रथमं साधिकारविधेरेव सन्निहितत्वेन प्रत्यभिज्ञायमानत्वात् तदेवापूर्वं तत्तद्विधिप्रत्ययेनानूद्यते । प्रकृत्यर्थस्येव

प्रत्ययार्थस्यापि पूर्वप्रतिपन्नत्वादनुवादो घटत एव । तत्राग्नेयादिषट्कस्योत्पत्तावेव कालयोगाद्दर्शपूर्णमासशब्दवाच्यत्वम् । द्विवचने (नेन) च त्रिकद्वयापन्नस्य तस्यैवोपादानम् । यजेतेति यजिना च तदेव तन्त्रेणोपात्तम् । इत्थं विषय-नियोज्यसङ्घटिते स्वयम्प्रयोजनभूतेऽपूर्वे प्रतिपन्ने सति तत्सन्निधिपठितस्या-रात्सन्निपातिपदार्थवर्गस्य स्वयमप्रयोजनतया प्रयोजनाकाङ्क्षायां प्रयोजनीभूतेना-धिकारापूर्वेणान्वययोग्यत्वे सत्यधिकारवाक्यगतो लिङ्प्रत्ययो युगपत्कृत्स्न-पदार्थान्वितं स्वार्थमभिधत्ते । स चान्वयः पदार्थवर्गं प्रति ग्राहकैदमर्थ्यरूपः । प्रयोजनप्रयोजनिभावेनान्वयश्च लोके व्युत्पत्तिसिद्धः । इदमेव ग्राहकग्रहण-मित्युच्यते ।

किं तु तत्र सन्निपातिवाक्येषु विधिप्रत्ययेनाधिकारापूर्वेऽनूदिते सत्यवहनन-प्रोक्षणादयश्च तदन्वितं स्वार्थमभिदधतीत्यन्योन्यान्विताभिधानम् । आरादुपकारकवाक्येषु न तदन्वितस्वार्थाभिधानम् । तथा हि—साधिकारविधि-सन्निधौ प्रयाजादिवाक्यानि श्रुतानि । तानि न तावत्स्वस्वविषयं नियोगान्तरमभिधातुमीशते । अवघातादिवदनुवादशङ्काकुण्ठितत्वात् । किं तु तत्तद्द्रव्यदेवताविशिष्टं यागस्वरूपमेवोपपादयन्ति । तथा चाधिकारवाक्यगतो लिङ्शब्दः तदन्वितं स्वार्थमभिधत्ते । प्रयाजादीनां च क्षणिकतया सम्भूयोपकारकत्वसिद्धयेऽवान्तरपूर्वाण्याश्रियन्ते । तत्र योऽसौ लिङादिः प्रागनूद्यमानार्थतया शङ्कितः स इदानीं परमापूर्वाङ्गतयैव नियोगान्तरमभिधत्ते । न स्वातन्त्र्येण । अन्यथा विषयनियोगविरोधात् । अभिहिते च तस्मिन्प्रयाजादि-वाक्यानि तदन्वितस्वार्थबोधकानि । न तु परमापूर्वान्वितस्वार्थबोधकानि । कार्यद्वयसम्बन्धानुपपत्तेः । न ह्येकं वस्तु युगपत्कार्यद्वयसम्बन्धि शक्यमव-गन्तुम् । तथा व्युत्पत्तिविरहात् । अतो नान्योन्यान्विताभिधानम् । यद्यवघातादिवत्तेषामपि परमापूर्वान्वितस्वार्थाभिधानं स्यात् तथा चोत्पत्तावेवास्य

तिरश्चीनतया पुनर्नियोगान्तरविषयता न स्यात् । अवान्तरापूर्वप्रतीतिस्तु दूरे । तेन ग्राहकग्रहणाविशेषेऽपि सन्निपातिवाक्येषु अन्योन्याभिधानम् । आरादुपकारिवाक्येषु नेति विशेषः ।

इदं च ग्राहकग्रहणं खले कपोतवदन्योन्यान्वितैः कृत्स्नपदार्थैः प्रत्ययार्थैश्च सह युगपदेव भवति । इत्थं सकलपदार्थशेषिणि प्रयोजनभूते ग्राहके प्रतीते तस्य स्वतस्साध्यतया करणाकाङ्क्षायां विषयीभूतानामाग्नेयादीनामेव करणतयाऽन्वयः । तेषामपि सम्भूयकारित्वसिद्ध्यर्थं प्रधानोत्पत्त्यपूर्वाणि प्रति करणत्वमङ्गीक्रियते । प्रागनूद्यमानार्थतया शङ्किता लिङादयस्तु पश्चात्तद्वाचकाः । इत्थं करणान्वितो नियोग इतिकर्तव्यतामाकाङ्क्षमाणः स्वयमेवोभयविधमपि पदार्थवर्गं स्वकरणशेषतया विनियुङ्क्ते । इदमेव करणैदमर्थ्यम् । अनेन ग्राहकैदमर्थ्यनिर्वाहश्च भवति । तदनु करणैदमर्थ्यनिर्वाहाय करणोपकार-माकाङ्क्षमाणो नियोगः प्रथमं करणशरीरनिर्वर्तकं सन्निपातिपदार्थवर्गं श्रुत्यादिसहित-स्तत्तद्द्वारशेषतया विनियुङ्क्ते । विनियुञ्जानोऽपि तत्तत्प्रधानापूर्वभेदनिबन्धन-तत्तत्करणभेदमाश्रित्य तत्तत्करणशेषतया व्यवस्थयैव । अनेन सन्निपातिनां करणैदमर्थ्यनिर्वाहश्च भवति । तत्तत्कारकगतातिशयाधानद्वारेण करणशरीर-निर्वर्तकत्वमेव सन्निपातित्त्वम् । तत्तत्कारकगतातिशय एवा(वावा) न्तरकिञ्चित्कारः । तथा प्रकरणमात्रसहायः प्रयाजादीन् साक्षात्करणतया विनियुङ्क्ते द्वारसंयोगाभावात् । विनियुञ्जानोऽपि विशेषानवगमात्कृत्स्नकरणशेषतया । अत एव तेषां समुच्चये-नान्वयः तन्त्रानुष्ठानं च । अवान्तरापूर्वाण्येवात्र करणोपकारः । स एव तज्जन्यः किञ्चित्कारः । अनेन करणैदमर्थ्यनिर्वाहो ग्राहकैदमर्थ्यनिर्वाहश्च भवति । अवान्तरापूर्वकरणोपकारकत्वमेवारादुपकारकत्वम् ।

ननु प्रयाजादीनां किमिति समुच्चयेनान्वयः । विकल्पेनान्वयस्तु किमिति न स्यात् । न स्यात् । ऐकार्थ्यनैरपेक्ष्ययोरभावात् । तथा हि—ते खलु

व्रीहियवयोर्विकल्पप्रयोजके । उभयोरपि पुरोडाशनिर्वर्तकत्वेनैकार्थ्यात् । अन्यतरेणापि कार्यसिद्धिरितरनैरपेक्ष्याच्च । अत्र तु प्रयाजादीनां स्वस्वोपकारेषु नैरपेक्ष्यसम्भवेऽपि नैकार्थ्यम् । अखण्डोपकारे परस्परसापेक्षत्वात् । अत्र त्वैकार्थ्यसम्भवेऽपि तस्य सर्वाङ्गनिष्पाद्यत्वान्न नैरपेक्ष्यमिति न विकल्पः ।

किं चाष्टदोषदुष्टश्च सः । तथा हि—व्रीहिशास्त्रानुष्ठानकाले यवशास्त्रस्य प्रामाण्यपरित्यागः, अप्रामाण्यस्वीकारश्चेति दोषद्वयम् । तस्यैव यवशास्त्रस्य यवानुष्ठानकाले त्यक्तप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यत्यागश्चेति दोषद्वयम् । इति यवशास्त्रस्य चत्वारो दोषाः । एवं व्रीहिशास्त्रस्यापि यवशास्त्रानुष्ठानकाले दोषद्वयम् । व्रीह्यनुष्ठानकाले च दोषद्वयमित्येकैकत्र कोटौ चत्वारो दोषः ।

प्रयाजादीनां तु न करणतयाऽन्वयः । आग्नेयादिकरणान्तरावरोधात् । अखण्डोपकारस्तूभयविधाङ्गनिष्पाद्यः । परमते तु कृत्स्नस्यापि पदार्थवर्गस्य साक्षात्परम्परया च द्वारान्वयपूर्वकः प्रधानान्वयः । अत्र तु प्रधानान्वयपूर्वक इति वैषम्यम् । तत्तद्द्वाराणामपूर्वीयत्वलक्षणा तु मतद्वयसाधारणीति । तत्राग्नेयाग्नीषोमीययोरुत्पत्तिशिष्टपुरोडाशावरोधात् व्रीहीणां न साक्षात्करणत्वम् । किं तु तत्प्रकृतित्वमेव । इत्थं व्रीहीणां तत्प्रकृतितयाऽन्वये सति निरूढं प्रत्यनिरूढस्य शेषतेति न्यायादवहननादीनां द्वारद्वारिभावेनान्वयः । तथा सान्नाय्यधर्माणामाज्यधर्माणां च तत्तत्कारकशेषतयाऽन्वयोऽवगन्तव्यः । इत्थं यथाविनियोगं सकलपदार्थान्वितं ग्राहकत्वविनियोजकत्वावस्थमधिकारापूर्वं शास्त्रप्रमेयं विधितत्त्वमिति सिद्धम् ।।

इति श्रीरामानुजाचार्यविरचिते तन्त्ररहस्ये

शास्त्रप्रमेयपरिच्छेदश्चतुर्थः ।।

।। शास्त्रारम्भपरिच्छेदः ।।

रामानुजार्यरचिते निगमान्तभाष्ये
जीवेश्वरप्रकृतिभेदपरे विनीतः ।
श्रीवेङ्कटाद्रिगुरुणा करुणावशेन
रामानुजो व्यधित तन्त्ररहस्यशिक्षाम् ।।

इत्थमसन्निकृष्टर्थविषयं शास्त्रम् । तत्प्रतिपाद्यं च सपरिकरं विध्याख्यं धर्मतत्त्वमित्युक्तम् । तच्च शास्त्रादौ प्रतिज्ञातम् । वेदैकसमधिगम्यत्वं च तत्र द्वितीयसूत्रे । स च मीमांसापेक्ष एव प्रत्यायकः । वेदवाक्यार्थसंशये सति तन्निर्णयौपयिकन्यायनिबन्धनं शास्त्रं मीमांसा ।

सम्प्रति तदारम्भो विचार्यते । तत्र परपूर्वपक्षसङ्क्षेपः—किं मीमांसा आरम्भणीया, उत नेति प्रथमविचारः । तदर्थं स्वाध्यायो विवक्षितार्थः, उत नेति । तदर्थमपि किं स्वाध्यायोऽध्येतव्य इत्यत्रार्थज्ञानं भाव्यमुत स्वर्गादिफलमिति ।

अत्र पूर्वः पक्षः—अत्र तव्यप्रत्ययेन परप्रेरणात्मकविध्यवरुद्धा भावना तावत्प्रतीयते । सा चाकाङ्क्षात्रयवती स्वभावतः । तत्र न तावत्समानपदोपात्तं गुरुमुखोच्चारितानूच्चारणात्मकमध्ययनं भाव्यतया सम्बन्धुमर्हति । अपुरुषार्थत्वात्तत्र पुरुषप्रवृत्त्यनुपपत्तेः । विध्यवरोधवशाद्भावना पुरुषार्थपरेत्युक्तम् । अत एव नाप्येकवाक्यतया समभिव्याहृतोऽक्षरराशिलक्षणस्स्वाध्यायः । विध्यानर्थक्यमपि । अन्तरेणापि विधिमध्ययनेन स्वाध्यायो गृह्यत इत्यन्वयव्यतिरेकाभ्यां गम्यते । न चावहननवन्नियमार्थो विधिरिति शक्यते वक्तुम् । व्रीहयो हि क्रतुकरणपठिताः । ततः क्रत्वर्थत्वादवघातेनैव सम्पादितैस्तण्डुलैः

क्रतुफलभावना-सिद्धिरिति तत्र नियमस्सम्भवति । प्रमाणान्तरागोचरतया तदैव तत्सिद्धिर्न तण्डुलस्वरूपे । तद्विरोधात् । नखलुञ्छनेनापि तत्सिद्धेः । अध्ययनं त्वनारभ्या-धीतम् । अतो न क्रत्वर्थतया तन्नियमः । अध्ययनेनैव स्वाध्यायं प्राप्नुयादिति स्वरूपप्राप्तिनियमस्तु प्रमाणान्तरविरुद्ध एव । स्वयमनधीयानस्यापि परपुरुषाध्य-यनश्रवणेन पुस्तकनिरीक्षणादिना वा तत्प्राप्तिसम्भवात् ।

अत एव नार्थबोधोऽपि । यद्यप्यधीतात्स्वाध्यायादक्षरपदक्षरपदग्रहणपदार्थाव-धारणमुखेन दृष्टसामर्थ्यानुसाराद्वाक्यार्थज्ञानं जायमानं दृश्यते । फलवत्कर्मा-नुष्ठानोपकारकत्वात्पुरुषार्थश्च । तथापि न तस्य फलभाव्यता । विध्यानर्थक्य-प्रसङ्गात् । अन्तरेणापि विधिमध्ययनस्यान्वयव्यतिरेकाभ्यामर्थज्ञानार्थतासिद्धिः । न चाध्ययनादेर्भावितस्वाध्ययमूलमेव ज्ञानं क्रत्वनुष्ठानाङ्गमिति नियमस्सम्भवति । क्रतुसंस्पर्शाभावात् ।

तस्मात् 'यदृचोऽधीते पय आहुतिभिरेव तद्देवांस्तर्पयति । यद्यजूंषि घृताहुतिभिर्यत्सामानि सोमाहुतिभिः ।' इत्यारभ्य 'त एनं तृप्ता आयुषा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद्येन च तर्पयन्ति ।' इत्यध्ययनतृप्तदेवताप्रसादलभ्यायुरादिप्राप्तिरर्थवादे श्रूयते । तस्मात् 'फलमात्रेयो निर्देशात्' (जैमिनि. सू. ४-३-१८) इति रात्रिसत्रन्यायेनार्थवादिकमेव फलं भाव्यतया सम्बध्यते । अध्ययनं तु करणतया । स्वाध्यायस्तु तन्निर्वर्तकतया । यथा 'प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपयन्ति' इत्यत्र । 'रात्रीरुपेयुः' इति रात्रिसत्राख्यं कर्म विधीयते । तत्र प्रतितिष्ठन्ति इत्यर्थवादः । तत्र भावनाया भाव्याकाङ्क्षायां विश्वजिन्न्यायेनाश्रुतस्वर्गादिकल्पने प्रतिपत्तिगौरवाच्छ्रुतमेवार्थवादिकं प्रतिष्ठाख्यं फलं भाव्यतया निर्णीतं तथाऽत्रापि ।

ततश्च स्वाध्यायस्य फलशेषतयाऽन्यपरत्वात्तेभ्योऽर्थप्रतीतिरनुपपन्ना

व्युत्पत्तिविरहात् । वृद्धव्यवहारे ह्यनन्यपराण्यक्षराणि बोधकतया व्युत्पन्नानि । व्युत्पत्त्यपेक्षश्च शब्दार्थावगमः । या पुनरन्यपरेभ्योऽपि तेभ्योऽर्थावगतिः सा भ्रान्तिरेव अविवक्षितत्वात् । अत एव ''ऐन्द्र्या गार्हपत्यमुपतिष्ठते'' इति गार्हपत्योपस्थाने विनियुक्ताया ऐन्द्या ऋचः प्रतीयमानपीन्द्रप्रकाशन मविवक्षितम् । अन्यार्थत्वात् । विवक्षितार्थः प्रतीयमानोऽपि न विचारार्हः नापि प्रयोजनमिति विचारस्तावन्न कर्तव्यः । तदकरणे च तदुपायभूतन्याय-परिज्ञानमनुपयोगि । तदनुपयोगे च तन्निबन्धनं मीमांसाशास्त्रमनारम्भणीयमिति पूर्वः पक्षः ।

अपरे तु विश्वजिन्न्यायेन स्वर्गाथतया पूर्वपक्षमाहुः । तथाहि—आद्ये स्वीकरणाध्ययनविधौ आर्थवादिकं फलं न श्रूयते । किं तु धारणजप-यज्ञाध्ययनविधौ । तदुक्तम्—

आद्ये त्वध्ययने नैव काचिदस्ति फलश्रुतिः ।
धारणे जपयज्ञे च फलश्रुतितिरियं यतः ।। इति ।।

(न्यायरत्नमाला-१-३५)

न ह्यत्र ततोऽर्थवादप्राप्तिः । तस्य प्राशस्त्यमात्रपरत्वात् । शब्दभावनेति-कर्तव्यताऽपि प्राशस्त्यमात्रम् । न फलम् । अतो न तच्छेषतयाऽपि फलस्यातिदेशः । तस्मादध्ययनभावनायाः स्वर्ग एव भाव्यः । यथा 'विश्वजिता यजेत' इत्यत्र अश्रुतफलाया विश्वजिद्भावनायाः 'स स्वर्गस्स्यात्सर्वान्प्रत्य-विशिष्टत्वात्' (जैमिनि–सू. ४-३-१५) इति न्यायात् स्वर्ग एव भाव्यः, तथाऽत्रापि । तस्मात्स्वर्गार्थत्वादध्ययनस्यानुवचनमात्रेण शास्त्रार्थसमाप्तेः अध्ययनानन्तरं न नियमेन विचारारम्भः । किं तु 'वेदमधीत्य स्नायात्' इति वचनात् 'कृतस्नातकादिव्रतस्सदृशीं भार्यामुपयच्छेत्' इति वचनात्कृतदारः

पश्चात्कर्मानुष्ठाने समुपनिवर्तिते(निपतिते) विचारयतु मा वा । नन्वन्यार्थादध्ययनात्प्रतीयमानोऽर्थो न विवक्षितः । कथं विचाराभ्यनुज्ञा । मैवम्—अन्यार्थस्याप्यर्थप्रतिपादनसम्भवात् । यथा—सिद्धान्ते 'याजयित्वा प्रतिगृह्य वाऽनश्नन् त्रिस्स्वाध्यायं वेदमधीयीत' इति प्रायश्चित्तार्थेऽध्ययने विहितेऽपि न वेदस्याविवक्षितार्थताऽऽपद्यते तथा स्वर्गार्थेऽप्यध्ययने द्रष्टव्यम् । न ह्यर्थप्रतिपादनस्वभावस्य वेदस्य कदाचिदन्यार्थत्वं कृतमित्येतावता स्वाभाविक्यर्थपरता हीयते । तत्सिद्धं नाध्ययनानन्तरं नियमेन धर्मजिज्ञासा कर्तव्येति ।

सिद्धान्तस्तु—अध्येतव्य इति तव्यप्रत्ययेन स्वाध्यायस्य कर्मत्वावगमात् तस्यैव भाव्यत्वं युक्तम् । अध्ययनक्रियायास्सकर्मकत्वात् । यद्यपि स्वाध्यायस्य निर्वर्त्यकर्मता नास्ति विकार्यता वा । नित्यत्वात् । तथाऽपि प्राप्यकर्मता नानुपपन्ना । न चापुरुषार्थतया तस्य भाव्यत्वानुपपत्तिः । फलवत्कर्माव-बोधोपयोगित्वात् ।

नन्वर्थावबोधोपयोगितया विधिरनर्थकः इत्युक्तम् । नानर्थकः । नियमार्थत्वात् । ननु न नियमस्सम्भवति क्रतुसंस्पर्शाभावादित्युक्तम् । न न सम्भवति । स्वाभाविकार्थपरतानुसारेण तदनुप्रवेशकल्पनाया एवोचितत्वात्। अन्यथा शब्दानां स्वाभाविक्यर्थपरता हीयते । ततश्च अध्ययनप्राप्तस्वाध्याय-जन्यमेव ज्ञानमनुष्ठानाङ्गमित्युक्तं भवति । तत्र कर्मविधिष्वेवं नियम् । अध्ययनादिना भूतस्वाध्यायजन्यमेव ज्ञानं कर्मानुष्ठानाङ्गमिति । अर्थवादेषु अध्ययनप्राप्तार्थवादप्ररोचिता एव क्रियमाणाः क्रतवः फलभावनाङ्गमिति । मन्त्रेष्वध्ययनगृहीतमन्त्रजन्यमेव क्रतुषु स्मरणीयपदार्थस्मरणं फलभाव-नाङ्गमिति । स्तोत्रशस्त्रेष्वध्ययनोपात्तस्तोत्रशस्त्रैरेव गुणिनिष्ठगुणप्रकाशनमिति । उपनिषत्स्वपि यानि कर्तृ भोक्तृसंसार्यात्मप्रतिपादनपराणि तैरध्ययनोपात्तैरेव

भूतभौतिकसङ्घातिरिक्तं पारलौकिकफलोपभोगयोग्यमात्मानं ज्ञात्वा क्रतुरनुष्ठेय इति । यानि त्वकर्तृभोक्तृसंसार्यात्मपराणि 'अपहतताप्मा विजरोऽमृत्युर्विशोको विजिघत्सोऽपिपासुस्सत्यकामस्सत्यङ्कल्पः, तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमयः, अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा, पतिं विश्वस्यात्मेश्वरम्' इत्यादीनि तेषु तज्ज्ञानस्य ''सर्वान् कामानवाप्नोति, एतमानन्दमयमात्मानमुपसङ्क्रम्य, इमान्लोकान् कामान्नी कामरूप्यनुसञ्चरन् न स पुनरावर्तते'' इत्यादिभिः प्रदर्शिताभ्युदयनिःश्रेयसफलत्वादध्ययनोपात्तैर्वाक्यैस्सम्पादितमेव ज्ञानं तादृशफलाङ्गमिति । अध्ययनाश्रितश्च कालनियमो व्रतादिनियमश्चाध्ययनाङ्गमेव ।

श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि ।
विप्रश्छन्दांस्यधीयीत मासान्युक्तोऽर्धपञ्चमान् ।। इति ।।

(मनु. ४-९५)

तथा—

वेदाङ्गानि रहस्यं च कृष्णपक्षेषु सम्पठेत् ।।

(मनु. ४-९८)

तथा—

भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः ।
भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरम् ।। इत्यादीनि ।।

(मनु. २.४९)

उपनयनमप्यध्ययनाङ्गमेव माणवकसंस्कारत्वात् । एवं चानन्यपरत्वात्स्वाध्यायस्य फलवत्कर्मावबोधोत्पत्तेर्विचारस्य विषयप्रयोजनलाभाच्छास्त्रमारम्भणीयम् । ततश्चाध्ययनानन्तरं गुरुकुलस्थितेरर्थवत्त्वात्तदनन्तरं निवृत्तिपदवद्वे(परं यद्वे)दमधीत्य स्नायादिति वचनमपन्यायमूलमिति मन्तव्यम् । ततश्च

स्नानं मीमांसाश्रवणानन्तरभावितया स्वस्थानादुत्कृष्यते । अत एव सूत्रकार आनन्तर्यविषयप्रयोजनपरमाद्यसूत्रं शास्त्रादावेव निबबन्ध 'अथातो धर्मजिज्ञासा' इति । तच्च व्याख्यातम्—

अथातो धर्मजिज्ञासासूत्रमाद्यमिदं कृतम् ।
धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् ।। इति ।।

(श्लो. वा. १-११)

अत्रायमथशब्द आनन्तर्ये । अतश्शब्दो हेतुभावे । धर्मो विषयः । एतच्चाधर्मस्याप्युपलक्षणम् । तस्यापि जिज्ञास्यत्वात् । तन्निर्णयः फलम् । तदुपायश्च मीमांसा । अध्ययनानन्तरं वेदस्य विवक्षितार्थत्वाद्धर्मजिज्ञासा कर्तव्येति सूत्रार्थः ।

जिज्ञासा च त्रिधा—उपनयनानन्तरं हितैषिवृद्धेभ्यो धर्माधर्मावभ्युदयानभ्युदयप्राप्तिपरिहारफलौ ज्ञातव्याविति श्रुतवतो माणवकस्य प्रथमा कौ तौ कथं वा तज्ज्ञानमिति । तदनन्तरं तदर्थतया विहितमध्ययनं तेभ्य एव श्रुत्वाऽधीते वेदे तज्ज्ञानानुदयात् कस्तदुपाय इति निरुक्तव्याकरणादिविषया । तदनन्तरमङ्गाध्ययनसंस्कृतात्स्वाध्यायादापाततः पदार्थवाक्यार्थप्रतीतावपि न्यायानवधारणात्संशये तन्निर्णयार्थं मीमांसाविषया । तदुक्तम्—

जिज्ञासैकोपनीतस्य द्वितीया पठितश्रुतेः ।
ज्ञातविद्यान्तरस्यान्या या मीमांसापुरस्सरा ।। इति ।।

(बृहट्टीका) ।

अपरे तु क्रत्वनुप्रवेशाभावेन संस्कारविधित्वं तन्मूलो नियमश्च दुर्वच इति मन्वाना अपूर्वविधित्वमेवाहुः । तथा हि—अध्येतव्य इत्यत्र वाक्यार्थज्ञानमेव भाव्यम् । पदग्रहणे पदार्थावधारणादिदृष्टसामर्थ्यानुसारेण दृष्टप्रयोजनत्वात् । न तु स्वर्गः अदृष्टप्रयोजनत्वात् । दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वात् ।

अतोऽध्ययनेन अर्थज्ञानं भावयेदित्यप्राप्तविधिरेव । न त्वध्ययनेन स्वाध्यायं भावयेदिति संस्कारविधिः । तस्य क्रतुसंस्पर्शाभावेन संस्कारत्वायोगात् सक्तुवत् । तदुक्तम्—

भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हति ।
सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च कुत्रचित् ।। इति ।।

(तन्त्रवार्तिक.२.१.४)

नन्वर्थज्ञानार्थत्वे विधिरनर्थक इत्युक्तम् । सत्यम् । नियमार्थत्वात् । ननु क्रत्वनुप्रवेशाभावात्प्रमाणान्तरविरोधाच्च तदसम्भव इत्युक्तम् । सत्यम्— यदि नियमो वाक्यार्थस्स्यात् । नचैवम् । फलतस्तदुपपत्तेः । तथा हि— यावत्कर्मानुष्ठानज्ञानोपायतया अध्ययनलिखितपाठादिनानोपायानुसन्धानं नोत्प्रेक्ष्यते तावत् द्विजातीनामुपनीतानामुपनयनप्रक्रमाधीतया प्रत्यक्षश्रुत्याऽध्ययनं विधीयते । श्रुतेर्लिङ्गतः शीघ्रप्रवृत्तेः । उपायान्तरप्रतीतिस्तु लिङ्गात् । विहिते तु तस्मिंस्तदासादितज्ञानैरेव लब्धानुष्ठानान्युत्तरकर्माणि स्वज्ञानसिद्ध्यर्थमुपायान्तरं नाक्षिपन्तीति फलतो नियमसिद्धिः । नचैतावताऽध्ययनस्य क्रत्वर्थत्वप्रसङ्गः । तदापादितं ज्ञानं क्रत्वङ्गम् । तेन विनाऽनुष्ठानासम्भवेन सामर्थ्यादेव तदङ्गत्वम् । यथा वा द्रव्यस्य क्रत्वङ्गत्वेऽपि तदुपायभूतानां याजनादीनां न तदङ्गत्वम् । फलतो नियमोपपादनं च **न्यायरत्नमालाया** व्याख्याने **नायकरत्ने** प्रपञ्चितमस्माभिः ।

अथवा न केवलं क्रत्वर्थतयैव नियमः । प्राङ्मुखतादिवद्द्रव्यार्जनादिवच्च पुरुषार्थविषयतयापि तदुपपत्तेः । तेनाध्ययनविधिविहितोपनीतकर्तृकव्रतनियमादीतिकर्तव्यतोपेताध्ययनपूर्वकज्ञानवतामेवोत्तरकर्मस्वधिकार इति सिद्धम् । यथाऽऽधानलब्धाग्नीनाम् । अत एव नात्रैवर्णिकानामधिकारः । तस्मादर्थज्ञानकामस्याध्ययनेऽधिकार इति सिद्धम् ।

ननु कथमर्थज्ञानं प्रयोजनं हुं-फट्-वौषडादिशब्देष्वव्याप्तेः । कथं च क्षत्रियाद्यधिकारिकाश्वमेधप्रतिपादकवेदभागस्य ब्राह्मणादिभिरध्ययनम् । यद्यपि ब्राह्मणस्य कथञ्चिद्याजनोपयोगिज्ञानार्थमध्ययनं स्यात्, तथापि क्षत्रियवैश्ययोः वैश्यस्तोमाश्वमेधाध्ययनमनर्थकमेव । जपयज्ञपारायणप्रयोगेऽप्यर्थज्ञानमनुपयोगि ।

उच्यते—

न केवलार्थविज्ञानसिद्धिरस्य प्रयोजनम् ।
अपेक्षितं दृश्यते यत्सर्वं तत्फलमिष्यते ।।

(न्यायरत्नमाला १.३९)

यदेव हि विध्यन्तरापेक्षितमध्ययनसाध्यं दृश्यते तत्सर्वं प्रयोजनम् । तेन क्रतुविधिभिः तज्ज्ञानमपेक्षितमिति यथा तत्प्रयोजनमेवं नित्यनैमित्तिकजप-यज्ञपारायणादिविधिभिः 'अहरहस्स्वाध्यायोऽध्येतव्यः, याजयित्वा प्रतिगृह्य वाऽनश्नन् त्रिस्स्वाध्यायं वेदमधीयीत,' तस्मात्स्वाध्यायोऽध्येतव्यो यं यं क्रतुमधीते तेन तेनास्येष्टं भवति' इत्यादिभिः स्वाध्यायग्रहणमपेक्षितमिति भवति तत्प्रयोजनम् । न चैवं नानाप्रयोजनस्वीकाराद्वैरूप्यमध्ययनविधेः । अध्ययनेन यत्सम्पादयितुं शक्यं तत्कुर्यादित्येकयैव वचोभङ्ग्या सर्वार्थलाभेन वैरूप्याभावात् । न चैवं नानाप्रयोजनकल्पनम् । तेषां क्लृप्तत्वात् । स्वाध्यायस्य नानाप्रयोजन-साधनत्वं क्लृप्तमेव ।

अर्थज्ञानार्थस्याप्यध्ययनस्य स्वाध्यायसंस्कारत्वमपि नानुपपन्नम् । यथा—साम्ना स्तुवीतेत्यत्र स्तुतौ विनियुक्तस्यापि गीतिरूपस्य साम्नः तदाधारऋगक्षरसंस्कारत्ववत् अध्ययनस्य स्वाध्यायसंस्कारत्वम् । ऋगक्षराणां स्तुतिशेषत्ववत्स्वाध्यायस्यार्थज्ञानशेषत्वमपि नानुपपन्नम् । सर्वविध्यपेक्षित-तयाऽऽधानवदावश्यकानुष्ठानं चाध्ययनम् । अत एव नित्यं च । तस्मा-

दर्थज्ञानार्थत्वादध्ययनविधेः विचारमन्तरेण तदसम्भवानन्तरं धर्मजिज्ञासा कर्तव्येति सिद्धम् ।

अत्रोच्यते—स्वाध्यायस्य संस्कार्यत्वं तावदनुपपन्नम् । क्रत्वङ्गतया विनियोगासम्भवात् । अविनियुक्तस्य च संस्कारानर्हत्वात् सक्तुवत् । न चार्थज्ञानमुखेन पर्णतादिवत्क्रतुसम्बन्धः । क्रतुप्रयोगवहिर्भूतस्याप्यर्थज्ञानस्य सम्भवेन तज्ज्ञानस्य क्रतुसम्बन्धव्यभिचारात् । न हि स्वाध्यायादर्थज्ञानं क्रतुप्रयोजकाल एव जायते नान्यदेति नियमस्समस्ति । जुह्वादीनां त्वव्यभिचरितक्रतुसम्बन्धात्पर्णतायास्तन्मुखेन तदनुप्रवेशो युक्तः । नाप्यप्राप्तविधित्वेऽप्यर्थात्स्वाध्यासंस्कारः । अध्ययनविधेरप्रकरणाधीतत्वात् स्वाध्यायस्यार्थज्ञाने विनियोगादर्शनेन भूतभाव्युपयोगाभावात् । न च साम्ना स्तुवीतेत्यत्र साम्नां स्तोत्रे विनियोगबलादेवर्चां पृथक् स्तोत्रविनियोगाभावेऽपि ऋगक्षरसंस्कारमुखेन साम्नां स्तोत्रोपयोगादृचामपिस्तोत्रविनियोगसिद्धिवदध्ययनस्यार्थज्ञाने विनियोगादेव स्वाध्यायस्यापि तत्र विनियोगस्सिध्यतीति युक्तम् । तत्रापि श्रुत्यादिविनियोजकप्रमाणासम्भवेन ऋचां स्तोत्रशेषतया विनियोजका(योगान)ङ्गीकारात् ।

नाप्यर्थज्ञानकामोऽधिकारी । तदश्रवणात् । ज्ञायमानो ह्यधिकारः प्रयोजनम् । न ह्यध्ययनप्रवृत्तेः पूर्वं माणवकेनार्थज्ञानं ज्ञायते । अथाध्ययनसाध्यमेवाधिकारमुपदिशन्तो हितैषिणः प्रवर्तयेयुः, तर्हि परप्रयुक्तिरेवाङ्गीकृता स्यात् । ततो वरं वेदाध्यापनप्रयुक्तिः । किं चाध्यापकोऽपि हितैषी ।

अथ 'रौद्रं वास्तुमयं चरुं निर्वपेत्' इति प्रकृत्य 'एतया निषादस्थपतिं याजयेत्' इत्यत्र द्रव्यार्जनार्थप्रवृत्तैः ऋत्विग्भिर्ज्ञाप्यमानोऽप्यत्रैवर्णिकेन निषादस्थपतिना स्वयमज्ञायमानोऽपि स्थपत्यधिकार एव यथा प्रयोजकः तथा माणवकेनाज्ञायमानोऽपि हितौषिवचनाज्ज्ञाप्यमानो माणवकाधिकार एव प्रयोजकस्स्यात् । न स्यात् । न ह्यष्टवर्षस्य तस्य प्रवुद्धस्थपतिन्यायेन

पुरुषार्थकामना सम्भवति। नापि पूर्वपक्षे बालिशस्य तस्यार्थवादिकफलकामना स्वर्गकामना वा सम्भवति। तस्मात्परप्रयुक्त्यैव पूर्वोत्तरपक्षौ युक्तौ।

तदुच्यते—तत्र किं शास्त्रमारम्भणीयमुत नेति प्रथमविचारः। तदर्थं किं स्वाध्यायो विवक्षितार्थः उत न। तदर्थमपि किमध्ययनस्याध्यापनविधि-प्रयोजननिर्वृत्तिरेव प्रयोजनं, किं वाऽर्थज्ञानमपीति। कः खल्वध्यापनविधिः, यत्प्रयुक्तमध्ययनं स्यात्। उच्यते—

उपनीय तु यश्शिष्यं वेदमध्यापयेत् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥

(मनु. २-१४०)

इति स्मृतिवचनानुमितमुपनीयाध्यापनेनाचार्यकं भावयेदित्येवंरूपम्। अलौकिकं चाहवनीयादिवदाचार्यकम्। स च पुरुषार्थः। 'आचार्याय प्रियं धनमाहरेत्' 'विहितमाचरेत्' इत्यादिशिष्टस्मृतिविहितधनाहरणादिपातित्वा-(हेतुत्वा)त्तल्लिप्सया चाध्यापने प्रवृत्तिः। अध्यापनं च तन्निष्पत्त्युपायः। तथा दीक्षणीयेष्टिर्दीक्षितत्वस्य। अध्ययनविधिरपि स्वतन्त्र एव। भिन्नप्रकरण-परिपाठात्। प्रथमं निरधिकारश्च फलाश्रवणात्। अत एव निर्नियोज्यकः। अध्ययनं चाध्यापनोपयोगीति सिद्धम्। तदन्तरेण तदनिर्वाहात्।

केचिदध्यापनविधावपि नियोज्यो नास्ति तदश्रवणादित्याहुः। तन्न। 'तमाचार्यं प्रचक्षते' इत्याचार्यककामलाभात्।

ननु दीक्षितत्ववदाचार्यकमलौकिकमध्यापनसाध्यम्। तच्चोदनागम्यं च। कथं तत्र कामना। प्रमाणान्तरप्रतिपन्नेऽर्थे हि कामना। कथं वा तत्कामस्याधिकारः। सत्यम्–अलौकिकस्यापि तस्य शिष्यकर्तृकदक्षिणादानादिनिमित्ततया कामनोपपत्तेः।

नन्वाचार्यकं न नियोगफलम्। किं तु विषयफलम्। यदेव नैयोगिकं फलं तदेवाधिकारिविशेषणम्। ततश्च कथं तत्कामोधिकारी। मैवम्—

अर्थज्ञानेऽपि तुल्यमेतत् । तदपि न नियोगफलम् । किं तु विषयफलमेव । किं चाचार्यकं वाक्यात्प्रथमप्रतिपन्नम् । इदं तु नेति वैषम्यम् ।

ननु नेदं वचनमध्यापनविधायकम् । किं तु द्रव्यार्जनार्थप्रवृत्ताध्यापनविध्यनुवादपरमिति । मैवम्—वैरूप्यात् । इदं त्वाचार्यकफलकम् । तत्तु द्रव्यप्राप्तिफलम् । अयमपूर्वविधिः । स पुरुषार्थनियमपरः । याजनादिनैव द्रव्यं सम्पादयेदिति ।

ततश्चैवं पूर्वपक्षः—अध्यापनविधिप्रयुक्तस्य स्वाध्यायाध्ययनस्य प्रयोजनापेक्षायां पुरुषान्तरगामित्वेन बहिरङ्गमपि प्रथमावगतत्वेनाध्यापनप्रयोजनमाचार्यकमेव प्रयोजनं युक्तम् । न त्वर्थपरिज्ञानम् । पश्चाद्भावित्वात् । तेनाध्ययनस्याध्यापननिष्पत्यर्थत्वात्स्वाध्यायस्य च तच्छेषत्वान्न तदर्थविवक्षा । अविवक्षितश्चार्थो न निर्णेतव्यः । प्रयोजनाभावात् । अकर्तव्ये च निर्णये न विचारः कर्तव्य इति तदात्मकं शास्त्रमनारम्भणीयमेव । किं च न केवलं स्वोपकारकतयाऽध्यापनमध्ययनं प्रयुङ्क्ते । किं तु स्वाङ्गद्वारा । उपनयनं च त्त्वाप्रत्ययेन समानकर्तृकमवगम्यमानमध्यापनाङ्गमेव । स हि समानकर्तृकप्रयोगैक्यपरः । तस्य च द्वारापेक्षायामुपनेयासत्तिरेव लिङ्गात् द्वारमवगम्यते । उपनेयोऽपि नाकिंचित्कुर्वन्नङ्गमिति तस्य द्वारापेक्षायामुपनयनप्रक्रमाधीतमध्ययनमेवोपकारतया व्यापारत्वेन पर्यवस्यति । एवं च वैधमेवाध्ययनं व्रतनियमविशेषोऽपि । तं कुर्वन्माणवकोऽध्यापनोपकारीत्यवगमात्तद्विषयमेवाध्यापनमाचार्यकसाधनम् । ततश्च तत्प्रयुक्ताध्ययननिष्पत्त्या च लब्धसिद्धिरध्ययनविधिस्स्वविषयानुष्ठानार्थं नाधिकारमपेक्षते । तेन न विश्वजिन्न्यायस्य विषयो नापि रात्रिसत्रन्यायस्य । अनन्यप्रयुक्तविषयानुष्ठानसाध्यनियोगविषयत्वात्तयोः । अत एव न पराभिमतपूर्वपक्षोपपत्तिः । यत उपनयनमध्यापनाङ्गमत एव तच्छून्यानामत्रैवणिकानामनधिकारः ।

अन्ये पुनरध्ययनस्याध्यापनविधिप्रयुक्ततया तदङ्गतामाहुः । तदयुक्तम् । प्रयुक्तेस्तादर्थ्यव्यभिचारात् । यथोत्तरक्रतुविधिप्रयुक्तस्याप्याधानस्य न तदङ्गत्वम् ।

तेनाध्ययनस्याचार्यविधिसिद्धिप्रयोजनत्वात्तन्निर्वर्तकतया स्वाध्यायस्याविवक्षितार्थत्वम् । ततश्च तन्निर्णयौपयिकं शास्त्रमनारम्भणीयमिति पूर्वः पक्षः ।

राद्धान्तस्तु—यद्यपि प्रयोजकविध्यधिकारः पूर्वभावी, तथापि न तत्सिद्धिरेवास्य प्रयोजनम् । बहिरङ्गत्वात् । किं तु कर्तृगामित्वादन्तरङ्गत्वादर्थज्ञानं प्रयोजनत्वेन स्वीक्रियते । यत्कर्तृकं हि यत्कर्म तस्यैव तत्प्रयोजनं युक्तम् । ननु प्रयोजनापेक्षमध्ययनं प्रथमावगतत्वेनाचार्यकमेव स्वीकरोति । स्वीकृते तस्मिन्नपेक्षाभवादन्तरङ्गमपि न प्रयोजनं भवितुमर्हति । मैवम्—प्रथममाचार्यकस्याध्ययनविधिप्रयोजनत्वेन अनवकल्पनात् । यद्यकल्पिते तस्मिन्ननुष्ठानं न सिध्येत् ततस्तत्कल्प्यते । न त्वेतदस्ति । तथात्वेप्यनुष्ठानस्योपपादितत्वात् । अनुष्ठिते तु तस्मिन् पश्चात्प्रयोजनापेक्षा । सर्वस्यापि स्वतन्त्रविधेरधिकारिनिरपर्यवसानात् । सत्यां च तस्यामध्ययनविधिरन्तरङ्गत्वादर्थज्ञानं प्रयोजनतया स्वीकरोति । स चायमधिकारोऽध्ययनात्प्रागनवगतः पश्चादवगम्यते । अङ्गाध्ययनसंस्कृतात्स्वाध्यायादर्थावगमदर्शनात् । स इदानीमध्येता मन्यते मदुपयोगिकर्मावबोधजनकतया मदर्थमिदमध्ययनमिति ह्ययं मध्येऽधिकारः । अध्ययनमीमांसाश्रवणयोर्मध्ये स्थितेः । ततोऽस्य विधेर्नियोज्यो नास्ति । अधिकारी तु विद्यते । इममेवाधिकारमालोच्य पित्रादयोऽर्थदानादिनाऽध्यापकानानमय्य पुत्रादीनुपनाययन्ति । ननु विधिसिद्धिरेव तत्प्रयोजनं स्यात् । नार्थज्ञानम् । मैवम्—विषयस्वभावलब्धस्य तस्यापि प्रयोजनत्वात् । नन्वेकस्मिन्विषये प्रयोजनद्वयं विरुद्धमिति चेत्, न । एकस्य शाब्दत्वादितरस्य चार्थत्वात् ।

केचित्तु 'माणवकमुपनयीत, तमध्यापयीत, इति श्रुताध्यापनविध्यनुसारेणाध्यापनविध्यधिकारप्रयोजनत्वमध्ययनविधेर्निराकुर्वन्ति । यद्यध्यापनविध्यधिकारप्रयोजनत्वमध्ययनविधेः स्यात् तदाऽध्यापनविधेरपि

स्वाध्यायान्तर्गत्वेनाविवक्षितार्थत्वात्तत्प्रयुक्तता न सम्भवति । स्वशाखा हि स्वाध्यायशब्देनोच्यते । साक्षादधीतस्त्वध्यापनविधिः नूनं केषांचिच्छाखिनां स्वशाखान्तर्गतो भवेदिति स्वाध्यायस्य अविवक्षितार्थत्वेन तस्याप्यविवक्षितार्थत्वान्न तत्प्रयुक्तत्वमवकल्पत इति पश्चाद्भाव्यर्थावबोधोपयोगितयाऽध्येतुरेवाधिकारोऽध्ययनविधेः प्रयोजनम् । तन्न केवलाध्ययनसाध्यमिति स्वप्रयोजनसिद्धयेऽध्ययनविधिरेव विचारमाक्षिपतीति तदात्मकं शास्त्रमारब्धव्यमिति । अत एव भगवान् सूत्रकारो मीमांसाश्रवणस्य गुर्वायत्तत्वात् गुरुकुलान्निवृत्तिमात्रं निवारयन् भिक्षाचरणादिसकलब्रह्मचारिधर्माननुमन्यमान आह– 'अथातो धर्मजिज्ञासा' इति । सूत्रं च परमतोपन्याससमये व्याख्यातम् । नात्रातीव विप्रतिपत्तिः । इत्थमलौकिकादिविषयं शास्त्रं तत्प्रतिपाद्यं च कार्यात्मकं विधितत्त्वम् । तच्च शास्त्रं मीमांसासहकृतमेव प्रमाणम् । सा चारम्भणीयेति सिद्धम् ।

गम्भीरं गुरुतन्त्रसागरमुखं येऽन्यः प्रवेष्टुं ततः
तत्पारं प्रति यातुमुत्सुकधियस्तेषां कृते निर्मितम् ।
सम्यक्तन्त्ररहस्यमेतदुचितैः शब्दैश्च योग्यक्रमं
न्यग्भूतप्रतितन्त्रमार्गगतिभिर्न्यायव्रजैर्योजितम् ।। १ ।।
आम्नायान्तिमसीमनि स्फुरति यस्सद्भावनागोचरः
स्वे स्वे कर्मणि यः प्रशास्ति पुरुषं योग्याधिकारक्रमात् ।
आदत्ते विविधोपकारमखिलैरङ्गैरशेषाङ्गिनां
साक्षाद्विष्णुरिवैधते विधिरसौ नानावताराश्रयः ।। २ ।।

इति श्रीरामानुजाचार्यविरचिते तन्त्ररहस्ये

शास्त्रारम्भपरिच्छेदः पञ्चमः ।।

परिशिष्टम् ।। १ ।।

तन्त्ररहस्योदाहृतानां कारिकादीनामाकरनिर्देशपूर्वकमकाराद्यनुक्रमणिका ।।

वाक्यानि	आकरः	पुटम्
१ अङ्गुल्यग्रं यथात्मानम् ।	प्रकरणपञ्चिका पु. ६३	११
२ अथातो धर्मजिज्ञासा	जै-सू १.१.१	११२
३ अथातो धर्मजिज्ञासा ।	श्लोकवार्तिक १-११	१०५
४ अन्वितस्याभिधानार्थम् ।	प्रक.पञ्चि.(वाक्यार्थमातृका ।)	४६
५ अभिधाभावनामाहुः	तन्त्रवार्तिक २-१-१	६४
६ अर्थेनैव विशेषो	प्रक.पञ्चि.(नीतिपथ) ३६	५८
७ आत्मवाची स्वशब्दोऽयम्	न्यायरत्नमाला २-२	८
८ आत्मसिद्ध्यनुकूलस्य	प्रक.पञ्चि. पु. १९०	८९
९ आद्ये त्वध्ययने नैव	न्यायरत्नमाला १-३५	१०२
१० उपनीय तु यः शिष्यम्	मनुस्मृति २-१४०	१०९
११ औत्पत्तिकस्तु	जैमिनि. सू. १-१-५	३३
१२ कर्तव्यतावचनः	विधिविवेक. पु. २५३	७३
१३ चोदनालक्षणोऽर्थो	जैमिनि सू. १-१-२	५९
१४ जातिराश्रयतो भिन्ना	प्रक.पञ्चि. पु. १७	२८

वाक्यानि	आकरः	पुटम्
१५ जिज्ञासा जायते बोद्धुः	प्रक. पश्चि (वाक्यार्थमातृका)	४६
१६ जिज्ञासैकोपनीतस्य	बृहट्टीका	१०५
१७ ज्ञातसम्बन्धनियमस्य	प्रक. पश्चि. पु. ६४	१४
१८ तस्मान्नियोज्यसम्बन्ध	प्रक. पश्चि. पु. १८५	८४
१९ तस्माद् दृढं यदत्पन्नम्	श्लोक.वाः २-८०	६
२० तत्सन्देहव्युदासाय	प्रक. पश्चि.पु. ११५	१९
२१ तस्मात्स्वतः प्रमाणत्वम्	बृहट्टीका	८
२२ द्व्येकयोर्द्विवचन	पाणिनि. १.४-२१	६९
२३ धर्मे प्रमीयमाणे हि	बृहट्टीका	५५
२४ न केवलार्थविज्ञान	न्यायरत्नमाला. १-३९	१०७
२५ नियोज्यः स च कार्यम्	प्रक. पश्चि. पु. १८२	८३
२६ पदजातं श्रुतं सर्वम्	,, (वाक्यार्थमातृका)	५४
२७ पदमभ्यधिकाभावात्	श्लोक-वा. शब्द. १०७	४३
२८ परिपूर्णेन योग्यस्य	प्रक. पश्चि. (वाक्या. मातृ)	४६
२९ पश्यतः श्वेतिमारूपम्	श्लोक-वा. ७-३५८	४१
३० पुंसां नेष्टाभ्युपायत्वात्	विधिविवेक. पु. २४३	६५
३१ प्रयोजनमनुद्दिश्य	श्लोक-वा. ५-५५	८७
३२ प्राथम्यादभिधातृत्वात्	प्रक. पश्चि. (वाक्या. मा.)	५१
३३ फलमात्रेयो निर्देशात्	जै.सू ४.३.१८	१०१

वाक्यानि	आकरः	पुटम्
३४ फाल्गुनेऽन्यौषधीनां तु	तन्त्रवार्तिक १-३-४	८५
३५ बहुषु बहुवचनम्	पाणिनि. १-४-२२	६९
३६ भवति तु रक्तं प्रति	शाबरभाष्य. १-२-१७	४६
३७ भवत्पूर्वं चरेद्भैक्षम्	मनुस्मृति. २-४९	१०४
३८ भवत्यर्थस्य कर्तुः	प्रक. पञ्चि.पु. १७४	९४
३९ भूतभाव्युपयोगं हि	तन्त्रवार्तिक २-१-४	१०६
४० यः कश्चिद्येन यस्येह	प्रक. पञ्चि. पु. ६४	१६
४१ यत्कल्पनां विना	,, पु. ११५	१९
४२ यथा यथा सन्निधानम्	,, (वाक्यार्थ)	४७
४३ वाक्यार्थो लक्ष्यमाणो	बृहट्टीका?	४२
४४ विधिभावनयोश्चैक	श्लोक-वा. ७-७१	६८
४५ वेदाङ्गानि रहस्यम्	मनुस्मृति. ४-९८	१०४
४६ शरीरजैः कर्मदोषैः	,, १२-९	२६
४७ शास्त्रं शब्दविज्ञानात्	शाबरभाष्य. १-१-५	३३, ७१
४८ श्मशाने जायते वृक्षः	आगम?	२६
४९ श्रावण्यां प्रोष्ठपद्यां वा	मनुस्मृति. ४-९५	१०४
५० श्रेयःसाधनता ह्येषाम्	श्लोक-वा. २-१४	७३
५१ सः स्वर्गः स्यात्	जै.सू ४.३.१५	१०२
५२ सत्सम्प्रयोगे पुरुषस्य	जैमिनि सू. १-१-४	५९

वाक्यानि	आकरः	पुटम्
५३ सन्निधिः शब्दजन्मैव	प्रक. पञ्चि. (वाक्यार्थ)	४७
५४ सहसैव न सर्वेषाम्	,,	,,
५५ सामान्येनैव योग्यत्वम्	,,	४८
५६ स्मृतिसन्निहितैरेवम्	,,	५४
५७ स्वरूपमात्रं दृष्ट्वा च	श्लोक-वा. अभाव. २८	२२

—०—

परिशिष्टम् ।। २ ।।

महीशूरपुरस्थविश्वविद्यालयादाहृततालपत्रात्मकतन्त्ररहस्य मूलप्रतिकृतावुपलब्धपाठभेदाः ।

मुद्रितपुटम्	पङ्क्तिः	मूलपुस्तकपाठः
५	१०	दोषात् द्विधा प्रविभक्तः ।
,,	११	द्विवित्तिं जनयति ।
६	७	यत् ज्ञानम् तत्सत्यम् ।
७	१०	युक्तम् ।
,,	१३	जातमप्रामाण्यम् ।
,,	१९	स्वतः शब्दोऽयम् ।
८	२०	प्रमाणान्यधिकृ ।
९	९	घटादघटाच्च ।
,,	११	अर्थक्रियाज्ञानम् ।
,,	१९	न तेनापि सा निश्चेतुम् ।
१०	५	तथा स्वतस्त्वमनुपपन्नम् ।
,,	६	मात्रजन्यत्वप्रयुक्तत्वाद ।
,,	८	केवलसंस्काराजन्यत्वम् !
११	७	अप्रकाशात्मकयोरपि ।

मुद्रितपुटम्	पङ्क्तिः	मूलपुस्तकपाठः
१२	१८	शाब्दभेदात् ।
१४	६	गोचरः ।
,,	१३	साक्षात्कारिणी ।
१४	१४	तदा आपेक्षिकं करणम् ।
१५	१३	देशकालानवच्छिन्न ।
,,	१९	सत्यामग्निसंयोगस्य । तन्मा ।
१६	११	तदवधारणं सिद्ध्यति ।
१७	५	स्मरणमपि साम ।
१८	११	योऽर्थोऽर्थान्तरमनुप ।
,,	१२	देवदत्तो नास्ति ।
,,	२१	सन्दिग्धासन्दिग्धत्वात् । ननु ।
१९	१०	भोजनं कुर्वाणा रात्रि ।
,,	१५	नुमानं तु नैतादृशम् ।
,,	१६	एकत्र निश्चितकरण ।
२०	११	तु तच्छान्तिरिति ।
,,	२२	श्रवणविपरिवर्ती ।
२१	१	शाब्दं तु प्रमाणम् ।
२२	१५-१६	नैन्द्रियकीति न प्रत्यक्षोऽभावः । न शक्यं वक्तुं तत्र पूर्वमेवाभावो गृहीतः पश्चाद्बुद्धिस्थ इति । प्रति-योगिनस्तदानीम् ।
२३	१५	मात्रं च ना.... बुद्धिरित्युक्तम् ।

मुद्रितपुटम्	पङ्क्तिः	मूलपुस्तकपाठः
२४	१९	भिघातादिकारणवशादिति ।
२५	४	स तु भावान्तरो ।
,,	१६-१७	नवक्लृप्तिरपि न तन्महिम्ना ।
२६	१०	स एव यो वायुः ।
,,	११	ज्ञायते । न । स्फटिकवदुप ।
,,	१५	स्त्रीपुंसपरम्प ।
२७	१	पशुरादित्यो यूपः ।
,,	७	विषयाश्च न बोद्धर्यनवभासमाने ।
,,	९	कर्मता । किन्तु कर्तृतैव ।
,,	९	कर्तृतैव । ज्ञानक्रियाश्रयत्वात् । गन्तृपुरुषवत् । गमनफलसंयोगवतोऽपि पुरुषस्य न कर्मता । कर्तृतैव । परसमवेतक्रियाफल ।
,,	१९	न स्वतः । दध्ना ।
२८	५	प्रत्यक्षज्ञानगोचरः ।
,,	१३	प्रत्यभिज्ञागोचरः ।
३०	१३	न । कारणावैगुण्ये ।
३१	३	केवलं तवेति ।
,,	६	न द्रव्यम् ।
३४	२२	इत्युक्तम् ।
३६	४	विलक्षणम् ।
३७	१	संस्कारमण्डले ।

मुद्रितपुटम्	पङ्क्तिः	मूलपुस्तकपाठः
३७	७-८	सप्रयोजनम् । स्यादयं मनोरथः
		यदि संसारस्यानादिता स्यात् ।
		तत्तु न सिद्ध्यति ।
३९	१३	पदबुद्धिभेद इति ।
४०	३	क्रमभेदनिबन्धनः । तेषु क्रमोऽपि
		बुद्धिक्रमनिबन्धनः । तथाहि ।
४१	१	प्रत्येकं पदार्थवाचकत्वे ।
,,	२	ग्रहणाभावाच्च न पूर्वपूर्ववर्णा ।
,,	१३	बोधकत्वादर्शनात्तत्प्रतिपादितानाम्
४४	१५	गोपदमानयत्यन्वित ।
,,	,,	एवमानयतिपदमपि ।
४६	५	उपलक्षणं स्यात् ।
४७	१३	सन्निधिनिबन्धनम् ।
४८	१४	क्रियाकारणभावेन ।
४९	९	पदार्थानामप्याकांक्षाद्यु ।
५२	१६	एवं शुक्लां दण्डेनेत्यादीन्यपि ।
५४	९	एवमानयतिप्रयोगेऽपि ।
५५	१६	दोषासम्भवाद्युक्तम् ।
,,	,,	तद्दोषाद्दुष्टत्वम् ।
,,	१८	तद्दोषश्च न तेषु सङ्क्रामति ।
५६	५	तस्मात्तत्तत्स्पर्शोऽङ्गीकार्यः ।
,,	१२	कदाचिदप्ययमनन्वितार्थानि ।

मुद्रितपुटम्	पङ्क्तिः	मूलपुस्तकपाठः
५७	२	प्रतिपद्यमानप्रत्ययित ।
,,	२	दृष्टं ग्रहणापूर्वकत्व ।
,,	३	व्यवहारमप्रत्ययित ।
६०	४	अष्टका कर्तव्येति ।
६१	९	वैदिकपदानामपि कार्यपरत्वं द्रष्टव्यम् । एतच्चोपरिष्टात्प्रपञ्चयिष्यते । तस्मात्सर्वेषामपि कार्यपरत्वव्युत्पत्तेः ।
६३	२	व्यवहारे । साच ।
,,	३	न त्वखण्डशब्दतत्त्वम् ।
६४	३	जातवेदगुरुर्यज्वा ।
,,	१०	अर्थात्मा भावना ।
६६	१८	विधेश्च यो वाच्यवाचकभावः ।
६७	२	न तु चार्मणचक्षुषो वयम् । शब्दश्रवणानन्तर-भाविनी प्रवृत्तिरेवेति चेत् ।
६८	७	केवलं धीविशेषकरत्वमेव । न तु प्रवृत्ति-विशेषकरत्वम् ।
,,	१६	प्रयत्नः सैव प्रवृत्तिः सैव भावना ।
६९	११	देवदत्तादिषु ते न घटेताम् ।
७१	१६	जानाति । न हि तदानीं ज्ञानम् ।
७६	५	प्रथममाग्नेयादिवाक्येषु ।
७८	२	प्रथनकपालश्रपण ।
७९	७	नियमांशे प्राप्तिं कल्पयति

मुद्रितपुटम्	पङ्क्तिः	मूलपुस्तकपाठः
७९	१९	मन्त्रभावावगतपदार्थस्मरणम् ।
८०	१	राग्नेयादीन् । विनियोगविधिरपि ।
,,	२	विनियोगसिद्धिः । स्वयम् ।
,,	६	तेनैवाङ्गेष्वधिकारानुष्ठान ।
८१	१	पदार्थवर्गेषु समर्पित..... पदार्थानाम् ।
,,	४	प्रधानविधिरेव नाङ्गानाम् ।
,,	७	उद्दिष्टेषु त्वङ्गेषु ।
,,	२१-२२	गायति इत्यभिवतीऋगाश्रितस्य ।
,,	२३	अस्मिन्नप्युपा प्रकृतिषु ।
८२	५	विकृतावनन्वयलक्षणो बाधः ।
,,	७	स्ववाक्यश्रुतिभ्यामन्वये ।
,,	१५	नत्वेवेदम् ।
८३	१२	स्वर्गकामादिपदम् ।
८४	१	सुखापगमे ।
,,	८	तस्मादुत्तीर्णम् ।
८५	९	न हि साधनसाधनं साधनं स्यात् ।
८६	१०	गौरवात् । क्रिया ह्यनुष्ठीयमाना ।
८७	५	लिङादिवाच्यत्वम् । तदुक्तम्– 'अपेक्षितोपायतैव विधिरिष्टो मनीषिभिः' (प्रकरण-इति । प. पुट. १७८)
८७	१०	शास्त्रविदाख्यानेषु ।
८८	२	प्रत्यक्षवेद्यैव लोके स्वयमेव प्रवृत्तौ ।

मुद्रितपुटम्	पङ्क्तिः	मूलपुस्तकपाठः
८८	९	इच्छति प्रवर्तत इति हि ।
८९	१२	न चाविशिष्टो नियोज्यो भवतीति स्वर्गो नियोज्यविशेषणतयाऽन्वेति । यतो नाविशिष्टो नियोज्यः अत एवाश्रुत-नियोज्यके विश्वजिदादौ नियोज्याकाङ्क्षा-वशात् नियोज्याध्याहारे तद्विशेषणतया ।
,,	१९	स च नाविशिष्टो भवितुमर्हति ।
९०	२१	ननु नित्यनैमित्तिकाधिकारेषु ।
९२	२०	द्वारद्वारिकया ।
९३	१	विहितयोर्हन्तिपिंष्योस्तु ।
,,	२२	कृतिरीप्सिततमम् ।
९४	१९	कृतिरीप्सितं तत् ।
९५	७	प्रतीत्यसम्वन्धितया ।
,,	१८	पश्चात्करणगोचरा तदनुगोचरा ।
९७	२	द्विवचने च त्रिकद्वयापन्नस्य ।
९८	१६	एवान्तरकिञ्चित्कारः ।
९९	१८	विनियोजकत्वप्रयोजत्वावस्थमधिकारा ।
१०१	८	न तस्य भाव्यता ।
१०३	१	विचारयतु मादौ ।
१०४	२२	निवृत्तिपदवद्वेदमधीत्य ।
,,	२३	वचनमपि न्यायमूलमिति ।
१०५	१८	पुरस्सरी ।

मुद्रितपुटम्	पङ्क्तिः	मूलपुस्तकपाठः
१०५	२२	पदग्रहेण ।
१०६	२	संस्कार्यत्वायोगात् ।
,,	१३	तस्मिंस्तदापादितज्ञानैरेव ।
१०८	१४	विनियोजकाङ्गीकारात् ।
१०९	१२	धनाहरणादिपातित्वात्तल्लिप्सया ।
१११	४	कर्तृगामित्वेनान्तरङ्गत्वादर्थज्ञानम् ।
,,	२०	इतरस्य त्वार्थत्वात् ।
११२	५	प्रयोजनमिति । यच्चार्थावबोधाख्यं प्रयोजनं तन्न केवलाध्ययनसाध्यमिति ।

—०—

श्रीनन्दीश्वरकृतः

।। प्रभाकरविजयः ।।

FOREWORD

Two schools of Purva Mimamsa are well known, viz., the school of Kumarila Bhatta, and the school of Prabhakara-guru. There is a tradition current in our country that Prabhakara was a pupil of Kumarila, and that, as the former evinced extraordinary independence of thought, the title 'guru' was conferred upon him by the latter. In the second session of the Oriental Conference, our revered preceptor, Prof. Kuppuswami Shastrigal, read a paper in which he tried to support the tradition mentioned above. But M.M. Dr. Ganganath Jha and Dr. Pashupatinath Shastri hold a contrary view. All of them, however, agree that the school of Prabhakara was founded by Bhartrimitra. As regards the founder of the other school there is again a difference of opinion. Some think that the founder of this school is not known, while others think that he is the same person as that Vartikakara who is referred to in Prakaranapanchika as Vartikakara-misra.

It appears to us that Bhartrimitra was not the original propounder of the Prabhakara doctrines. He

was like Upavarsha, Sankara and others, the writer of a bhashya, and not a mere expounder of the bhashya. His name is mentioned along with some bhashyakaras of the Vedanta Sutras. Hence it is probable that he wrote his bhashya on the Vedanta Sutras. If it is thought that this bhashya was written upon the Sutras of Jaimini, then it must be admitted that it came into existence after the Sabara bhashya, because no reference of the former is found in the latter; and when Prabhakara-guru expounded the Sabarabhasya in disregard of the Bhatrimitrabhasya, Bhartrimitra could not have been the original propounder of the Prabhakara doctrines. Prof. Sastrigal in his paper in the Second Oriental Conference tried to identify the aforesaid Vartikakara-misra with Bhartrimitra. In another paper read in the third conference, he asserted that the Vartikakaramisra was Kumarila himself.

Dr. Pashupatinath Shastri, on the other hand, in his thesis entitled, Introduction to Purva Mimamsa, shows that the Vartikakara-misra whose views are refuted in Prakaranapanchika is neither Bhartrimitra

nor Kumarila, but some other Vartikakara whose Vartikas have been utilised by Kumarila in his Slokavartika.

Now it is necessary for us to ascertain the identity of the Vartikakara whose views have been represented in Nayaviveka and such other works, as being rejected in Brihati. Dr. Pashupatinath Shastri is of opinion that this Vartikakara cannot be Kumarila, because the sixteen interpretations attributed to the Vartikakara are not found in the works of kumarila. Only a set of six interpretations is found in the Slokavartika (लोक इत्यादि भाष्यस्य etc.). How can then the above Vartikakara be Kumarila?

Prof. Shastrigal has cited a passage from the Mimamsanayakosa, which is a commentary on Nayaviveka, and tried to prove the identity of the authors of the ten and six interpretations. He has cited another passage from Sarvadarsana Kaumudi which tells us that Kumarila wrote two other works, viz, Brihattika and Madhyamatika which are now lost to us. On the basis of these two passages our revered Shastrigal asserts that the Vartikakara, who was

the author of the sixteen interpretations, must be Kumarila himself, six of whose interpretations are found in the Slokavartika and the other ten must have existed in his Brihattika or Madhyamatika.

Dr. Shastri raises a grave doubt against this conclusion, in as much as there is nothing to show clearly that the six or ten interpretations challenged in Nayaviveka came from the pen of Kumarila and not from the pen of any other Vartikakara. We ought, therefore, to judge the matter more cautiously.

Four points are to be decided in this connection :

(1) Did the six interpretations found in Slokavartika originate with Kumarila?

(2) Do the six interpretations refuted in Nayaviveka agree with the six interpretations of Slokavartika?

(3) In case they agree, will that agreement justify us in indentifying Kumarila with the Vartikakara referred to as being refuted in Nayaviveka?

(4) Is the existence of the ten interpretations in Brihattika and Madhyamatika possible?

1. We should answer the first point in the negative, for statements are made in the Slokavartika in the third person, and not in the first person, and even the words अपरे, केचित्, etc., (some, others, etc.) are used there (षडर्थान् संप्रचक्षते, प्रत्याख्यानं तथा परे, परिसंख्यास्तुती केचित् etc.). Bhavadasa and others cannot be regarded as the Vartikakara referred to as being refuted in Nayaviveka, because their interpretations are refuted in the bhashya itself, and hence it must be admitted that they are commentators on the Sutras. Bhartrimitra, if he be regarded as the original propounder of the Prabhakara doctrines, according to which a seventeenth interpretation is to be accepted here, cannot be the author of the six and ten interpretations. Hence we cannot but admit that there were many other commentators of the bhashya like Kumarila. So the six interpretations did not originate with Kumarila.

2. Even if we admit Kumarila to be the author of these six interpretations, still it is not proved that these six are the same as those cited in Nayaviveka. In the abovementioned extract from Nayakosa, it is seen that the tenth of the ten interpretations as well

as the sixth of the six, are औचित्यानुभाषणम्; but the sixth of the six interpretations in Slokavartika is अथशब्दस्य दूषणम् । How can it be said then, that the two sets of six interpretations are the same?

3. Again from Nayakosa we learn that औचित्यानुभाषणम् is the only interpretation accepted by the said Vartikakara, while in Slokavartika, Kumarila prefers both अथशब्ददूषणम् and परिसंख्या । Hence it is perfectly clear that the said Vartikakara is not Kumarila, and we are not justified in saying that the school of Prabhakara is an offshoot of that of Kumarila. After this it is not necessary to examine the ten interpretations.

4. We do not like to dispute the fact that Kumarila wrote the two commentaries, the Brihattika and the Madhyamatika. But we do not exactly know where they began from. It is very probable that they began from the fourth chapter. The Brihattika was written first, then the Madhyamatika was composed by abridging that; and then came Tuptika, (brief tika) which was a still more abridged form of the former two. The very name, Tuptika, corroborates our sug-

gestion. In that ease, the existence of any ten or six interpretations of लोक, etc., of the bhashya would be impossible. So unless and until the manuscripts of these two works are discovered, we shall not be in a position to declare that the said Vartikakara is the same person as Kumarila.

Our revered preceptor, Prof. Shastrigal has in his command the Madras Oriental Manuscript Library which possesses the largest number of rare manuscripts of the Mimamsa literature. Hence we hope that it is he, who will be able, some time in future, to solve this problem.

So, as Dr. Jha says, we cannot ascertain for certain, the time of Prabhakara-guru from internal evidence. The school of Kumarila Bhatta possesses a vast literature of which many important works have been published. The Prabhakara school is rather unfortunate in this respect. Prakaranapanchika of Shalikanath is the first Prabhakara work that was published from Benares a few years ago. The present work will go to form the second on the list. Its authorship is ascribed to Nandishvara. No other work

of this author is known to us, and it is not possible to ascertain his time, etc. There are clear references in the book to Prakaranapanchika, Nyayaratnakara, etc., and so all that we can say of the author is that he flourished later than the authors of those works.

The expositions of Nandishvara in this book are very lucid, and it is sure that they will remove many a doubt regarding the Prabhakara doctrines. We notice here four important points.

It is generally believed that the Mimamasakas and specially the Prabhakaras are atheists. In Siddhantabindu, Madhusudana Sarasvati has stated that according to the Mimamsakas there is no God possessing omniscience, etc. In Shlokavartika, Kumarila himself has devoted about one hundred verses to refuting the view that God is the creator and destroyer of the world. But a close study of Kumarila will lead us to make a different conclusion. In the chapter on Sambandhaksepaparihara, Kumarila denies that God, whose existence is attempted to be established by inference, but not that God whom we know from the Vedas. It is clear that

Kumarila refutes the view of the Naiyayikas. His followers, the authors of Shastradipika and Bhattachintamani, have also done the same thing. Hence so far as the Bhattas are concerned it cannot be said that they are atheists. The Prabhakaras do also hold the same view. In the Sambandhaksepaparihara chapter of Brihati, Prabhakara-guru does not deny God, but Shalikanath has denied God in the corresponding chapter of Prakaranapanchika. It seems, therefore, that Shalikanath has beaten the track of Kumarila. Dr. Pashupatinath Sastri in his Introduction to Purva Mimamsa has dealt with this point at great length and has come to just the same conclusion; but as he could not cite any passage from any Prabhakara work directly supporting it, its correctness has been doubted in many quarters. Now, in this book it is stated in unequivocal terms that the inferential existence of God which is propounded by others is denied by the Prabhakaras and that God is not denied- 'ईश्वरपरोक्तमनुमानं निरस्तम्, नेश्वरो निरस्तः ।'

It is not of course improbable that there was some school of Purva Mimamsa, other than those

mentioned above, that was atheistic in its tendency. Some believe that Murari Mishra was the founder of that school. We have come to learn from Pandit Ramanath Shastri, that he has seen one manuscript bearing the name अंगत्वनिरुक्ति which belongs to this third school. We have not yet had any opportunity of looking over the said work, and so at present we are unable to pronounce any opinion regarding it. We hope that other works, too, of all the schools will be unearthed in time, which will throw light on many obscure corners. The greatest service which the present work renders is that it removes the charge of atheism which has constantly been imputed to the Prabhakaras.

The second point which it makes clear is that the Prabhakaras are not opposed to the Advaitins. The Mimamsakas apparently condemn some views of the Advaitins, but really they are not opposed to them. All that they want to impress is that the Advaita doctrines are not suitable for those people who have not been able to subdue their senses. We have cited passages from Brihati itself which bear out the correctness of this conclusion, and it is now very grati-

fying to find that in Prabhakaravijaya the very same line of reconciliation is indicated.

The third error that is removed by this work is that the Atomic Theory of Causation comes from the Naiyayikas, and is not compatible with Vedic doctrines. It goes further to elucidate that Arambhavada should not form the basis of Vivartavada.

The fourth error which is dispelled is that Indriyatmavada belongs to the Charvakas alone. It is shown that the doctrine is held by the Pauranikas also.

This work serves to correct many such errors. Its discussions on the requisition of the Injunction for Learning, coroboration of Akhyativada, Paramanuvada and existence of a supersensible power, acceptance of Arthapatti as a seperate means of proof, distinction of body from soul, defence of Vyapti, refutation of Bhedavada, etc., are very significant. It is not a mere reproduction of Prakaranapanchika, and in many places its expositions are more lucid and impressive than those of the latter.

In publishing this work we have had to depend upon only one manuscript supplied by Pandit Ramanath Shastri. There is another manuscript in the Madras Oriental Manuscript Library, from which we have taken the last three Prakaranas which were not found in Shastri's manuscript. We have not been able to collate the two manuscript. We hope to do so in the second edition of this work. We regret to say that we have not been able to make this edition free from printing mistakes. Our learned readers will kindly pardon us for that. Our thanks are first due to Pandit Ramanath Shastri and the Curator of the Madras Oriental Library who have supplied the manuscripts. Thanks are also due to the authorities of the Sanskrit Sahitya Parishat who have made it their aim to publish unpublished Shastric works. May they be successful in achieving this end.

Bowbazar, Calcutta **ANANTA KRISHNA SASTRI.**
20th Feb., 1926.

॥ श्रीः ॥

॥ श्रीरस्तु ॥

॥ भूमिका ॥

विदितमिदं समेषाम्- यत् मीमांसादर्शनमेव बौद्धादिनास्तिकमतनिरसनेन सर्वेषामास्तिकदर्शनानामुपजीव्यमिति । पाश्चात्यास्तु मोक्षमूलरप्रभृतयो धर्ममात्रस्यानुष्ठेयस्यात्र विवेचनात् जीवेश्वरमोक्षतत्साधनानिरूपणाच्च मन्यन्ते- न मीमांसा दर्शनतामर्हतीति ॥

अयमेतेषामाशयः- जैमिनिर्हि महर्षिः स्वीयेषु सूत्रेषु न जीवमीश्वरं वा कुत्रापि सूत्रयति । भाष्यकारास्तु यत् देहातिरिक्तजीवस्वरूपादिकं भाष्ये भाषयन्ति, नेदं किमपि सूत्रारूढम् । व्यक्तं चैतच्छाङ्करभाष्ये "एक आत्मनः शरीरे भावात्" इति सूत्रे विवेचितम् - यत् "ननु शास्त्रमुख एव प्रथमे पादे शास्त्रफलोपभोगयोग्यस्य देहातिरिक्तस्यात्मनोऽस्तित्वमुक्तम्, सत्यमुक्तं भगवता भाष्यकृता, नतु तत्रात्मास्तित्वे सूत्रमस्ति"- इति । शक्येतापि कथंचन "सूचनात्सूत्रमुच्यते" इति, "औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः" इति सूत्रयद्भिराचार्यैर्देहातिरिक्तात्मवादस्यापि सूचनमिति कल्पनम्, ईश्वरसूचनं तु कुत्रापि कथमपि न शक्यते कल्पयितुम्; यतो हि "चोदना पुनरारंभः" इति अपूर्वमेव कर्मणा फलजननेऽवान्तरव्यापारः, नेश्वरप्रसाद इति सूत्रणात् सूचयतीश्वरनिषेधमपि सूत्रकारः - इति ॥

इदमत्र वयं पश्यामः- यत् मीमांसाऽपि दर्शनतामर्हत्येव । सत्यमीश्वरनिषेधः सूत्रकारेणोक्तरीत्या सूच्यत इव, एवं तु इदमेवात्रालोचनीयम्- यत् ईश्वरप्रसादस्य साधनतानिषेधः कथमीश्वरनिषेधं सूचयतीति?

"चोदना पुनरारंभः" इति सूत्रं तु सत्यपीश्वरे तत्प्रसादो न सुखानुभवकारणमिति कल्पनायामपि नास्वरसम् । नहि अपूर्वावान्तरव्यापारतासमर्थनपरं सूत्रमीश्वरनिषेंधसमर्थमपि भवितुमर्हति । एवं च "चोदना पुनरारंभः" इति सूत्रमीश्वरसाधनतामात्रनिषेधपरम्, न तु तत्कर्तृतानिषेधपरम् । अत एव तृतीयाध्याय एव "धर्मं जैमिनिरत एव" इति जैमिनिमतं निरस्यत्वेनोत्तरमीमांसायां बादरायणः सूत्रयति, न तु द्वितीयाध्याये, यत्र प्रधानाद्यचेतनकारणताया निरासः । अतो मन्यामहे न जैमिनिमहर्षिर्निरीश्वरवादपक्षपातीति कल्पनं सम्मूलमिति । यावता च देहातिरिक्तजीवात्मस्वरूपमीश्वरश्च जैमिनिमहर्षेरपि सम्मतः, तावतेदमपि सिद्धम्- यत् जैमिनीयाऽपि मीमांसा दर्शनतामर्हति - इति ।।

अत्र केचिदुत्तरमीमांसायां परामृष्टो जैमिनिः पूर्वमीमांसाकृतो जैमिनेर्भिन्न इति मन्वते, वयं तु पश्यामो न तयोर्भेद इति । विस्तरश्चात्र श्रीपशुपतिनाथशास्त्रिसंपादितात् Introduction to the purva meemamsa इत्यभिधानान्निबन्धादनुसन्धेयः ।।

अत्र केचित्प्रत्यवतिष्ठन्ते - यत् बहवः खलु प्रामाणिकाः नास्ति मीमांसकमत ईश्वर इति वदन्तीति । यथा सिद्धान्तबिन्दौ श्रीमधुसूदनसरस्वत्यः – "नास्ति सर्वज्ञत्वाद्युपेतं ब्रह्मेति मीमांसकाः"– इति । प्रसिद्धिरप्येतदनुगुणैव वर्तते – "निरीश्वरा मीमांसकाः"– इति । द्विविध एव प्रसिद्धः प्रस्थानभेदो मीमांसकानाम् - कुमारिलप्रस्थानम्, प्रभाकरप्रस्थानमिति । तत्र कुमारिलपादाः स्पष्टमेव स्रष्टारमीश्वरं निषेधन्ति- "सर्वज्ञवन्निषेध्या नः स्रष्टुस्सद्भावकल्पना"- इति । किं बहुना? संबन्धाक्षेपपरिहारप्रकरणे प्रायेण शताधिकं श्लोका ईश्वरसृष्टिप्रलयादिनिरासपरा दृश्यन्ते । तत्र यदि कुमारिलपादाः सेश्वरमी-

मांसापराः, तर्हि किमिति महान्तमायासमत्रावलंबन्त इति सर्व एव समालोचयन्तु । अतो वयं पश्यामः - न कुमारिलपादाः सेश्वरमीमांसापराः - इति ।।

वयं तु प्रतीमः - संबन्धाक्षेपपरिहारप्रकरणगतैश्श्लोकैस्सर्वैरपि कुमारिलपादा आनुमानिकेश्वरनिरासमेवाशेरते, नतु वैदिकेश्वरनिरासम् । "सर्वज्ञवन्निषेध्या नः" इति श्लोके 'सर्वज्ञवत्' इति निदर्शनमत्रैव स्वरसम् । अनेन हि निदर्शनेनेदमेव विवक्षितम् - यत् परस्पराश्रयप्रसङ्गात्, बुद्धस्य सर्वज्ञत्वमनुमानेन बुद्धविरचितेनागमेन वा निर्णेतुमशक्यमिति; तत्स्वारस्येन तु दार्ष्टान्तिकभागेऽपीदमेव विवक्षणीयम् – यत्, ईश्वरोऽप्यनुमानेन, आनुमानिकेश्वरविरचितेनाम्नायेन वा न सेत्स्यतीति । इत्थं च सर्वोऽपि पूर्वतनः संदर्भो वेदपौरुषेयत्वनिरासपर एव, नत्वीश्वरनिरासपरः ।।

अनेनेदमेव सूच्यते - यत् आस्तिकदर्शनतायां वेदापौरुषेयत्वमेव नियामकम् न त्वीश्वराङ्गीकार इति । सति चैवं वेदवाक्यानामपि अनुमानविधयैव प्रामाण्यम्, न तु स्वतन्त्रतयेति वदतां वैशेषिकाना मानुमानिकेश्वरपक्षपातिनामपि गगनकुसुमायमानैवाऽऽस्तिकता ।।

अयमत्र वैशेषिकानां प्राभाकराणां च विशेषः - यत् प्राभाकराः लौकिकवाक्यमेवानुमानविधया प्रमाणं मन्यन्ते, वैदिकवाक्यं तु वाक्यविधया, वैशेषिकास्तु द्विविधमपि वाक्यमनुमानविधयेति । व्यक्ततरं चेदं प्रभाकरविजयकाराः प्रभाकरविजये प्रकाशयन्तीति नात्र विस्तरीतुमभिलषामः । कुमारिलपादास्तु नैयायिका इव लौकिकवाक्यानामपि वाक्यविधया प्रमाणतां मन्यन्त इति त्वन्यदेत् ।।

अयमेवात्र निष्कर्षोऽनुसन्धेयः - यत् कुमारिलपादाः प्राभाकराश्चानुमानिकेश्वरं निरस्यन्ति, न वैदिकं तमिति । वेदापौरुषेयत्वे

तु अपौरुषेयस्य तस्य महिम्ना न केवलमीश्वरं, किं तु सृष्टिप्रलयादिकं सर्वमेव कुमारिलपादा अनुमन्यन्ते - "एवं ये युक्तिभिः प्राहुस्तेषां दुर्लभमुत्तरम्" - इति ॥

अयमेवाशयोऽस्य वार्तिकस्येति शास्त्रदीपिकादितोऽपि जानीमः । यथा शास्त्रदीपिकायाम्- "नित्यत्वे वेदस्यावसिते तद्बलेनेश्वरसिद्धिर्भवतु वा मा वा"- इति । भाट्टचिन्तामणिकारोऽपि नैयायिकसम्मतसृष्टिप्रलयप्रक्रियातः किंचिदिव वैलक्षण्येन मीमांसकानामपि सृष्टिप्रलयप्रक्रियां निरूपयन्नमुमेवाशयमवलम्बते । किं बहुना ? न्यायप्रकाशकारोऽपि - "ईश्वरो गतकल्पीयं वेदं स्मृत्वोपदिशतीत्येतावतैवोपपत्तौ प्रमाणान्तरेणार्थमुपलभ्य रचितत्वकल्पनानुपपत्तेरिति" वेदापौरुषेयत्वमीश्वराङ्गीकारेणैव विवेचयति । एवंच भाट्टसंप्रदायो न निरीश्वरसंप्रदाय इति तस्य निरीश्वरसंप्रदायत्वकथा न सन्निबन्धनेति पश्यामः ॥

एतेन - प्रभाकरसंप्रदायोऽपि - व्याख्यातः । सत्यं कुमारिलपादा इव सन्बन्धाक्षेपपरिहारप्रकरणेऽपि बृहत्यां न प्रभाकरगुरव ईश्वरं निरस्यन्ति, केवलं शालिकनाथमिश्रा एव तं तस्मिन्नेव प्रकरणे प्रकरणपञ्चिकायां निरस्यन्ति । अत्र च मूलं न बृहती, किन्तु श्लोकवार्तिकमेव । एवं च प्रकरणपञ्चिकाकारा अपि कुमारिलपादा इवाऽऽनुमानिकेश्वरनिरासमेवाशेरते । व्यक्तं च सर्वमिदं श्रीपशुपतिनाथशास्त्रिणः स्वीये निबन्धे न्यरूरुपन्निति तत एवाधिकमवगन्तव्यम् ॥

श्रीयुक्तपशुपतिनाथशास्त्रिमहोदयाः स्वीये निबन्धे न कुत्रापि प्रभाकरविजयमुल्लिखन्तीति वयमनुमिनुमो यत् प्रभाकरविजयमिमं ग्रन्थमदृष्ट्वैव स्वीयं निबन्धं ते प्राचीकशन्निति । तत्रच प्रभाकरमतेऽपीश्वरोऽस्तीति व्यवस्थापनं तेषाम् बहूनामेव विमतमासीत् ॥

इदमस्माभिरवगतं तेषां मुखात् - यत् महामहोपाध्यायश्रीगङ्गानाथ झामहोदयाः- "कुमारिलप्रभाकरयोः सेश्वरमीमांसापरत्वव्यवस्थापनं श्रीपशुपतिनाथशास्त्रिणां सत्यं भक्त्यतिशयं गमयतीश्वरे; दार्शनिक-दृष्टिस्तत्त्वदृष्टिश्च यदि पर्यालोच्यते, तर्हि निरीश्वरमीमांसापरत्वमेव तयोर्योग्यमि"ति श्रीपशुपतिनाथशास्त्रिणां कुमारिलप्रभाकरयो-स्सेश्वरमीमांसापरत्वसिद्धान्ते विमतिं कदाचनाविरकार्षुरिति ।।

श्रीपशुपतिनाथशास्त्रिणो हि कुमारिलपादानां सेश्वरपक्षत्वे बहूनेवावष्टंभान् शास्त्रदीपिकादितो वार्तिकतश्च प्रादीदृशन्निति नेदं परोक्षं तन्निबन्धसमालोचकानाम् । सत्यपि चैवं तस्मिन्नंशे विमति-प्रकाशनं झामहोदयानां किन्निबन्धनमिति न वयं जानीमः ।।

प्रभाकरसेश्वरतायां तु न विशिष्टमुपष्टंभकं स्वीये निबन्धे श्रीपशुपतिनाथशास्त्रिणः उपाक्षिपन्निति सत्यमासीत् बहूनां विमत्य-वसरः, इदानीं तु प्रभाकरविजयेनाऽयमपि विमत्यवसरो निरवकाशी-क्रियत इति सत्यं भाग्यवन्तः शास्त्रिमहोदयाः । स्पष्टमिदमत्र प्रभाकर-विजये विवेचितं सोपपत्तिकम् - एवं चेश्वरे परोक्तमनुमानं निरस्तम्, नेश्वरो निरस्त इति । अन्तिममप्यत्रत्यमानुमानिकेश्वरनिरास-प्रकरणमुपलभ्यमानं शास्त्रिमहोदयानां सिद्धान्तमुपबृंहयति । तदिदं सिद्धम् - यत् प्रभाकरसंप्रदायोऽपि न निरीश्वरसंप्रदाय इति ।।

कस्तर्हि संप्रदायो मीमांसकानां निरीश्वरवादपरः? इति चेत्, न वयं जानीमः । सत्यमस्ति कश्चनापरोऽपि संप्रदायो मीमांसकानां मुरारिमिश्रसंप्रदायः । मन्यन्ते केचन - "मुरारेस्तृतीयः पन्थाः" इत्याभाणको मिश्रानेवैतान् गोचरयतीति । सूचितश्चायमर्थः कदाचन हिन्दुस्थानरव्यूपत्रिकायां श्रीगोपीनाथकविराजमहोदयैरपि । परंतु सदुःखमिदमत्र निवेदयामः - यत् तत्संप्रदायानुसारिणं निबन्धं कमप्यद्य

यावन्नोपलभामहे – इति । महता खलु भाग्येनेदं जानीमः - यत् तत्संप्रदायानुसार्यपि कश्चानाङ्गत्वनिरुक्तिविषयोऽस्मदाचार्यचरणानां मद्रपुरसंस्कृतपुस्तकागाराध्यक्षाणां (श्रीकुप्पुस्वामिशास्त्रिपादानां) निदेशेन विरलविरलानां प्राचीनादर्शानां संग्रहणार्थं तत्र तत्र पर्यटितवतामस्मत्प्रियमित्राणामत्रैव ग्रन्थे संपादकतया विनिवेशितानां श्रीरामनाथशास्त्रिणां दृष्टिपथमायात इति । मन्यामहेऽस्मदाचार्यचरणानामनुग्रहपूर्णः कटाक्षो यदि संस्कृतसाहित्यपरिषदि पतेत्, तर्हि नियतं सा विरलविरलानां बहूनां प्रभाकरादिसंप्रदायानुसारिणां ग्रन्थानां प्रकाशनेन महान्तमुपकारं पण्डितवर्गस्य, आस्तिकवर्गस्य, किं बहुना? सर्वस्य लोकस्याऽऽधास्यतीति ॥

विदितचरमिदं समेषाम् - यत् अस्मदाचार्यचरणा यथा स्वायत्तविरलविरलविविधादर्शाः, न तथाऽन्य इति । श्रीपशुपतिनाथशास्त्रिणस्तु नूनमस्मदाचार्यचरणान् किंचिदिव स्वीये निबन्धे कटाक्षयन्तीव । परंतु वयमत्र विश्वसिमः - यदस्मदाचार्यपादाः केचन तदन्तेवासिनो वाऽपरेषामपि प्रमाणानां बहूनां प्रदर्शनेन स्वीयं मतं समर्थयिष्यन्तीत्यलमनेनाप्रकृतचिन्तनेन ॥

इदमेवात्रालोचनीयम् - यत् प्रभाकरसिद्धान्तानामन्यथाऽन्यथा समालोचने किं निदानमिति । करतलामलकतुल्यमिदं निमित्तम् – यत् प्रभाकरसंप्रदायानुसारिणां निबन्धानामप्रचारः - इति । अतः सर्वेषामपीदमेवाधुना कर्तव्यम् - यत् प्रभाकरनिबन्धानां प्रकाशनम्। संस्कृतसाहित्यपरिषद्धि प्राभाकरनिबन्धानामपि प्रचारणार्थं कृतदीक्षेति सत्यं सर्वोऽपि पण्डितवर्ग आस्तिकवर्गश्च तस्या अधमर्णः । अनया हीदानीं प्रभाकरविजयस्य प्रकाशनेन ध्रुवं सर्वेषां कश्चनान्धतमसे महादीप एव प्रदत्तः । अनेन हि ग्रन्थेन बहुतरा भ्रमा अद्य यावदनुवर्त-

माना निवर्त्यन्ते । तत्र प्रथमो भ्रमः तन्निवर्तनप्रकारश्चानुपदमेवाविरकारि। यथा प्राभाकरा निरीश्वरा इति भ्रमः, तन्निरासश्च ।।

द्वितीयस्तु भ्रमोऽयमेव, यत् प्रभाकरसंप्रदायोऽद्वैतसंप्रदायस्य विरोधीति, अयं हि भ्रमः प्रकरणपञ्चिकादिषु, किं बहुना? प्रभाकरविजयेऽपि च तत्र तत्राद्वैतमतनिरासस्यापि करणात्सर्वथा न निर्मूलः, इदमेवात्र तत्त्वम् - यत् अद्वैतमतनिरसनं न पारमार्थिकदृष्ट्या, किन्तु, "न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्" इति न्यायेन कर्मप्रसङ्गे तदधिकारविरोधित्वाददद्वैतप्रचारस्य, "नहि निन्दा निन्द्यं" निन्दितुं प्रवृत्ता, किन्तु स्तुत्यं स्तोतुमि"ति न्यायेनैव । स्पष्टमिदं बृहतीदर्शिनाम्-यत् प्रभाकरगुरवो न लेशतोऽप्यद्वैतसंप्रदायं विरुन्धत इति ।।

तदत्र प्रसङ्गसङ्गत्या बृहतीगतानि प्रभाकरगुरूणामद्वैतसंप्रदाये परमादरसूचकानि त्रीणि वाक्यानि पाठकमहोदयानामुपहरामः । यथा - "(१) यत्तु अहंकारममकारौ अनात्मनि आत्मधर्माध्यास इति, मृदितकषायाणामेतत्कथनीयम्, न तु कर्मसङ्गिनाम्; तदुक्तं भगवता द्वैपायनेन - "न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्" इति, (२) "यत्तु ब्रह्मविदामेष निश्चयः, यदुपलभ्यते तदतथ्यमिति; यन्नोपलभ्यते तत्तथ्यमिति; नमस्तेभ्यः, विदुषां नोत्तरं वाच्यम्" इति, (३) "विज्ञातृरूपता तु विज्ञानस्यानाशङ्कनीया, अनाशङ्कितत्वात्, युक्तं चानाशङ्कितम्, कर्मप्रवणत्वात्" इति । प्रसङ्गेऽस्मिन्कुमारिलपादानामपि अद्वैतसंप्रदाये परमादरसंसूचकमेकं तदीयं वचनमपि नानुल्लेखयोग्यम् । तदिदं तेषां वचनम्-

इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या ।
दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेन ।। इति ।।

इदं हि वचनमात्मवादान्ते- "ज्ञानशक्तिस्वभावोऽतो नित्यः सर्वगतः पुमान् ॥" इत्यात्मनो विभुत्वनिरूपणानन्तरं प्रवृत्तं वेदान्तपदेनात्मविभुत्वसिद्धान्तपरवेदान्तदर्शनमेव गोचरयच्चाद्वैत-दर्शनमेव तेन परामृशति । नहि द्वैतविशिष्टाद्वैतादिवेदान्तदर्शनेषु कुत्राप्यात्मविभुत्वं सिद्धान्त इति सिद्धमिदं यत् कुमारिलपादा अपि अद्वैतमतं विशेषत आद्रियन्त इति ॥

कथमेवं सति "नास्ति सर्वज्ञत्वाद्युपेतं ब्रह्मेति मीमांसका इति श्रीमधुसूदनसरस्वतीवचनमिति चेत्, आनुमानिकेश्वरनिराकरणपर-मुक्तवचनमित्यवगम्यते । अत एव सगुणं निर्गुणं चोभयमपि ब्रह्म शास्त्रयोनीति वेदान्तसिद्धान्तः । कर्मण एवापूर्वं प्रपंचोत्पत्तिश्चेति वैदिकोऽपीश्वरः कर्मप्रसङ्गानुपयुक्त इति तन्निराकरणमिति तु परे । सूचितश्चायमर्थः प्रभाकरविजयेनापि ईश्वरानुमानिकतानिरासावसरे आत्मवादान्तगतस्य - मृदितकषायाणामेवैतत् कथनीयं नतु कर्म-सङ्गिनामिति वाक्यस्योपष्टंभकतया ग्रहणेन । अनेन हीदं विशदीक्रियते- यत् आत्मैकत्वं तस्य ब्रह्माभेद ईश्वरंसत्त्वं प्रपञ्चमित्थ्यात्वमित्यादयोऽ-द्वैतसिद्धान्ताः सर्व एव मीमांसकसमता एव, एवमपि कर्मप्रसङ्गानु-पयुक्ततया तत्र तत्र तन्निराकरणमिति । इदञ्च प्रभाकरविजयेऽस्मिन् मुद्रापिते तत्र तत्र टिप्पणीमुखेन स्पष्टीकृतमेव । तदिदं सिद्धम् - यत् प्रभाकरसंप्रदायः कुमारिलपादसंप्रदायश्च द्वयमपि नाद्वैतसंप्रदायस्या-त्यन्तविरोधीति ॥

तृतीयस्तु भ्रमोऽयमेव - यत् परमाणुकारणतावादो नैयायिकानामेव, नान्येषां केषामपीति नायं वैदिकसिद्धान्तसंमत इति । प्रभाकरविजये परमाणुसमर्थनप्रकरणे प्रदश्र्यमानस्याभिनिवेशस्य दर्शने तु नियतमिदं गम्यते - यत् परमाणुकारणतावादो वैदिकानामपि सम्मत इति ।

एतेनेयमपि शंका निरवकाशीक्रियते, यत् परिणामवाद इवारंभवादो न विवर्तवादस्य भूमिकात्वमर्हति, नहि आरंभवादः केषामपि वैदिकानां सिद्धान्तगोचर इति । यथाचाऽऽरम्भवादो विवर्तवादस्य भूमिका तथाऽन्यत्र निरूपितम् ।।

तुरीयस्तु भ्रमोऽयमेव - इन्द्रियात्मवादोऽयं चार्वाकैकदेशिनामेवेति । अयं हि प्रभाकरविजये आत्मनः शरीरादिभेदसमर्थनपरस्याष्टादशस्य प्रकरणस्य दर्शने सुदूरं गच्छति, यत्रायं वादः सात्यतपसोपाख्यानं श्रीदेवीभागवतगतमनुसृत्य पौराणिकानामिति लक्ष्यते ।।

अन्ये च भ्रमा बहवः एव प्रभाकरविजयेनानेन निरस्यन्त इत्यध्येतारः स्वयमेव जानीयुरिति नात्र वयमधिकं व्यापृणुमः ।।

न केवलं भ्रमनिवृत्तिमात्रमनेन सम्पाद्यते, किन्तु प्रकरणपंचिकाद्यपेक्षया सुविशदं प्रभाकरसिद्धान्तानां प्रकाशनमपि ।।

निक्षिप्यतां किञ्चिदिव दृष्टिः - अध्ययनस्याध्यापनविधिप्रयुक्तत्वप्रकरणे, अख्यातिसमर्थने, परमाणुसमर्थने, अतीन्द्रियशक्तिसमर्थने, अर्थापत्त्यतिरिक्त-प्रमाणताप्रकरणे, आत्मनः शरीरभेदसमर्थनप्रकरणे, व्याप्तिसमर्थनप्रकरणे, भेदाभेदनिरासप्रकरणे च । प्रतिप्रकरणं विचारप्रणाल्या अपूर्वाया अत्रादृतायाः समालोचने महान् विस्तरः स्यादिति आत्मनः शरीरादिभेदसमर्थनप्रकरणमख्याति-समर्थनप्रकरणं च किञ्चिदिव समालोचयामः ।।

तत्र प्रथमे हि प्रकरणे दोषसाम्यप्रदर्शनमुखेन शरीरातिरेकपक्षखण्डनपूर्वकं शरीरात्मवादो यथा समर्थ्यते, यथाच तन्निरसनेन शरीरात्मवादे प्रसक्तदूषणानां सर्वेषामप्रसक्त्येन्द्रियात्मवादः समर्थ्यते, यथा वा तत्पक्षप्रसक्तानां दूषणानामप्रसंगेन मनआत्मवादः,

प्राणात्मवादः, विज्ञानात्मवादः, सर्वातिरिक्तस्थिरविभुनानात्मवादश्च समर्थ्यते, तथा नान्यत्र कुत्रापि ग्रन्थे समर्थितमिति वस्तुतत्त्वप्रकाशनमिदम्, नेयमतिशयोक्तिः ॥

एतेन - द्वितीयं प्रकरणमपि - व्याख्यातम् । भामतीपठनकाले यावन्ति दूषणान्यख्यातिवादेऽपरिहरणीयानि सर्वे विजानन्ति, सर्वाणि तानि सर्व एव प्रभाकरविजयाध्ययनवेलायां सुपरिहरणीयानि ज्ञास्यन्तीति सुदृढोऽयमस्माकं विश्वासः । प्रकरणपञ्चिकादिनास्य गतार्थत्वशंकानिरासार्थमध्येतार एव स्वयं तारतम्यं परीक्षन्तामिति टिप्पणीमुखेन प्रकरणपञ्चिकादिकमपि तत्र तत्र समयोजि ॥

अथेदानीं किं प्रभाकरसंप्रदायोऽतिप्राचीन उत कुमारिलसंप्रदाय इति समालोचयामः । तत्र Professor श्रीकुप्पुस्वामिशास्त्रिपादा मन्यन्ते – कुमारिलसंप्रदायः पूर्वतनः, पाश्चात्यश्च प्रभाकरसंप्रदाय इति । महामहोपाध्यायश्रीगङ्गनाथझामहोदयानां श्रीपशुपतिनाथशास्त्रिणां च मतं तद्विपरीतम् । संप्रदायद्वयमिदं तत्तदुपज्ञमुताचार्यान्तरोपज्ञमिति पर्यालोचनायां तु प्रभाकारसंप्रदायो भर्तृमित्राचार्याद्युपज्ञ इति सर्वसंप्रतिपन्नम् । कुमारिलसंप्रदायप्रवर्तकास्तु केऽप्यासन्निति नेदानीमपि ज्ञायते इति केचन मन्यन्ते । परेतु सोऽपि वार्तिककारान्तरोपज्ञ एव, ये खलु प्रकरणपञ्चिकायां वार्तिककारमिश्रपदेनोपक्षिप्यन्त इति मन्वते ॥

ममतु प्रतिभाति भर्तृमित्राचार्या इमे न प्रभाकरमतप्रवर्तका आचार्याः, इमे खलूपवर्षभर्तृप्रपञ्चभर्तृहरिब्रह्मदत्तशंकरादिवत् भाष्यकर्तार एव, न भाष्यव्याख्यातार इत्यवश्यमूरीकर्तव्यम् । अत एव-

"यद्यपि भगवता बादरायणेन इदमर्थान्येव सूत्राणि प्रणीतानि, विवृतानि च परिमितगम्भीरभाषिणा भाष्यकृता, विस्तृतानि च तानि

गम्भीरन्यायसागरभाषिणा भगवता श्रीवत्साङ्कमिश्रेणापि; तथापि आचार्य-टङ्क-भर्तृप्रपञ्च-भर्तृमित्रभर्तृहरि-ब्रह्मदत्त-शङ्कर-श्रीवत्साङ्क-भास्करादि-विरचितसितासितविविधनिबन्धनश्रद्धाविप्रलब्धबुद्धयो न यथावत् अन्यथा च प्रतिपद्यन्त - इति तत्प्रतिपत्तये युक्तः प्रकरण-प्रक्रमः ।" इति सिद्धित्रयोक्तिरुपपद्यते ॥

अत्र चेदमेवालोचनीयम् - यत् जैमिनिसूत्राणां भाष्यकर्तार उत बादरायणसूत्राणामिति । इदमत्र सर्वैरपि स्वीकर्त्तव्यमेव - यत् भर्तृ-प्रपञ्चशंकरादिसाहचर्यादुक्ताचार्यैर्बादरायणसूत्राणामेव भाष्यमारचितम्, न जैमिनिसूत्राणामिति । यत्तु "प्रायेणैव हि मीमांसा लोके लोकायतीकृते" त्यत्र व्याख्यायां नित्यकर्मणामफलत्वसिद्धान्तो भर्तृमित्राचार्यादिसम्मतो निरस्यत्वेन कुमारिलपादैरुपपाद्यते, तदिदं तेषामुत्तरमीमांसाभाष्यकृत्त्वेऽपि नानुपपन्नम् । अन्यथा जैमिनि-सूत्राणामेव भाष्यं तैर्विरचितमिति कल्पनायां शाबरभाष्यानन्तरं तस्य प्रवृत्तिरित्येवोरीकर्तव्यम्, नतु ततः पूर्वम्; उपवर्षादिवत् मण्डनीयतया खण्डनीयतया वा तेषामपरापरामर्शात् । एवं च सति भर्तृमित्रभाष्य स्वमूलभूतं परित्यज्य शाबरभाष्यस्यैव विवरणं प्रभाकरगुरुभिः क्रियमा-णमवश्यमिदं गमयति - यत् सिद्धान्तैकदेशसाम्येऽपि भर्तृमित्राचार्या न प्रभाकरसिद्धान्तमूलाचार्या इति ॥

इदमेवात्र मम सूचनीयम् - यत् यदि इयमपि सम्भावना योग्या मन्यते, तर्हि प्रभाकरसंप्रदायः तदुपज्ञः इत्येव युक्तमभ्युपगन्तुम्। एवं च सति प्रभाकरसंप्रदायेऽतीव विद्वेषोऽपि भाट्टमतावलम्बिनामुप-लभ्यमान उपपद्यते ॥

तत्र प्राच्यविद्यासंमेलनस्य द्वितीयेऽधिवेशने कलकतानगरे Professor शास्त्रिपादा वार्तिककारमिश्रानिमान् भर्तृमित्राचार्यान् प्रति-

पादयन्तः, तत्तृतीयाधिवेशने कुमारिलपादानेव मन्वानाश्च प्रथमपक्षमेव परिपोषयन्ति ॥

श्रीपशुपतिनाथशास्त्रिणस्तु स्वीये मीमांसोपोद्धातनामनि प्रबन्धे अचिरेणैव प्रकाशनार्थं दत्ते प्रबन्धान्तरे च वार्तिककारमिश्रा इमे प्रकरणपञ्चिकायां निरस्यमाना न प्राभाकरसंप्रदायप्रवर्तकभर्तृमित्राचार्याः, वार्तिककारमिश्रा इत्युपक्षिप्य संगृहीतानां बहूनां श्लोकानां श्लोकवार्तिकादिष्वनुपलभ्यमानतया न कुमारिलपादाः, किन्तु अन्य एव वार्तिककाराः, येषां खलु वार्तिकान्यावापोद्धापाभ्यां संगृह्य श्लोकवार्तिकादिकं कुमारिलपादैः संग्रथितमिति वार्तिककारमिश्राः वार्तिककारपादा इत्याद्युल्लिख्य संगृहीतानां केषांचन वार्तिकानां श्लोकवार्तिकादिषूपलंभोऽपि न नोपपद्यते इति विवेचयन्ति ॥

अत्र पक्षद्वयेऽपि नयविवेकादिषु बृहतीनिरस्यतया निर्दिश्यमानाः वार्तिककाराः के वेति विचार एवेदानीं कर्तव्यः ॥

तत्र श्रीपशुपतिनाथशास्त्रिणः मीमांसोपोद्धाते एवं विवेचयन्ति स्म – यत् नयविवेके निरस्यतया निर्दिष्टाः वार्तिककाराः न कुमारिल-पादाः, यतः तत्र वार्तिककाराणां दशपक्ष्यपि खण्डनीयतयोपक्षिप्यते। तत्र षट्पक्षी यद्यपि "लोक इत्यादिभाष्यस्ये" ति काचन श्लोकवार्तिके कुमारिलपादानां दृश्यते, दशपक्षी तु कापि कुमारिलपादानां कुत्रापि न दृश्यत इति नयविवेके निरस्यतया निर्दिष्टा वार्तिककाराः कथं कुमारिलपादा भवितुमर्हन्तीति !

प्राच्यविद्यासंमेलनस्य तृतीयेऽधिवेशने तु Professor शास्त्रिपादाः– नयविवेकव्याख्याननयकोशादितो बहूनां वाक्यानां प्रमाणतया संग्रहणपूर्वकमेवं प्रतिपादयन्ति - यत् नयविवेके निरस्यतया निर्दिष्टा

वार्तिककाराः कुमारिलपादा एव, नान्ये केऽपि । यद्यपि दशपक्षी श्लोकवार्तिके नोपलभ्यते, एवमपि बृहट्टीकायां मध्यमटीकायां वा कुमारिलपादकृतायामिदानीमनुपलभ्यमानायामपि संभाव्यत एव सेति न कोऽपि दोष इति ।।

अत्र प्रमाणतया नयकोशादितः संगृहीतानि वाक्यानीमान्येव । तानि यथा-

"लोके येष्वर्थेषु - इत्यादेराद्यस्य भाष्यस्य वार्तिककारैरेकत्र दशार्थाः संभावितत्वेनोक्ताः; तत्र दशमोऽर्थ औचित्यानुभाषणम् । तथा अन्यत्र षडर्थाः; तत्रापि षष्ठमौचित्यानुभाषणम् । ततश्च औचित्यानुभाषण-रूपोऽर्थ उभयत्रानुवर्तमान एक एवेति संकलने पञ्चदशैवार्थाः । पृथग्गणने तु षोडशत्वव्यवहारयोग्यता । तदभिप्रायो 'गुरुः सप्तदशमर्थ-माह' इति विवेकग्रन्थः । तत्र पञ्चदशस्वप्यर्थेषु औचित्यानुभाषणमेव स्वीकृतं वार्तिककारैः । तदप्यनुवादमात्रपरत्वात् वाक्यान्तरार्थत्वात् अथपदमात्रदोषपरत्वात् मन्दमिति परव्याख्यानम-युक्तम् - इति मत्वा 'लोक इत्यादिभाष्यस्य अथात इत्येतस्मिन् पदद्वये अलौकिकार्थशङ्कानिवृत्तिः प्रयोजनम्' इति गुरुणा व्याख्या-तम् ।"– इति ।।

page 10 मीमांसानयकोश manuscript in the Government MSS Library, Madras.

तथा - "तत्र सहस्राधिकरणद्वादशलक्षण्या मीमांसायाश्चतुर्विंशति-सहस्रं शबरस्वामिकृतं भाष्यम् । तदुपरि प्रस्थानद्वयम् - भाट्टं प्राभाकरमिति । तत्र भट्टाचार्याणां पञ्च व्याख्यानानि भाष्यस्य; एका बृहट्टीका, द्वितीया मध्यमटीका, तृतीया टुप्टीका, चतुर्थी कारिका,

पञ्चमं तन्त्रवार्तिकमुक्तानुक्तदुरुक्तचिन्तकम् । तत्र बृहन्मध्यमटीके संप्रति न वर्तेते'' - इति ।।

Page 121 of the Ms. of the Sarvadarsana Kaumudi in the Government Oriental MS. Library, Madras.

अत्र पशुपतिनाथशास्त्रिणो मन्यन्ते - एतैर्हि वचनैः सत्यं एकैरेव वार्तिककारैर्दशपक्षी षट्पक्षी च प्रदर्शितेति जानीमः, परंतु इदमेवालोचीनयम् - यत् नयविवेकनिरस्या षट्पक्षी दशपक्षी वा कुमारिलपादानां वोतान्येषामिति । अत्र दशपक्षी अनुपलभ्यमानग्रन्थे संभाव्यमाना केषामिति निर्णयः केनापि कर्तुं न शक्यत इति षट्पक्षीकारा वार्तिककाराः के नयविवेकनिर्दिष्टा इत्येव विचारोऽस्माभिः क्रियते ।।

तदर्थं चेदमत्रालोचनीयम् - (१) यत् लोक इत्यादि भाष्यस्येति वार्तिकोपक्षिप्ता षट्पक्षी कुमारिलपादानामुतान्येषाम् । (२) यदा कुमारिलपादानामेव, तदापि नयविवेकनिरस्या षट्पक्षी लोक इत्यादिभाष्यस्येतिवार्तिकोपक्षिप्ता षट्पक्षी चैका, उतान्या, (३) यदा चैका, तदा किं कुमारिलपादा एव निरस्यमानवार्तिककाराः; आहो अपरे, (४) एवं बृहट्टीकामध्यमटीकयोरुक्तदशपक्षी संभाव्यते वा न वेति ।।

अत्रेदमेव प्रतिभाति - यत् ''लोक इत्यादि भाष्यस्येति वार्तिकोपक्षिप्ता षट्पक्षी न कुमारिलपादानाम्, किन्त्वन्येषामेव वार्तिककाराणाम् । यतः खलु अत्र ''षडर्थान् संप्रचक्षते'' इति प्रथमपुरुषप्रयोगः, अनेन हीदं सूच्यते - 'लोक' इत्यादिभाष्यं कैश्चनान्यैरेवं व्याख्यातमिति । अत्र च - ''प्रत्याख्यानं तथापरे ।'' ''परिसंख्यास्तुती केचित्'' इति परे केचित्पदप्रयोगोऽप्युपष्टंभक एव । भवदासादयस्तु

अथातः-पदसमुदायवादिनो भाष्यकारैर्निरस्यमाना न भाष्यव्याख्यातारः, किन्तु सूत्रव्याख्यातार इत्येव स्वीकर्तव्यम् । भर्तृमित्राचार्यास्तु यदि सप्तदशार्थवादिप्रभाकरसिद्धान्तप्रवर्तकाः, तर्हि कथममुक्तषट्पक्षीकारा भवितुमर्हन्तीति नियतमिदमूरीकर्तव्यम् – यत् कुमारिलपादा इवान्येऽपि भाष्यव्याख्यातारः आसन्निति । तथाच कुमारिलपादानामेव नेयं षट्पक्षी ।।

अस्तुवा कथमपीयं कुमारिलपादानामेव षट्पक्षी, एवमपि नयविवेकोद्धृता षट्पक्षी नेयं भवितुमर्हति । नयकोशत उद्धृतेन हि वाक्यजातेनेदमवगम्यते - यत् दशपक्ष्यां दशमं षट्पक्ष्यां षष्ठं चौचित्यानुभाषणमिति । लोक इत्यादिभाष्यस्येति वार्तिकोपक्षिप्तषट्-पक्ष्यां तु षष्ठमथशब्दस्य दूषणमेव । तदुक्तम्-

लोक इत्यादिभाष्यस्य षडर्थान् संप्रचक्षते ।
भाष्यकारानुसारेण प्रयुक्तस्यादितः पृथक् ।।

सर्वव्याख्यामुपालंभं प्रत्याख्यानं तथाऽपरे ।
परिसंख्यास्तुती केचिदथशब्दस्य दूषणम् - इति ।

तथाच कथमियं षट्पक्षी नयविवेकनिरस्या भवेदिति सर्व एव समालोचयन्तु ।।

ननु - अथशब्ददूषणार्थमौचित्यानुभाषणपरत्वमिति खलु नय-कोशविवरणम् । अनेन हि विवरणेनेदमेवावगम्यते - यत् अथशब्ददूषणं "तत्र लोकेऽथशब्द" इत्यादि भाष्येण क्रियते, "यत्नगौरवं प्रसज्येते" त्यन्तेन त्वौचित्यानुभाषणपरत्वमिति । तथा च यत्नगौरवं प्रसज्येते-त्यन्तस्यौचित्यानुभाषणपरत्वमेव कुमारिलपादानामपि सम्मतम् । अत एव - "अत्र पञ्चसु पक्षेषु यत्नगौरवपर्यन्तं" पृथक् वाक्यम्,

"तत्र लोक इत्यादिवाक्यान्तरमथशब्ददूषणार्थमिति न्यायरत्नाकर-विवरणमुपपद्यते । तथाचाथशब्दस्य दूषणमिति वार्तिकेनापि षष्ठमौचित्यानुभाषणमेव विवक्षितमिति को विरोध इति - चेत्, न कोऽपि विरोधः ।।

कथमेवं सति नयविवेकनिरस्या वार्तिककारा न कुमारिलपादा इति चेत्, इदमत्रानुसन्धेयम् - यत् नयकोशे हि खण्डनीयवार्तिक-कारैरौचित्यानुभाषणपरत्वमेव स्वीकृतमिति यदुक्तं तदिदं वार्तिककारपदेन कुमारिलपादानां ग्रहणं निराकरोति । कुमारिलपादा हि अथशब्ददूषणपक्षमिव परिसंख्यापक्षमपि समाद्रियन्ते, नाथशब्द-दूषणमात्रपरत्वम् । तदुक्तम्-

"अस्य दृष्टविरुद्धत्वात् फल्गुत्वाच्चापि पूर्वयोः ।
मध्यमे चातिदौर्जन्यात् परिसंख्यैवात्र युज्यते ।।" इति ।।

सर्वथा तु नयविवेकनिरस्यषट्पक्षीकारा न कुमारिलपादा इति कुमारिलसंप्रदाय एव पूर्वतनः, तत एव प्रभाकरसंप्रदाय इति मतं पूर्वोक्तकारणनिबन्धनं चिन्त्योपपत्तिकम् ।।

एतेन दशपक्ष्यपि व्याख्याता । सत्यं कुमारिलपादैः बृहट्टीका-मध्यमटीके अपरे अपि टीके विरच्येतेस्म । इदमत्रालोचनीयम् - कुत आरभ्य बृहट्टीकामध्यमटीकयोः प्रवृत्तिः - किं चतुर्थाध्यायमारभ्य, उत आदित आरभ्येति ।।

तत्र केचिन् मन्यन्ते - आदित आरभ्यैवेति । अन्यथा हि प्रथ-माध्यायादौ बृहट्टीकाया अवलम्बनं न्यायसुधायां क्रियमाणं कथमुपपद्यते इति ?

वयंतु पश्यामः - चतुर्थाध्यायमारभ्यैव ते इत्येव युक्तमभ्युपगन्तुम्; दुप्टीकापदस्य हि संग्रहटीकेति प्रसिद्धोऽर्थः । एवंच बृहट्टीकातो मध्यमटीका ततः संग्रहेण दुप्टीकेति कल्पनमेव समुचितं भवति । प्रथमाध्यायादौ तदुल्लेखस्तु चतुर्थाध्यायगतत्वेऽपि तेषामंशानां नानुपपन्नः । एवंच बृहट्टीकामध्यमटीकयोरुक्तदशपक्ष्याः षट्पक्ष्या वा लोक इत्यादिभाष्यसम्बन्धिन्याः सम्भावनापि नास्तीति कथं तत्र तस्याः संभावनोपपद्यत? - इति ।।

एवमुपपादयतां श्रीपशुपतिनाथशास्त्रिणामयमेवाशयः - यत् यावत् बृहट्टीकामध्यमटीकोपलम्भं नयविवेकनिरस्या वार्तिककाराः कुमारिलपादा एवेति निर्णेतुं न पार्यत इति ।।

एतादृशे चातिगभीरे विषये स्वायत्तविरलविरलविविधादर्शा Professor शास्त्रिपादादय एव प्रमाणमिति विचारमिममसंपूर्णावस्थं तेषामेव सविधे पुनर्विचारार्थमुपहरामः ।।

यस्तु पुनः Professor शास्त्रिपादैः - "अविवेकः परमापदां पदम्" इति भारविवाक्यस्य "ऋषीणामपि यत् ज्ञानं तदप्यागमपूर्वकम्" इति भर्तृहरिवाक्यस्य च बृहत्यामुपलंभोऽपि प्रभाकरसंप्रदायस्य कुमारिलसंप्रदायानन्तरत्वे उपष्टम्भकतयोपक्षिप्तः, तत्र श्रीपशुपतिाथशास्त्रिणां पर्यनुयोगोऽयमेव, यत् - भारव्यनन्तरत्वं भर्तृहर्यनन्तरत्वं वा प्रभाकरगुरूणां कथं कुमारिलानन्तरत्वसिद्धान्तोपयोगीति । अयमेतेषामाशयः - यत् शंकरभगवत्पादपूर्वतनत्वेऽपि प्रभाकरगुरूणां भारविवाक्यसंग्रहणं संभवतीति । अत्रच सर्वतन्त्रस्वतन्त्रा अस्मदाचार्यचरणा एव प्रमाणमिति औदासीन्यमेवात्र वयमल्पज्ञाः समाश्रयामः ।।

अस्तु वा कथमपि कुमारिलपादानन्तरत्वं ततः पूर्वतनत्वं वा प्रभाकरगुरूणाम् । इदन्तु सर्वसम्मतम्, यत् प्रभाकरसंप्रदायोऽयं श्रीपार्थसारथिमिश्रैरेव विशेषतो निरस्यतयोपक्रान्तः । अस्मिन् खलु सम्प्रदाये प्रकरणपञ्चिकैकैव पूर्वं मुद्रापिताऽसीत् - इति । अयमेव बहूनां परमो विश्वास आसीत्, यत् विना प्रकरणपञ्चिकां प्रभाकरसंप्रदायपरिज्ञानमन्येन केनापि संपादयितुं न पार्यते इति । अधुना तु महता खलु भाग्येनेदं जानीमः- यत् प्रभाकरसंप्रदायपरिपोषका बहव एव ग्रन्थाः शास्त्रिपादानां प्रयत्नेन समधिगता इति ।

एतावदत्र वयं जानीमः - यत् प्रभाकरकृतिर्बृहती, तद्व्याख्या ऋजुविमला शालिकनाथकृतिः, भवनाथकृतिर्नयविवेकः, तद्व्याख्याः काश्चन नयकोशादयः, प्रभाकरविजयोऽयं नन्दीश्वरकृतिश्चेदानीमुपलभ्यन्त इति । अत्र नयविवेकनयकोशादीनामपि यथावसरं संस्कृतसाहित्यपरिषद् संपादयिष्यन्ती इदानीं श्रीमतां सर्वेषां पुरतः प्रभाकरविजयमिमं प्रथममुपहरति प्रभाकरसिद्धान्तानां तत्त्वादृशानां सम्यक् परीक्षणार्थम् । प्रभाकरविजयोऽयं संपूर्णं नोपलब्ध इति दौर्भाग्यमिदं कथं वा परिहृतं भविष्यतीति न वयं जानीमः । उपलभ्यमानेनाप्यनेन भागेन सत्यं बहव उपकाराः सम्पद्यन्त इति नेयमतिशयोक्तिः ।

अत्र हीदानीं एकविंशतिप्रकरणान्युपलब्धानि ।

	पुटसंख्या
(१) <u>प्रयुक्तिनिर्णयप्रकरणम्</u>	1
(२) <u>वक्तृज्ञानानुमानताप्रकरणम्</u>	7
(३) <u>अख्यातिसमर्थनप्रकरणम्</u>	17

(४) प्रमाणलक्षणप्रकरणम् 26

(५) प्रत्यक्षलक्षणप्रकरणम् 28

(६) संवित्स्वप्रकाशताप्रकरणम्, 29

(७) मनःसद्भावतदणुत्वप्रकरणम् 32

(८) ज्ञानाननुमेयताप्रकरणम्, 35

(९) क्रियानुमेयताप्रकरणम्, 37

(१०) अतीन्द्रियशक्तिसमर्थनप्रकरणम् 41

(११) परमाणुसमर्थनप्रकरणम् 45

(१२) कार्यव्युत्पत्तिसमर्थनप्रकरणम् 49

(१३) अर्थापत्त्यनुमानवैषम्यप्रकरणम् 56

(१४) अभावप्रमाणनिरासप्रकरणम् 61

(१५) सत्तासामान्यनिराकरणम् 66

(१६) अपौरुषेयत्वप्रकरणम् 70

(१७) स्वरूपभेदसमर्थनप्रकरणम् 75

(१८) ईश्वरानुमानिकतानिरासप्रकरणम् 82

(१९) आत्मनः शारीरादिभेदसमर्थनम् 90

(२०) व्याप्तिसमर्थनप्रकरणम् । 107

(२१) भेदाभेदनिरासप्रकरणम् । 110

एषु हि प्रकरणेषु अधोरेखाङ्कितानि प्रकरणानि कुमारिलासंमतानि, अपराणि तत्संमतानि । अत्रेश्वरानुमानिकतानिरासप्रकरणं प्रभाकरविजय एव दृश्यते, नतु प्रकरणपंचिकादिषु । तत्र हि स्पष्टमेवेश्वरनिरास

एव क्रियते, कुमारिलसंप्रदायेऽप्यानुमानिकनिरास एवाभिमतः, नतु वैदिकेश्वरनिरास इत्यनुपदमेव विवेचितम् । प्रभाकरविजयकारा हि प्रकरणपंचिकाविरुद्धमपि प्रभाकरसिद्धान्तं निरूपयन्तीत्यत्र न केवलमिदमेकं प्रकरणं निदर्शनम्, किन्तु ज्ञानाननुमेयताप्रकरण-मपि ।।

प्रभाकरविजयेऽत्र प्रकरणपंचिकानयविवेकयोः परामर्शात्, न्यायरत्नमालासिद्धान्तानां बहूनां निरासाच्च तेभ्योऽर्वाचीनोऽयं प्रभाकर विजय इत्यवगच्छामः स्पष्टमेव प्रभाकरविजय एवायमर्थ उपक्रमे विवेचितः । तदुक्तम् - नाथद्वयात्तसारेऽस्मिन् शास्त्रे मम परिश्रमः । इति । अत्र नाथद्वयपदेन शालिकनाथाः भवनाथाश्च विवक्षिताः । एवं श्रुतप्रकाशिकाकारैः श्रीभाष्यव्याख्यावसरे बहूनामेवैतद्ग्रन्थोक्ता-नामंशानामध्यापनविधिप्रयुक्तत्वस्याध्ययने निरासावसरेऽनूद्य निरसनात्ततः पूर्वतना इत्यवगच्छामः । एतादृशे च कालनिर्णयादौ चरितविमर्शका एव प्रमाणमिति नात्राधिकं व्याप्रियते ।।

इदमेवात्रास्माकं वक्तव्यम् - यत् एवमध्ययनाध्यापनपरंपरायां चर्वितचर्वितस्य प्रभाकरसंप्रदायस्य मात्रयापीदानीमपर्यालोचनं सत्यं सर्वेषां लज्जास्पदमिति ।।

इदमस्माभिः श्रीरामनाथशास्त्रिणां मुखादवगतम् - यत् कोच्चिन् राजधान्यां भाट्टसंभावना प्रभाकरसंभावना चेति धनमुष्टिद्वयमिदानीमपि नम्बूदिरिब्राह्मणकुटुम्बाभ्यां द्वाभ्यां दीयते, यत्रकुत्र नन्दीश्वरस्य प्रादुर्भावः इति ।।

न केवलमनेनेदं जानीमः - यत् नन्दीश्वरोऽयं केरलब्राह्मण एवासीदिति, किन्तु केरलदेशे एव प्रभाकरसिद्धान्तानां विशेषतः

प्रचार आसीदिति, अत्रच सिद्धान्ते मुख्योऽवलम्बोऽयमेव-यत् सर्वेषां मद्रपुरराजकीयपुस्तकालयाध्यक्षैरद्य यावदुपलब्धानां प्रभाकरसिद्धान्तानु-सारिणां ग्रन्थानां केरलदेशादेवोपलंभः ।।

प्रभाकरविजयस्यास्य श्रीरामनाथशास्त्रिणां सकाशादष्टादशप्रकरण पर्यन्तमेक आदर्शः, मद्रपुरपुस्तकालयाध्यक्षाणां कृपयाऽवशिष्टप्रकरणा-नामत्र मुद्रापितानामादर्शश्चाधिगत इति संस्कृतसाहित्यपरिषत्पक्षेणाहं तेषां कृतज्ञतां प्रकाशयन्निदमेवान्ते पुनः पुनः प्रार्थयामि - यत् द्वितीयसंस्करणे संशोधनार्थं मुद्रापितेऽस्मिन् ग्रन्थे मुद्रापकानामस्माकं वा प्रमादानां सर्वेषामपि ससौहार्दसूचनेनोपकारः कर्तव्य इति ।।

अत्र मुद्रायन्त्रदोषेण केषुचन स्थानेषु उपरितनरेफचिन्हानां तादृशैकारादिचिन्हानामुकारादीनां च भग्नानां पण्डितसुविज्ञेयानां शोधनम्, एवं शरीरात्मवादनिरासावसरे "नाप्रत्यक्षं न प्रमाणमिति" नञ्पदस्याधिकस्य संशोधनम्, तथा भूमिकायां "प्राचीकशन्" इत्यस्य "प्राचकाशन्" इति शोधनं च गुणैकपक्षपातिनः पण्डिताः स्वयमेव संपादयिष्यन्तीति नात्र शुद्धाशुद्धिपत्रिका समयोजि ।।

यदत्र पुस्तके व्याप्तिसमर्थनाख्यं प्रकरणं विंशतितमतया योजितम्, तदिदं श्रीरामनाथशास्त्रिणामादर्शे नोपलभ्यते, मद्रपुरसंस्कृतपुस्त-कालयादर्शेतु संवित्स्वप्रकाशताप्रकरणानन्तरमेवोपलभ्यमानमपि गत्यन्तराभावात् विंशतितमतया समयोजि । यतः खल्वष्टादश-प्रकरणानामपि मुद्रापणानन्तरमेव तदुपलब्धम् । द्वितीयसंस्करणे तु यथास्थानं तद्योजयिष्यत इति सविनयं निवेदयामः ।।

अस्मिन् प्रसङ्गे सप्रश्रयमिदमपि सूच्यते यत् देशान्तरेऽवस्थाय मद्रपुरपुस्तकालयादर्शेन साकमस्मल्लब्धादर्शस्य परीक्षणं कर्तुं न

पारयामः स्मेति यथाऽवसरं तत्परीक्षणेन द्वितीयसंस्करणं संपादयिष्यामः, इदानीं तु स्वल्पसन्तोषिणो विप्रा इति न्यायेन वयमुपलब्धांशमात्रं सर्वेषां पुरत उपहरामः ।।

सर्वथा तु प्राभाकरग्रन्थानां बहूनां संकलनेन मद्रपुरपुस्तकालयाध्यक्षा एव सर्वोत्तमर्णा इति सिद्धसाधनमिदमिति शम् ।।

———

॥ श्रीः ॥

॥ श्रीरस्तु ॥

॥ प्रभाकरविजयः ॥

---

(१) प्रयुक्तिनिर्णयप्रकरणम् ॥

यदाराधनतामेत्य कृतं कर्माधिकारिभिः ।
सफलं जायते काले तं वन्दे विष्णुमव्ययम् ॥ १ ॥

विविधं वेदसिद्धान्ते विमन्यन्ते विपश्चितः ।
अतः प्रभाकरगुरोर्विजयः प्रतिपाद्यते ॥ २ ॥

नाथद्वयात्तसारेऽस्मिञ्छास्त्रे मम परिश्रमः ।
शुक्तिश्रमायते सिंधौ हरिणोद्धृतकौस्तुभे ॥ ३ ॥

*आचार्यकरणविधिप्रयुक्तमध्ययनमिति प्रतिपाद्यते, स्वविधेर्नियोज्याभावात्, अध्यापनविधिप्रयुक्तेश्चोपपत्तेः । कः पुनराचार्यकरणविधिः ?

"उपनीय तु यश्शिष्यं वेदमध्यापयेत् द्विजः ।
सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते ॥"

---

*विदितमिदं सर्वेषां यत् न्यायरत्नमालायां पार्थसारथिभिर्नाध्यापनविधि प्रयुक्तमध्ययनमिति बहुशो निरूपितमिति । तत्र तमध्यापयीतेति वाक्यस्य न विधायकत्वमिति प्रथमं दूषणं आचार्यकं क्रियायोगनिमित्तं लौकिकम्, तदुद्देशेन च लोकसिद्धत्वान्न विधेरपेक्षेति;- "नाध्यापनमिदं वाक्यं विधातुं क्षमते यतः । द्रव्यार्जनार्थं प्राप्तत्वात् यच्छब्देन च योगतः ॥" इत्यनेन प्रदर्शितम् । अत्र यच्छब्दयोगात् न विधित्वम्, कथंचिद्विधित्वेऽपि आचार्यकस्य लौकिकत्वात् तदुद्देशेनाध्यापनविधिवैयर्थ्यम्, इति यदंशद्वयं

इति स्मृत्यनुमितविधिः । ननु- स्मृतेः प्रसिद्धान्वाख्यानरूपत्वाद्य-च्छब्दयोगाच्च न विध्यनुमानमिति-चेत्, न; विधियोग्येन वाक्यांशेन विध्यनुमानात्, इतरस्य च विधिसिद्धानुवादात्; यच्छब्दयोगोऽ-नुवादभाग एव, न विधिभागे; अतो विधिस्वरसेन पदेन विध्यनुमानम्, इतरत्त्वनुवादकम् । न च लोकसिद्धार्थतयाऽऽचार्यकस्य तदुपायस्य न विधेयत्वम्; यूपाहवनीयादिवदुपपत्तेः । न च - क्रियायोग एवाचार्यकमिति - वाच्यम्, तूष्णीमुपनीय वेदाध्यापके तत्पदप्रयोगा-भावात् । विशिष्टक्रियायोगो वाच्य इति चेत्, तर्हि बलाददृष्टमापतितम्; प्राङ्मुखत्वादिनियमस्यालौकिकक्रियासंबन्धोऽदृष्टोत्पादकत्वेनैव भवति । प्राङ्मुखभोजनादिविहितानेकनियमयुक्ताध्यापक आचार्यपद-प्रयोगादलौकिकमाचार्यकमिति । उपाध्यायपदमप्येवं चेदेवम्, नो चेन्नैवमिति न तत्राऽऽस्था ।।

किञ्च "आचार्याय वरो देयः" इत्यतीतेऽपि क्रियायोगे वैदिकप्रयोगदर्शनात्तदानीमप्यनुवर्तमानस्यादृष्टस्यैवाचार्यपदवाच्यत्वं युक्तम्, इतरथा लक्षणाप्रसङ्गात् ।।

न च - "आचार्याधीनो वेदमधीष्व" इति प्रयोगदर्शनात् क्रियायोग एव मुख्य इति - वाच्यम्; क्रियायोगादृतेऽपि तदानीं भावात्, मतान्तरेऽपि तुल्यत्वात् । तर्हि मुख्यार्थत्वायार्थान्तरकल्पनायां सर्वत्र

गम्यते तस्यांशद्वयस्याप्यत्र निरासः - आचार्यकरणविधिप्रयुक्तमित्यारभ्य- अतोऽलौकिकत्वादाचार्यकस्य तदुपायतयाऽध्यापनविधिर्युक्त इत्यनेन क्रियते । अत्रहि प्रकरणे प्रभाकरविजये आचार्यकस्यालौकिकत्वमादाय विधिसमर्थनकरणावसरे द्रव्यार्जनवत् लौकिकत्वेऽपि नियमविधित्वेनाप्यु-पयोगः साध्यते इति अर्थज्ञानार्थत्वेनाध्ययनस्य स्वविधिप्रयुक्तत्वपक्षे यथा विध्युपपत्तिरेवमत्रापि विध्युपपत्तिरिति सूच्यते इति प्रथमदूषणस्य नावसरः ।।

लक्षणोच्छेदप्रसङ्ग इति चेत् न; अत्रापि पूर्वोक्तेन न्यायेनार्थस्य सिद्धत्वात् । अयं च वाच्यत्वे हेतुः, नादृष्टकल्पनायाम्; अतोऽलौकिकत्वादाचार्यकस्य तदुपायतयाऽध्यापनविधिर्युक्तः ।।

ननु - अत्रापि नियोज्यो न श्रूयते ? आचार्यकफलश्रवणात् कल्प्यत इति चेत्, तर्हि तत्राप्यर्थज्ञानदर्शनात् किमिति न कल्प्यते? नैवम्, अध्यापनविधेरर्थलभ्याधिकारत्वात् । आचार्यकस्य लौकिकत्वेऽपि दक्षिणादिसाधनत्वेन स्मृतिविहितत्वात् काम्यमानत्वं द्रव्यार्जननियमवत्, अर्थज्ञानस्य तु ज्ञातेऽज्ञाते च काम्यमानत्वं न सम्भवतीत्यर्थवादाधिकरणे वक्ष्यामः ।।

अध्यापनस्याध्ययनमात्रसाध्यत्वाद्विशिष्टाध्ययनप्रयुक्तिर्न संभवतीति चेत्, न; उपनयनं तावत् क्त्वाप्रत्ययेनाध्यापनाङ्गमवगम्यते, अध्ययनं चोपनयनं प्रक्रम्य विहितम्, तेनोपनयनप्रयुक्तिर्नान्तरीयकतया विशिष्टाध्ययनप्रयुक्तिः । आरादुपकारकं तु नास्त्येव ।।

ननु द्वितीयाश्रुतेर्माणवकाङ्गत्वमवसीयते; द्वितीयाश्रुतेः प्राबल्यं "यूपं परिवीयोपाकरोति" इत्यत्रोक्तम्, नैवम्, अध्यापनाङ्गभूतोपनयनस्य द्वारतया माणवकाङ्गत्वोपपत्तेः, अपूर्वाङ्गभूतस्यावघातस्य द्वारतया व्रीहिसंबन्धवत् । स्मृत्यन्तरं च व्यक्तम् "उपनीय गुरुश्शिष्यम्" इत्यादि ।।

*किञ्च अध्यापनविध्यभावेऽपि स्वविधिप्रयुक्तिर्न संभवति,

*एवं स्वमते दूषणानवसरमुपपाद्य परमते स्वविधिप्रयुक्तत्वेऽध्ययनस्य स्वाध्यायोऽध्येतव्य इत्यस्यैव विधित्वं न सम्भवतीति निरूपणार्थं "किंच अध्यापनविध्यभावे इत्यारभ्य - 'विलम्बिता' ।" इत्यन्तं वाक्यजातं प्रवृत्तम् । अत्रहि स्वाध्यायोऽध्येतव्य इत्यत्रार्थज्ञानकामस्य नियोज्यत्वमर्थ ज्ञानस्य स्वतोऽपुरुषार्थत्वेन न संभवतीति क्रतूपयोगेनैव पुरुषार्थत्वं

क्रतुविधिप्रयुक्त्युपपत्तेः । तथाच सति स्वर्गकामस्य शूद्रस्याप्यधिकारः स्यात् । अनुपनीतनिषेधोऽपि प्रत्यासन्नत्रैवर्णिकानुपनीतविषय एव । शूद्रोल्लेखेन निषेधोऽपि रागप्रवृत्तविषयः, न वैधविषयः, "न हिंस्यात्" इतिवत्; अस्मन्मते तु प्रयोज्यापेक्षयाङ्गकार्यार्थतया चाध्यापनविधेः प्रयुक्तिः शीघ्रतरा; क्रतुविधेस्तु प्रयोज्यफलविद्यापेक्षयाऽङ्गोपायापेक्षया च विलम्बिता ॥

श्रौतो वाऽऽचार्यकरणविधिः- "अष्टवर्षं ब्राह्मणमुपनयीत", "तमध्यापयेत्" इति । * अत्राचार्यकरणप्रयोजने नयतेरात्मनेपद-विधेराचार्यकरणार्थमुपनयनमवगम्यते; तच्च तदुत्पत्तिविधेर्निर्वहती-

कल्पनीयमिति क्रत्वनङ्गस्यापि अर्थज्ञानस्य क्रतुप्रयुक्तत्वमगत्योरीकर्तव्यं भाट्टमतावलम्बिभिरपीति अध्यापनस्यापि स्वानङ्गाध्ययनप्रयोजकत्वं कथं विरुद्धम् ? अन्यथाऽध्यापनविधिप्रयुक्तत्वाभावे स्वर्गकामस्य शूद्रादेरप्यधि-कार आपद्येतेत्यपशूद्राधिकरणविरोधो भाट्टमत एव भवति, न प्रभाकरमते, यत्रालौकिकाचार्यकप्रयोजनकाध्यापनं न लौकिकं नोपनयनरूपाङ्गं विनोक्तफलाय कल्पत इति उपनेयासत्तिद्वाराऽध्यापनविधिप्रयुज्यमानमध्ययनं त्रैवर्णिकमात्राधिकारिकं प्राभाकरमत एव भवतीति प्रतिपाद्यते । यथा चात्र "न स्त्रीशूद्रौ वेदमधीयातामि"त्यस्यापि न विरोधस्तथा मूल एव व्यक्तम् ॥

एतेन - "न ज्ञानं कर्मणामङ्गं ज्ञानस्याध्ययनं मतम् । अङ्गं नाध्यापनस्यैतन्न तेनातः प्रयुज्यते ॥" इति न्यायरत्नमालावचनम् परास्तम् ॥

* यत्तु न्यायरत्नमालायाम्- "उपनयनमध्ययनाङ्गमेव, नाध्यापनाङ्गम्, अध्येतृ संस्कारत्वात् । ननु तत्रोपनयनस्यात्मनेपदश्रवणाद् आचार्यकार्थत्वम-वगम्यते ? न; अकर्त्रभिप्रायत्वादात्मनेपदविधानस्य; अन्यथा "स्वरित ञित" इत्यनेनैवाचार्यकसाधनेऽप्यर्थे वर्त्तमानान्नयतेरात्मनेपदं सिद्धमिति सम्माननेति सूत्रमनर्थकं स्यादिति ।"- वर्णितम्, तदिदमर्थतोऽनूद्य खण्डयति-अत्राचार्यकरणप्रयोजने- इत्यारभ्य; - "सूत्रद्वयमपि समञ्जसं भवतीत्यन्तेन ।

त्युत्पत्तिविध्यपेक्षायां "तमध्यापयेत्" इत्ययमाचार्यकरणविधिः । न च - "अध्यापयेत् इति परस्मैपदं नोपपद्यते, कर्त्रभिप्राये "णिचश्च" इत्यात्मनेपदापत्तेरिति - वाच्यम्, "बुधयुध" इत्यादिना विशेषतः परस्मैपदविधेः । नच "अचित्तवत्कर्तृकार्थोऽयमारम्भः" इति वृत्तिग्रन्थविरोधः, "अणावकर्मकाच्चित्तवत्कर्तृकात्" इत्यकर्मकेषु चित्तवत्कर्तृकाणां प्राप्तत्वादकर्मके एव चित्तवत्कर्तृकार्थतामाह, अस्य सकर्मकत्वादिङो न विरोधः । नचास्मिन् सूत्रे "इण् गतौ" इति धातुः पठितः, "माणवकमध्यापयति" इत्युदाहरणात्; "निगरणचलनार्थेभ्यश्च" इति गत्यर्थस्येणः प्राप्तत्वात्; अतो न परस्मैपदविरोधः ।।

ननु - उपनयीत इत्यात्मनेपदं नोपपद्यते, कर्त्रभिप्रायेण स्वरितञितसूत्रेण प्राप्ते सम्माननसूत्रवैयर्थ्यं स्यात्; तथाच वृत्तिकारः- "अकर्त्रभिप्रायार्थोऽयमारंभः" - इति, नैवम्; क्रियाफलस्य कर्त्रभिप्रायत्वे

अयं भावः- स्वरित ञित इति सूत्रं हि कर्तृमात्रान्वयित्वं फलस्य गमयति आत्मनेपदस्थले; तथाचोपनयीतेति विधौ यत्र फलस्योभयान्वयस्तत्र तस्य न प्रवृत्तिरिति आचार्यकप्रयोजनत्वेऽप्युपनयनस्य सम्माननसूत्रं सार्थकमेव; अग्नीनादधीतेत्यादो अग्न्यादीनामचेतनत्वादुभयान्वय इत्यनेन चेतनद्वयानन्वयस्यैव विवक्षणात् न स्वरितञित इति सूत्रेणात्मनेपदविरोधः ।। अथवा - अव्यवहितफलस्य कर्तृगामित्व एव स्वरित ञितसूत्रं प्रवर्तते, व्यवहितं तु प्रयोजनं यत्र कर्तृगामि तत्र न तस्य प्रवृत्तिरिति ञित्सूत्रेणोपनयीतेत्यत्रात्मनेपदाप्रसङ्गात् सम्माननसूत्रं सार्थकम् । "अग्नीनादधीतेत्यत्र तु संस्कृताग्निसिद्धिरेव फलं कर्तृगामीति नात्मनेपदविरोधः । ब्राह्मणमुपनयीतेत्यत्र तु संस्कृतमाणवकसिद्धिर्नाव्यवहितं फलं कर्तृगामि । अग्निमत्तायाः यथा क्रत्वधिकारसंपादकतयादृष्टोपकारत्वमेवं माणवकवत्ताया अधिकारितावच्छेदककोटावप्रवेशात् स्वर्गाद्यनुपकारकत्वाच्च न पुरूषार्थत्वम् ।।

स्वरितञित्सूत्रं प्रवर्तते; अत्रतु कारकावस्थायां क्रियाफलमुपनेयगतमेव, आचार्यकं तु प्रयोजनमिति तस्य कर्त्रभिप्रायत्वेऽपि स्वरितञित्सूत्रेण न प्राप्तिः; एवं च संमाननसूत्रं आचार्यकरणे सार्थकं स्यात्; इतरथा "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इति सूत्रेणैव गतार्थत्वदाचार्यकरण आत्मनेपदविधानं व्यर्थं स्यात् । क्रियाफलतत्प्रयोजनविभागे तु सूत्रद्वयमपि समञ्जसं भवति ॥

ननु - "अग्नीनादधीत", "ओदनं पचते" इत्यात्मनेपदं न स्यात्, क्रियाफलस्य विक्लेदनस्य कर्मगतत्वात्, नैवम्; कर्मगतत्वेऽपि क्रियाफलस्य प्रयोजनस्य कर्त्रभिप्रेतत्वात् । नन्वत्रोपनेयासत्तिरूपं क्रियाफलं कर्त्रभिप्रेतम्; तस्य कर्मणोऽध्ययनेऽस्त्युपयोगः, कर्तुरध्यापने, मैवम्; आसत्तिरूपस्य क्रियाफलत्वाभावात्; साङ्गोपनयने कृते यन्माणवकगतं तत् संस्काराख्यं फलम् नासत्तिरूपम्, तस्य लौकिकोपनयनेनापि समानत्वात् । एवं च क्रियाफलमकर्त्रभिप्रेतमेवेति स्वरितञित्सूत्रस्याविषयत्वात् सम्माननसूत्रारंभः सार्थक इति सिद्धमात्मनेपदादप्युपनयनस्याध्यापनाङ्गत्वम् ॥

इति नन्दीश्वरस्य प्रभाकरविजये प्रयुक्तिनिर्णयाख्यं

प्रकरणम् समाप्तम् ॥

———

(२) वक्तृज्ञानानुमानताप्रकरणम् ।।

*सम्प्रति पौरुषेयवाक्यानां वक्तृज्ञानानुमानव्यवधानेनैवार्थप्रतिपादकत्वमिति प्रतिपाद्यते । व्युत्पन्नशब्दश्रवणमात्रादर्थप्रतीतिः किमिति जायत इति चेन्न, व्युत्पन्नशब्दोच्चारणेऽपि वक्तुरभिप्रायानिश्चयेऽ-

---

*अध्ययनस्याध्यापनविधिप्रयुक्तत्वव्यवस्थापनेनाथातो धर्मजिज्ञासेति सूत्रार्थः संगृहीतो भवति । अयं भावः - अध्यापनविधिप्रयुक्तमध्ययनं अर्थज्ञान फलमुत स्वर्गफलकमिति संशये स्वर्गफलकमित्येव युक्तम्, अर्थज्ञान फलकस्यार्थज्ञानप्रयुक्तत्वेनाध्यापनविधिप्रयुक्तत्वायोगात् इति पूर्वपक्षः । सिद्धान्तस्तु - यद्यपि लोकतः प्रवृत्तिरर्थ ज्ञानार्थाध्ययने संभवति; परन्तु न नियमेन वेदाध्ययन एव प्रवृत्तिः संभवति । भाषान्तराध्ययनादावपि प्रवृत्तिसंभवात् । तत्र च पौरुषेयत्वेन वाक्यस्य तस्यानुमानविधयैव प्रामाण्यात् न धर्मनिर्णयः स्यादिति वेदाध्ययन एव प्रवृत्तिं नियमयितुमथातो धर्मजिज्ञासेति सूत्रमिति ।

तदुक्तं प्रकरणपञ्चिकायाम् - ननु स्वाध्यायोऽध्येतव्य इति नियोगसिद्धेरवगमात्तन्निष्पत्त्यर्थत्वादध्यापनस्यान्यपरत्वादर्थविवक्षा दुर्भणैव, मैवम्, यदि केवलं नियोगनिष्पत्त्यर्थतैवाध्ययनस्य स्यात्, स्यादेतदेवम्, यदा त्वर्थावबोधोऽपि प्रयोजनतया स्वीक्रियते, तदार्थपरताऽप्यस्तीति नाविवक्षितार्थता, कथं पुनरेकस्मिन् वाक्ये प्रयोजनद्वयम् ? उच्यते, शाब्दं नियोगनिष्पत्तिरेव प्रयोजनम्, आर्थं त्वर्थावबोधनमिति न विरोधः । यच्च तदर्थावबोधाख्यं प्रयोजनं तन्न केवलाध्ययनसाध्यमिति अध्ययनविधिरेव स्वप्रयोजनसिद्धये विचारमाक्षिपति, विचारस्य च न्यायनिबन्धनत्वान्न्यायानां मीमांसाज्ञानगम्यत्वान्मीमांसाज्ञानस्य गुर्वायत्तत्वान्न वेदाध्ययनानन्तरं गुरुकुलान्निवर्तितव्यमिति मन्यमानो भगवान्सूत्रकारः पूर्वपक्षनयमूलतां स्मृतेर्दर्शयितुं धर्मजिज्ञासोपदेशमुखेनाध्ययनानन्तरभाविनीं गुरुकुलनिवृत्तिं

र्थाभिधानादर्शनात्तात्पर्यज्ञानमपि सामग्रीत्वेन कल्प्यते । * तात्पर्यज्ञानं चेममर्थमवगम्यैतत्प्रतिपादनायेदं वाक्यमुच्चारितम् इत्यनुसन्धानम् । अतश्च प्रमाणान्तरान्तर्भावः ॥

ननु अस्तु वाक्यमात्रादनभिधानम्, आप्तवाक्यस्य दोषरहितस्यार्थावबोधकत्वं किमिति नाश्रीयते ? नैवम्; आशयादिदोषराहित्यमेवाप्तत्वम्, तथा भूतस्याप्यन्यपरप्रयोगो दृश्यते, यथा - विषं भुंक्ष्व

प्रतिषेधन्निदमाह - ''अथातो धर्मजिज्ञासा'' इति । वेदवाक्यार्थविचारविरोधिनी च गुरुकुलनिवृत्तिरेव केवला निवार्यते, न सकलेतरभिक्षाचरणब्रह्मचर्यादिधर्मनिवृत्तिः, असमाप्तसकलब्रह्मचारिनियमश्च न स्नातक इति न दाराधिगमनेऽधिक्रियते; स्नातकस्य दाराधिगमस्मरणात् - ''स्नातकः सदृशीं भार्यां विन्देदि''ति । तस्माद् गुरुकुले स्थित्वा सकलेतरब्रह्मचारिधर्मान् परित्यज्य वेदार्थो विचारयितव्यः, अविचारितस्यानिर्णीयमानत्वात्, अनिर्णीतवेदार्थश्चेद् गुरुकुलान्निवर्तेत, ततः कृतदारसंग्रहः श्रौताग्निहोत्रादिनित्यनैमित्तिकधर्माधिकारापातात्तदनुष्ठानं कर्तुमसमर्थः प्रत्यवेयात्, तस्मादध्ययनस्यानन्तरमेव वेदार्थो विचारयितव्य इति विचारोपायभूतन्यायनिबन्धनं मीमांसाशास्त्रमारब्धव्यमिति सिद्धम् ।

अत्र भाट्टमतेऽपि अर्थज्ञानार्थमध्ययनमिति सिद्धान्तः समान एव; इयान् विशेषः - भाट्टमते लौकिकवाक्यानामपि वेदवाक्यानामिवानुमानविधया प्रामाण्यस्यास्वीकरणात् स्वरूपेणैव प्रामाण्यस्वीकारात् भाषान्तरादिभिरधिगतधर्मतत्त्वस्यापि क्रतुष्वधिकारापत्तिरित्यपशूद्राधिकरणविरोधः, प्रभाकरमते तु लौकिकवाक्यानामनुमानविधयैव प्रामाण्यात् वेदानधिकारिणां च धर्मतत्त्वनिर्णस्य वेदमूलकस्यासंभवात् नाधिकार इति फलविशेषो वर्तत एवेति सूचयन्ननुमानविधयैव लौकिकवाक्यानां प्रामाण्यमित्याह – संप्रतीति।

*अनुविधया प्रामाण्यं नाम वक्तृज्ञानरूपतात्पर्यानुसन्धानद्वारा

इत्यादौ भोजननिवृत्तिपरे वाक्ये, अतः प्रमाणन्तरेणावगते तात्पर्येऽर्थनिश्चयः तात्पर्यनिश्चयादर्थनिश्चयः, तात्पर्यनिश्चयश्च वक्तृज्ञानानुमानद्वारेणैव भवतीति आप्तवाक्यस्यैव लिङ्गत्वमुपपन्नम्; विषभक्षणवाक्येऽपि योग्यार्थज्ञानपूर्वकत्वाव्यभिचारात् ।

ननु कथं ज्ञानमनुमीयते? न तावद् ज्ञानमात्रस्यानुमानम्; ज्ञानमात्रविशेषनिश्चयाभावादेवानुमानवैयर्थ्यं स्यात्, न तावद्विशिष्टज्ञानानुमानम्; अर्थेनैव ज्ञानस्य विशेषः, नान्येन; अतोऽर्थनिश्चयेन विशिष्टज्ञानानुमानम्; निश्चये चानुमानवैयर्थ्यमेवेति कथं वक्तृज्ञानानुमानम् ? नैवम्; वाक्यश्रवणे सत्यभिधानात् प्रागेव पदैः पदार्थाः स्मर्यन्ते; स्मृतानां च पदार्थानाम् एवमन्वेतुं योग्यम् नैवम् इति विमर्शः संजायते; अतो न्यायसंपादितेन विमर्शेन विशिष्टोऽर्थो बुद्धिस्थः, तेनैव विशिष्टज्ञानानुमानम् । ननु विमर्शो नाम कीदृशः? स च प्रमाणमप्रमाणं वेत्यपि न विद्मः, उच्यते – विमर्शस्तावदभिधानात् प्रागेव भवद्भिरप्यङ्गीकृतः; इतरथा अभिहितैः पदार्थैर्विशिष्टोऽर्थो ज्ञातुं न शक्यते; पदार्थानामनेकार्थसाधारणत्वात् कस्य विशिष्टार्थस्य गमका भवेयुः? आकांक्षासन्निधियोग्यतायुक्तार्थस्य गमका इति चेत्, तर्हि स एव विमर्शशब्दार्थो युष्माभिरप्यङ्गीकृतः । सच प्रमाणेतिकर्तव्यतारूपः; न प्रमाणमात्रम्, नच स्मृतिमात्रं वा; विमर्शानङ्गीकारे च प्रत्यधिकरणं पूर्वपक्षसिद्धान्तवचनव्यक्तिविमर्शो न स्यात् ।

प्रामाण्यमेवेति स्पष्टं मूल एव विवेचितम् । एवं च वेदवाक्यप्रामाण्यमपि तात्पर्यानुमानद्वारेति कल्पनं यद्यप्यपेक्षितम्, तथाऽपि वेदतात्पर्यस्य वक्तृज्ञानरूपत्वाभावात् न वक्तृज्ञानानुमानाधीनं प्रामाण्यमिति तु विशेषः । एवं च चोदनैव धर्मे प्रमाणमिति नियमोऽत्र व्यवस्थापितो भवति । यत्र हि वक्तृज्ञानानुमानद्वारा प्रामाण्यं तत्रैव हि प्रमाणताऽप्रमाणता च दृश्यते, नान्यत्रेति न दोषः ।

* केचित्तु- विसंवादशङ्कया तिरोहितत्वादर्थनिश्चयो न जायते, "पुंवाक्ये तु विसंवादशङ्कया सा तिरोहिता" इत्युक्तत्वादित्याहुः, तदयुक्तम्; अभिधानसामग्रीसंभवे सति संशयस्याप्रतिबन्धकत्वात् । इतरथा काकनिलयन ? (फलनिर्णय) सद्भावेऽपि प्रतिबन्धकत्वप्रसङ्गः; अनुमाननिश्चये च प्रसङ्गस्तुल्यः; अतः सामग्र्यभावादेवानभिधानम् ।

नन्वेवं व्यवहारावसितशक्तिबाधः; पौरुषेयवाक्येभ्यो हि व्युत्पत्तिः, वाक्यं च नाभिधायकम्, लिङ्गमेवेत्युक्तम्, नैवम्; *शक्तिविषये (न)

---

*इदमेव मतं प्रकरणपञ्चिकायां नीतिपथे निरूपितम् । तद्यथा-

पदानां तत्पदार्थेषु शक्तिः स्वाभाविकी स्थिता ।
पुंवाक्येषु विसंवाद शङ्कया सा तिरोहिता ।।

वेदेषु त्वस्मर्यमाणकर्तृकेषु स्वरूपतः ।
प्रमाणान्तरसंस्पर्शरहितार्थावबोधिषु ।।

न कर्तुरनुमानं स्याद्वाक्यत्वादिति लिङ्गतः ।। इति ।।

*अयं भावः - शब्दश्रवणसमनन्तरभाविनीं प्रयोज्यवृद्धस्य चेष्टामुपलभ्य विशिष्टार्थविषया प्रतीतिस्तस्य कल्प्यते । सा च शब्दानन्तर्यात्तत्कारणिकैवेति शब्दस्य तद्वाचकताशक्तिः कल्प्यते । पश्चात्तु कस्यचिदयथार्थपदरचनामुपलभ्य कथं व्यभिचारिणो वाक्यात्प्रयोज्यवृद्धस्यार्थनिश्चयः संजात इति विचिकित्स्यैवमवधारयति । नूनमनेनैवायं वक्तैवमवधारितः नायमनन्वितार्थानि पदानि प्रयुङ्क्ते । तेन नूनमेतेनैषामन्वयो ज्ञात इति ज्ञानानुमानपुरःसरमर्थं निश्चितवानिति कल्पयति । पूर्वावगतन्तु वाचकत्वं न मिथ्या मन्यते । तस्मादस्ति वाचकत्वमिति ।

एतेन - न हि प्रयोज्यवृद्धस्य शब्दानन्तरभाविनी प्रतिपत्तिः शब्दजन्या,

व्यभिचाराशङ्का; लिङ्गे न चोत्तरकालेऽर्थनिश्चयश्च । अतो वक्तृज्ञानानुमानद्वारेणैवार्थनिश्चय इति सिद्धम् ।।

इति नन्दीश्वरकृतप्रभाकरविजये वक्तृज्ञानानुमानाख्यं प्रकरणं समाप्तम् ।।*

यत्तस्य शक्तिं कल्पयेत् । शब्दानुमितवक्तृज्ञानलिङ्गजन्यत्वात् । न चान्यतो निष्पन्नं कार्यमन्यस्य शक्तिं कल्पयति; अतिप्रसंगात् । यद्यपि च तस्यामवस्थायामजन्यत्वानवधारणाच्छब्दानन्तर्याच्छब्दजन्यत्वं भ्रान्त्याऽवगम्य शब्दस्य शक्तिर्भ्रान्त्याऽवगम्यते; तथाऽपि पश्चादतज्जन्यत्वमवगत्य तज्जन्यत्वभ्रान्तौ निवृत्तायां शक्तिभ्रान्तिरपि निवर्तिष्यत एव । धूमायमानबाष्पनितधूमध्वजविज्ञानवत् । तद्धि स्वरूपेणाबाधितमपि लिंगबाधादेव निवर्तते, तथा शब्दस्यापि वाचकत्वकल्पना । कार्यस्यातज्जन्यत्वावधारणात् निवर्तितुमर्हति । नन्वनुमितमप्यर्थं पश्चादनुवदद्वाक्यं वाचकं शक्तं स्यात्, तन्न; अनुवादकत्वे प्रमाणाभावात् । न ह्यनुवादकत्वमन्तरेण किञ्चिदनुपपन्नं यतस्तत्कल्प्येत । शक्तत्वादनुवादकत्वमिति चेत् तदितरेतराश्रयं शक्तेरनुवादस्ततश्च शक्तिरिति । तस्मान्न वाचकत्वं सिध्यति । यदि परमार्थविशेषविषयज्ञानानुमानसिद्ध्यर्थं पुनर्वाचकत्वमवस्थाप्येत तच्चान्तरेणापि वाचकत्वं शब्दविशेषस्य ज्ञानविशेषेणैव व्याप्तिग्रहणसम्भवादनुपपन्नम् । तस्माल्लोकवचसामनुमानत्वेन प्रामाण्यांगीकरणे पदानां वाचकत्वायोगादनुपादत्वेनाप्रामाण्यं वेदस्य स्यादिति तत्प्रामाण्यसिद्ध्यर्थं लोकेऽपि शब्दानां शब्दतयैव प्रामाण्यमभ्युपगन्तव्यमिति-न्यायरत्नमालोक्तं परास्तम् । व्यभिचारशंका हि अनुमान एवं भवति, न प्रत्यक्षे, शक्तिस्तु प्रत्यक्षैव । वाक्यार्थज्ञानं हि अनुमानाधीनं न शक्तिज्ञानमिति भावात् ।

*इयमत्र प्रकरणपञ्चिका :-

अर्थासंस्पर्शिताशङ्का यथा शब्दस्य वार्यते ।
प्रभाकरगुरोः शिष्यैस्तथा यत्नो विधीयते ।। १ ।।

अत्र लौकिकवाक्यानां व्यभिचाराभिमानतः ।
अर्थासंस्पर्शितां केचिदाहुः शब्दस्य वादिनः ।। २ ।।

निश्चयोऽर्थस्य संस्पर्शः स चार्थाव्यभिचारिणः ।
प्रत्यक्षादेरेव भवेच्छब्दस्तु व्यभिचारवान् ।। ३ ।।

विनाप्यर्थं हि शब्देन प्रतीतिरुपजायते ।
अंगुल्यग्रेऽस्ति करिणां यूथमित्येवमादिना ।। ४ ।।

नचात्र शक्यते वक्तुं शुक्तौ रजतबोधवत् ।
अग्रहाद् भ्रान्तिरेषेति कारणस्याविशेषतः ।। ५ ।।

दुष्टा हि हेतवः कार्यं सम्पूर्णं कर्तुमक्षमाः ।
तेन भेदाऽग्रहो युक्तः शुक्तिकारजतादिषु ।। ६ ।।

इह तु ज्ञानहेतुर्यः शब्दः स न विशिष्यते ।
विशिष्यते यस्तु वक्ता स ज्ञानस्य न कारणम् ।। ७ ।।

वक्तापि यदि विज्ञानहेतुः स्यादिन्द्रियादिवत् ।
ततस्तस्याऽपि दोषेण भवेदग्रहणं तदा ।। ८ ।।

वक्ता तु केवलं शब्दव्यक्तावेवोपयुज्यते ।
ज्ञानं तु शब्दमात्रेण निरपेक्षेण जन्यते ।। ९ ।।

न च तस्येह दुष्टत्वं किंचिदप्युपलभ्यते ।
दोषश्चाग्रहणे हेतुस्तदभावे स्फुटो ग्रहः ।। १० ।।

तेन शब्दोपजनितं ज्ञानमेवेदमीदृशम् ।
अर्थं व्यतिक्रामतीति कुतस्तेनार्थनिश्चयः ।। ११ ।।

येनापि हि विना यस्य सद्भाव उपपद्यते ।
निश्चयस्तत्र तेनेति सुभाषितमिदं वचः ।। १२ ।।

नन्वेवमाप्तवाक्येभ्यः कथं व्यवहृतिर्भवेत् ।
व्यवहारो हि लोकस्य कथं स्यान्निश्चयं विना ।। १३ ।।

उच्यते व्यवहारो हि संदेहादपि लौकिकः ।
प्रायशो दृश्यते तेन न किंचिदिह दुष्यति ।। १४ ।।

अपि चासत्वमालोच्य वक्तुस्तत्रार्थनिश्चयः ।
मानान्तरवशेनापि कथंचिदुपपद्यते ।। १५ ।।

वेदस्त्वलौकिकार्थत्वादभावाद्वक्तुरेव च ।
अहो बत दशां कष्टामुपनीतोऽपि पण्डितैः ।। १६ ।।

अत्र प्रतिविधानाय यतन्ते मतिशालिनः ।
ज्ञानस्य व्यभिचारित्वं नयवीथ्यां निवारितम् ।। १७ ।।

श्रूयतामवधानेन गतिर्नरगिरामपि ।
अनुमानात्पृथग्भावं तासां नेच्छन्ति सूरयः ।। १८ ।।

वाक्यं हि पुरुषाधीनरचनं लौकिकं सदा ।
शंक्यमानायथार्थत्वं नार्थनिश्चायकं यतः ।। १९ ।।

अन्योन्यानन्वितार्थानि पदान्यपि हि मानवाः ।
रचयन्तो विलोक्यन्ते तेन नान्वयनिश्चयः ।। २० ।।

केचित्तावद् भ्रमेणैव केचिदाशयदोषतः ।
प्रमादात्केऽप्यशक्तेश्च केऽप्यनन्वितवादिनः ।। २१ ।।

तदुक्तानां पदार्थानां यद्यप्यन्वययोग्यता ।
तथाप्यनन्वितस्यापि दृष्टेर्नान्वयनिश्चयः ।। २२ ।।

तत्र निश्चयशब्देन ज्ञानमेवाभिधीयते ।
अन्वयानिश्चये तेन ज्ञानमेवास्ति नान्वये ।। २३ ।।

शङ्क्यमानायथार्थत्वरचनं तेन पुंवचः ।
श्रुतमात्रकमेवार्थे न तावन्निश्चयावहम् ।। २४ ।।

यावद्वक्तुरविज्ञातं पूर्वभाविप्रमान्तरम् ।
विवक्षितार्थविषयमिन्द्रियार्थनिबन्धनम् ।। २५ ।।

तस्य ज्ञानं च वाक्येन लिङ्गभूतेन गम्यते ।
ज्ञात्वैवार्थं ब्रवीतीति य एवमवधारितः ।। २६ ।।

तस्य ज्ञानेन नियतं वाक्यं ज्ञानानुमापकम् ।
ज्ञानं चार्थाविनाभावि तेनार्थेऽपि विनिश्चयः ।। २७ ।।

ततोऽर्थे निश्चिते पश्चात्सोऽर्थो वाक्येन गम्यते ।
तस्यां दशायां वाक्यस्य तस्य स्यादनुवादता ।। २८ ।।

पूर्वं च लिङ्गभूतत्वं वक्तुर्ज्ञानावधारणे ।
वक्तुर्ज्ञानप्रसूतं हि वाक्यं तत्कार्यमिष्यते ।। २९ ।।

कार्यात्कारणसिद्धिश्च सर्वेषामनुवादतः ।
पौरुषेयमतो वाक्यं न शास्त्रमभिधीयते ।। ३० ।।

एवञ्च सति लिङ्गस्य व्यभिचारोऽयमीक्ष्यते ।
न शास्त्रस्येति तस्य स्यादर्थासंस्पर्शिता कुतः ।। ३१ ।।

लिङ्गस्यापि न चैवायं व्यभिचारोऽस्ति किन्तु यः ।
लिङ्गालिङ्गे न शक्नोति विवेक्तुं मूढचेतनः ।। ३२ ।।

तस्यालिङ्गे लिङ्गरूपसाधारण्यनिबन्धनः ।
लिङ्गसंव्यवहारोऽयं विपरीतः प्रवर्तते ।। ३३ ।।

श्रुतिलिङ्गाधिकरणे विस्तरेणैवमीरितम् ।
तेन न व्यभिचारोऽस्ति द्वयोर्लैङ्गिकशास्त्रयोः ।। ३४ ।।

नन्वर्थ एव प्रथमं पुंवाक्येभ्योऽवगम्यते ।
अन्यथा हि कथं वक्तुर्धीर्विशिष्टाऽनुमीयते ।। ३५ ।।

अर्थेनैव विशेषो हि निराकारतया धियाम् ।
नचाप्रतीतेनार्थेन विशेषश्चावऽकल्पते ।। ३६ ।।

अत्र ब्रूमोऽयथार्थत्वशङ्कयाऽर्थो न निश्चितः ।
अनिश्चितश्च न ज्ञात इति तावद्व्यवस्थितम् ।। ३७ ।।

किंत्वज्ञातेऽपि शब्दार्थे पदजाते श्रुते सति ।
विमर्शो जायते श्रोतुरीदृशो मतिशालिनः ।। ३८ ।।

अन्योन्यान्वययोग्यार्थं पदजातं ब्रवीत्ययम् ।
आप्तस्तेनामुना नूनं ज्ञातस्तेषां समन्वयः ।। ३९ ।।

न कदाचिदसंबद्धानर्थानेष विवक्षति ।
न वाऽप्रतीतसम्बन्धानिति दोषो न कश्चन ।। ४० ।।

नन्वेवं तुरगारूढस्तुरङ्गं विस्मृतो भवान् ।
वेदप्रामाण्यसिद्ध्यर्थमुत्थितस्तत्प्रहीणवान् ।। ४१ ।।

लोकावगतशक्तिर्हि वेदे शब्दोऽवबोधकः ।
लोके च लिङ्गभावेन प्रतीतिर्भवताश्रिता ।। ४२ ।।

स्वयं त्विह समाधानमाचार्येणैव दर्शितम् ।
शब्दस्यार्थेन सम्बन्ध इति दर्शयता सता ।। ४३ ।।

अन्विातार्थाभिधायित्वे पदानां हि स्थिते सति ।
विशिष्टा वक्तृधीर्ज्ञातुं शक्यते नान्यथा यतः ।। ४४ ।।

ज्ञातेषु हि पदार्थेषु श्रोता वक्तरि कल्पयेत् ।
अन्योन्यान्वयविज्ञानं नान्यथेत्युपदर्शितम् ।। ४५ ।।

पदानां तत्पदार्थेषु शक्तिः स्वाभाविकी स्थिता ।
पुंवाक्येषु विसम्वादशङ्कया सा तिरोहिता ।। ४६ ।।

वेदेषु त्वस्मर्यमाणकर्तृकेषु स्वरूपतः ।
प्रमाणान्तरसंस्पर्शरहितार्थावबोधिषु ।। ४७ ।।

न कर्तुरनुमानं स्याद्वाक्यत्वादिति लिङ्गतः ।
न कर्ता शक्नुयाद्वाक्यं कर्तुं कार्यं हि लौकिके ।। ४८ ।।

तेन वेदे विसम्वादशङ्का नास्ति कथंचन ।
अर्थनिश्चयहेतुत्वादर्थसंदर्शिता स्थिता ।। ४९ ।। इति

***

(३) अख्यातिसमर्थनप्रकरणम् ।।

*सम्प्रति सर्वविज्ञानानां यथार्थत्वं प्रतिपाद्यते । सर्वेषां यथार्थत्वे भ्रान्ताभ्रान्तव्यवस्था न सिद्ध्यतीति चेन्न; यथा भवतां ज्ञानत्वाविशेषेऽपि किञ्चिद्यथार्थम्, किञ्चिदयथार्थं तथा यथार्थत्वेऽपि भ्रान्ताभ्रान्तव्यवस्थोपपत्तिः ।।

कारणदोषबाधकवशाद् व्यवस्थासिद्धिरिति चेत्, तर्हि तेनैव भ्रान्ताभ्रान्तव्यवस्थास्तु ।।

भवतां यथार्थत्वे ज्ञानस्य बाधो नास्तीति चेत्, भवतां वा ज्ञानत्वाविशेषे कथं बाधोपपत्तिः?

ज्ञानत्वाविशेषेऽपि 'नेदं रजतम्' इति ज्ञानोदयदर्शनात् कल्प्यत इति चेत्, यथार्थत्वेऽपि तर्हि दर्शनबलादेव कल्प्यताम् ।।

अयं तु विशेषः - भवतां ज्ञानस्वरूपबाधयाऽयथार्थत्वम्, अस्माकं तु व्यवहारबाधया; अतो येनैव कारणेन यथार्थायथार्थविवेकः, तेनैव कारणेन भ्रान्ताभ्रान्तविवेक इति समानम् ।।

ननु - यदि शुक्तिकायां रजतज्ञानं न जायते, तर्हि शुक्तिकायां रजतप्रवृत्तिः कथमुपपद्यते ? नावश्यं शुक्तिकायामेव रजतज्ञानमास्थेयम्, रजते रजतज्ञानमात्रादेव शुक्तिकायां रजतप्रवृत्त्युपपत्तेः । अन्यविषयज्ञानादन्यप्रवृत्तिर्न दृष्टेति चेत्, सत्यम्; अन्यावभासिनो ज्ञानस्यान्यत्र जननमपि न दृष्टम् ।।

किञ्चायथार्थज्ञानादपि प्रवृत्तिरन्यत्र न दृष्टा । शुक्तौ रजतप्रवृत्त्यन्य-

*चोदनालक्षणोऽर्थो धर्म इति सूत्रे चोदनैव प्रमाणमिति नियमो यो विवक्षितस्तद्व्यावर्त्यतां लौकिकवाक्यप्रामाण्यस्य निरूप्य चोदना प्रमाणमेवेति नियमान्तरप्रतिपादनार्थं सर्वज्ञानयाथार्थ्यवादमुपपादयति- संप्रतीति ।

थानुपपत्त्या कल्प्यत इति चेत्, तर्हि तथैवानुपपत्त्यान्यविषयज्ञानस्यान्यत्र प्रवृत्तिहेतुत्वमात्रं कल्प्यताम्; किमयथार्थत्वव्यसनेन ?

यथार्थज्ञानस्यान्यत्र प्रवृत्तिहेतुत्वेऽव्यवस्थेति चेत्, भवतामप्यन्यावभासिनो ज्ञानस्यान्यत्रोत्पादेऽव्यवस्था समैव ॥

कारणदोषबाधकप्रत्ययवशेन व्यवस्थासिद्धिरिति चेत्, अस्माकमपि तथैव व्यवस्थाऽस्तु । अतः सर्वं समानमन्यत्राभिनिवेशात् ॥

वस्तुतः सामानाधिकरण्यादेव प्रवृत्त्युपपत्तिः । सामानाधिकरण्यं च धर्मधर्मिणोर्निरन्तरभानम् । सम्यङ्ज्ञानेऽपि रजतजातिरूपितव्यक्तिग्रहणात्, 'इदं रजतम्' इति प्रवृत्तिः, न सम्बन्धग्रहणात्; अतोऽन्यत्र सम्बन्धाभावेऽपि रजतजातिरूपितव्यक्तिपरिग्रहादसंबन्धाग्रहसहितात् प्रवृत्युपपत्तिः ॥

अतएव - विवेकाग्रहणात् प्रवृत्तौ युगपत् प्रवृत्तिनिवृत्ती स्याताम्- इति चोद्यस्यानवकाशः निरन्तरभानात् प्रवृत्तेः । अतः प्रसज्यमानरजतव्यवहारनिवारणाद्बाधकप्रत्ययस्याप्युपपत्तिः ॥

शुक्तिकायामिन्द्रियसंप्रयोगानन्तरभावित्वेन शुक्तिकाविषयमिति चेन्न, *रजतस्मृतित्वेऽप्युद्बोधापेक्षया चक्षुरपेक्षोपपत्तेः ॥

लोष्टादावप्युद्बोधप्रसङ्ग इति चेन्न, भवतां लोष्टादौ रजतज्ञानं किमिति न जायते ? सादृश्याभावादिति चेत्, उद्बोधकत्वमपि सादृश्याभावादेव नाश्रीयताम् ॥

स्मृतित्वे 'तद्रजतम्' इति स्यादिति चेत्, शुक्तिकाविषयत्वे वा

---

*यद्यपि स्मृतेरपि न प्रामाण्यम्; इत्यनन्तरप्रकरणे निरूपयिष्यते; तथापि पूर्वबुद्ध्यनपेक्षत्वलक्षणमेवप्रामाण्यं तत्र निरस्यते, नतु अबाधितत्वलक्षणमिति न विरोधः । एतेन—

'शुक्तिकाविषयम्' इति किन्नानुसन्धीयते ?

कारणदोषादेव तदनुसन्धानं न जायते इति चेत्, अस्माकमपि कारणदोषादेव तत् इति नानुसन्धानमिति सममेव सर्वमनुपपत्तिजातम्।।

विषयव्यवस्था भासमानतया वाच्या, न व्यवहारयोग्यतापत्ति-विषयत्वम्, निर्विकल्पस्य निर्विषयत्वप्रसङ्गात् । नच प्राकट्ययोग्यत्वम्, तस्यैवाभावात् । भासमानत्वं चेत् इदमेव ज्ञानं तावदर्थाधीननिरूपणम्, यदर्थाधीननिरूपणं यद्ज्ञानं सोऽर्थस्तस्य विषयः । निर्विकल्पकद-शायामप्यर्थेनैव ज्ञानस्य विशेष इति सिद्धम् । अत्रतु रजतज्ञानमिति रजतप्रतियोगित्वेन ज्ञानोदयः । इतरथा रजतज्ञानं शुक्तिकाविषयं न स्यात् । ततो यदयथार्थम् भ्रान्तत्वात् प्रवृत्तिहेतुत्वादित्येतत्सर्वं धर्मिग्राहकप्रमाणविरोधादेवापास्तम्; रजतज्ञानमिति निर्देशादेव रजतविषयत्वाङ्गीकारात्, शुक्तिविषयत्वप्रतिज्ञायास्तेनैव बाधात् ।।

यथार्थत्वे च ज्ञानत्वाद्व्यवहारहेतुत्वादर्थप्रकाशकत्वादित्यनुमानं *निर्दूषणम् । एवमर्थापत्त्युपन्यासेऽपि यथार्थत्वेऽपि सर्वमुपपद्यत इति पूर्वोक्तन्यायेनैवान्यथोपपत्तिर्वक्तव्या ।।

---

* इयमत्र प्रकरणपञ्चिका -

यथार्थं सर्वमेवेह विज्ञानमिति सिद्धये ।
प्रभाकरगुरोर्भावः समीचीनः प्रकाश्यते ।। १ ।।
तत्र तावदिदं केचिदूचिरे चारुचेतसः ।
भ्रमसन्देहविज्ञाने अयथार्थे उभे इति ।। २ ।।
इदं रजतमित्येषा या शुक्तिशकले मतिः ।
सा चेद्यथार्था भ्रान्तित्वं तदा तस्यास्तु कीदृशम् ।। ३ ।।
यथावस्थितवस्त्वाभमपि ज्ञानं यदा भ्रमः ।
प्रमाणेषु तदाऽऽपन्ना सर्वेषु भ्रमरूपता ।। ४ ।।

किंच न कारणाभावादेवान्यथाज्ञानम् । कारणदोषादेव जायत इति चेन्न; दोषाणां कार्यविघातहेतुत्वमेव, नतु कार्यान्तरजननम् ।

विवेकाग्रहणं भ्रान्तिरिति चेन्नैतदीदृशम् ।
सुषुप्तेऽपि भ्रमापत्तेः सर्वभेदापरिग्रहात् ।। ५ ।।
भेदाग्रहे गृहीते च यदि स्याद् भ्रमरूपता ।
दूरात् सामान्यमात्रस्य दर्शनं स्यात् भ्रमस्तदा ।। ६ ।।
यथार्थदर्शनत्वे च बाधकोऽपि न युज्यते ।
अज्ञातभेदग्रहशो न बाधकमतिर्भवेत् ।। ७ ।।
यथार्थतापि चैतस्याः कथमित्यपि चिन्त्यताम् ।
एषाऽपि रजतत्वेन शुक्तिकामध्यवस्यति ।। ८ ।।
रजतत्वं न शुक्तेश्च रजतस्य न शुक्तिता ।
तयोरन्योन्यभिन्नत्वं प्रत्यक्षेणावधारितम् ।। ९ ।।
अथेयं रजतत्वेन न शुक्तिमवलम्बते ।
सामानाधिकरण्येन प्रतिपत्तिर्विरुध्यते ।। १० ।।
रूप्यार्थिनः प्रवृत्तिश्च शुक्तौ स्यान्निर्निबन्धना ।
अग्रहोऽपि न भेदस्य प्रवृत्तौ कारणं यतः ।। ११ ।।
रजतप्रतिपत्तिश्च नेयमन्धस्य जायते ।
तेनेयमिन्द्रियाधीना संयुक्ते चेन्द्रियं धियम् ।। १२ ।।
समर्थमुत्पादयितुं शुक्तिसंयोगि चेन्द्रियम् ।
तेन सैवेन्द्रियेणेह रजतत्वेन गृह्यते ।। १३ ।।
स्यान्मतं शुक्तिकामात्रमिन्द्रियेणावसीयते ।
तदेव सदृशत्वेन रजतस्मृतिकारणम् ।। १४ ।।
सदृशप्रत्ययेनेह संस्कारोद्बोधहेतुना ।
तदित्युल्लेखरहिता रजते भवति स्मृतिः ।। १५ ।।

दग्धाद्वेत्रबीजात् कदल्यङ्कुरोत्पत्तिरिति चेन्न, दाहस्य तत्र

स्मृतावस्यां मनोदोषात् तदित्यंशोऽवखण्डितः ।
तेनेन्द्रियानुकारित्वमन्यथासिद्धमित्यसत् ।। १६ ।।
अनुभूतेऽपि विषये तत्परामर्शवर्जितम् ।
न बोधं स्मृतिमिच्छन्ति धारावाहिकबोधवत् ।। १७ ।।
अपरोक्षपुरोवर्तिसामानाधिकरण्यतः ।
नेयं स्मृतिः किन्तु शुक्तौ भ्रान्तोऽयं रजतग्रहः ।। १८ ।।
स्मृत्युद्बोधनिमित्तं च स्वप्ने किञ्चिन्न विद्यते ।
पीतशङ्खावबोधे च द्विचन्द्रग्रहणे तथा ।। १९ ।।
दिङ्मोहालातचक्रादिभ्रान्तयश्च कथं पुनः ।
स्मृतित्वाश्रयणेनैता वर्णनीया यथार्थतः ।। २० ।।
तेनेन्द्रियादिदोषेण जायन्ते भ्रान्तिबुद्धयः ।
बुध्यमाना वस्तुरूपमन्यथास्थितमन्यथा ।। २१ ।।
स्थाणुर्वा पुरुषो वेति सन्देहो योऽपि जायते ।
अभावात्तादृशोऽर्थस्य स यथार्थः कथं भवेत् ।। २२ ।।
अत्र ब्रूमो य एवार्थो यस्यां संविदि भासते ।
वेद्यः स एव नान्यद्धि वेद्यावेद्यस्य लक्षणम् ।। २३ ।।
इदं रजतमित्यत्र रजतश्चाऽवभासते ।
तदेव तेन वेद्यं स्यान्न तु शुक्तिरवेदनात् ।। २४ ।।
तेनान्यस्यान्यथा भानं प्रतीत्यैव पराहतम् ।
परस्मिन् भासमाने हि न परं भासते यतः ।। २५ ।।
नन्वेवं रजताभासः कथमेष धरिष्यति ।
उच्यते शुक्तिशकलं गृहीतं भेदवर्जितम् ।। २६ ।।
शुक्तिकाया विशेषा ये रजताद्भेदहेतवः ।
ते न ज्ञाता अभिभवाद् ज्ञाता सामान्यरूपता ।। २७ ।।

अनन्तरश्च रजते स्मृतिर्जाता तयापि च ।
मनोयोगात् तदित्यंशपरामर्शविवर्जितम् ।। २८ ।।
रजतं विषयीकृत्य नैव शुक्तेर्विवेचितम् ।
स्मृत्याऽतो रजताभास उपपन्नो भविष्यति ।। २९ ।।
धारावाहिकवन्नेयं स्मृतिरित्युदितश्च यत् ।
उच्यतेऽनन्यगतितः स्मृतिरत्राऽवगम्यते ।। ३० ।।
न ह्यसन्निहितं तावत् प्रत्यक्षं रजतं भवेत् ।
लिङ्गाद्यभावाचान्यस्य प्रमाणस्य न गोचरः ।। ३१ ।।
परिशेषात् स्मृतिरिति निश्चयो जायते पुनः ।
तस्मात् कारणसद्भावधारावाहिकधीषु तु ।। ३२ ।।
प्रत्युत्पन्नेन्द्रियग्रामसामग्रीग्रहकारणम् ।
ग्रहणे स्मरणे चेमे विवेकानवभासिनी ।। ३३ ।।
सम्यग्रजतबोधात्तु भिन्ने यद्यपि तत्वतः ।
तथापि भिन्ने नाभातो भेदाग्रहसमत्वतः ।। ३४ ।।
सम्यग्रजतबोधश्च समक्षैकार्थ गोचरः ।
ततो भिन्ने अबुध्वा तु स्मरणग्रहणे इमे ।। ३५ ।।
समानेनैव रूपेण केवलं मन्यते जनः ।
अपरोक्षार्थबोधेन समानार्थग्रहेण च ।। ३६ ।।
अवैलक्षण्यसंवित्तिरिति तावत् समर्थितम् ।
व्यवहारोऽपि तत्तुल्यस्तत एव प्रवर्तते ।। ३७ ।।
समत्वेन च संवित्तेर्भेदस्याग्रहणेन च ।
मिथ्याभावोऽपि तत्तुल्यव्यवहारप्रवर्तनात् ।। ३८ ।।
रजतव्यवहारांशो विसम्वादयतो नरात् ।
बाधकप्रत्ययस्यापि बाधकत्वमतो मतम् ।। ३९ ।।

चायथार्थं न स्यात् ॥

प्रसज्यमानरजतव्यवहारनिवारणात् ॥ ४० ॥
सन्निहितरजतशकले रजतमतिर्भवति यादृशी सत्या ।
भेदानध्यवसायादियमपि तादृक् परिस्फुरति ॥ ४१ ॥
साधारणं हि रूपं तस्या अस्याश्च विद्यते तेन ।
तन्मात्रप्रतिभानात् समानतामेव मन्यन्ते ॥ ४२ ॥
तत्तुल्यव्यवहारप्रसक्तिरपि युज्यते चातः ।
तद्विनिवारणकरणाद् बाधकता बाधकस्यापि ॥ ४३ ॥
एवं स्वप्नेऽपि वस्तूनि स्मर्यमाणानि सन्त्यपि ।
अनुभूतांशमोषेण भासन्ते गृह्यमाणवत् ॥ ४४ ॥
ग्रहणस्य विशेषो हि गृहीतग्रहणं स्मृतिः ।
सा गृहीतांशमोषेण गृहीतिरिति तिष्ठति ॥ ४५ ॥
संस्कारोद्बोधहेतुश्च तत्रादृष्टं प्रकल्प्यते ।
विपरीतख्यातिपक्षेऽप्येषा तुल्या हि कल्पना ॥ ४६ ॥
अदृष्टस्य तु हेतुत्वाज्जाग्रतस्तादृशी न धीः ।
अवस्थापि ह्यदृष्टस्य सामग्री फलसम्भवे ॥ ४७ ॥
पीतशङ्खावबोधे च पित्तस्येन्द्रियवर्तिनः ।
पीतिमा गृह्यते द्रव्यरहितोऽश्विव ? तिग्मता ॥ ४८ ॥
शङ्खस्येन्द्रियदोषेण शुक्लिमा च न गृह्यते ।
केवलद्रव्यमात्रन्तु प्रथते रूपवर्जितम् ॥ ४९ ॥
गुणे द्रव्यव्यपेक्षे च द्रव्ये च गुणकाङ्क्षिणि ।
भासमाने तयोर्बुद्धिरसम्बन्धं न बुध्यते ॥ ५० ॥
सत्यपीतावभासेन समे भातो मती इमे ।
व्यवहारोऽपि तत्तुल्य एवमत्रापि युज्यते ॥ ५१ ॥
यत्तु नेत्रगतस्यापि कज्जलस्य न कालिमा ।

किञ्च अयथार्थत्वे सर्वत्रानाश्वास एव स्यात्; असत्ख्यातिप्रसङ्गश्च, रजतस्य शुक्तिरूपेणासत्त्वात्, संशयज्ञानस्यापि यथार्थत्वम्, स्मृतिद्वयरूपत्वात् । अतः सर्वमेवेदं ज्ञानं यथार्थमिति स्थितम् ।।

इति नन्दीश्वरस्य प्रभाकरविजये अख्यातिसमर्थन प्रकरणं समाप्तम् ।।

———

गृह्यते कारणं तत्र तेनेन्द्रियनिरोधनम् ।। ५२ ।।
अतसीपुष्पसंकाशं यत् तावन्नेत्रमण्डलम् ।
तत्रस्थमञ्जनं यत्तत् तेजोवृत्तिनिरोधकम् ।। ५३ ।।
मण्डलान्तरसंस्थं तु यन्नाम नयनेऽञ्जनम् ।
तस्यानार्जवदोषेण नीलिमा नावगम्यते ।। ५४ ।।
इन्द्रियोपरिभागेऽपि लिप्तेन स्वच्छभावतः ।
पित्तेन नायनं तेजः काचेनेव न रुध्यते ।। ५५ ।।
प्रसरन्नायनं तेजो ग्राहकं नाश्रयस्थितम् ।
पित्तस्याऽग्रहणं सौक्ष्म्यात् प्रभायामिव तेजसः ।। ५६ ।।
मधुरे तिक्तधीरेवं व्याख्याता पित्तवर्तिनः ।
तैक्त्यस्य रसहीनस्य गुडस्य च परिग्रहात् ।। ५७ ।।
तथा द्विचन्द्रबोधेऽपि भिन्नमेवैन्द्रियं महः ।
भिन्ने जनयति प्रख्ये एकस्मिन्नेव शीतगौ ।। ५८ ।।
सम्वित्ती ते न भिद्येते तद्द्वित्वे सति मन्यते ।
भिन्नार्थबुद्धितुल्यत्वमत्रापि खलु पूर्ववत् ।। ५९ ।।
स्मरतोऽप्येकतां तेन भ्रमोऽयमुपपद्यते ।
न हि स्मृतिप्रमोषेण सर्वत्रैव भ्रमो मतः ।। ६० ।।

दिङ्मोहे दृष्टसामर्थ्याद् दिक्स्वरूपानवग्रहात् ।
दिगन्तरस्वरूपस्य स्मरणाच्च भ्रमो मतः ।। ६१ ।।
अलातचक्रेऽलातस्य भ्रमतः सर्वतोऽद्भुतम् ।
निरन्तरं धियो जाताश्चक्रबुद्धिसमा मताः ।। ६२ ।।
कालभेदस्तु शीघ्रत्वाद्धियां तासां न लक्ष्यते ।
चक्रधीव्यवहारश्च तेनास्मिन्नपि युज्यते ।। ६३ ।।
एतेनैव प्रकारेण सर्वभ्रान्तिषु पण्डितैः ।
ऊहनीया हेतुभेदा यथार्थज्ञानसिद्धये ।। ६४ ।।
स्थाणुर्वा पुरुषो वेति सन्देहेऽपि यदा द्वयम् ।
स्मर्यतेऽन्योन्यनिर्मुक्तं तदार्थविरहः कुतः ।। ६५ ।।

*****

अयथार्थत्वपक्षे च ज्ञानं साकारमापतेत् ।
आकारो भासते यो हि ज्ञान एवावतिष्ठते ।। ७२ ।।
अयथार्थस्य बोधस्य नोत्पत्तावस्ति कारणम् ।
दोषाच्चेन्न हि दोषाणां कार्यशक्तिविघातिका ।। ७३ ।।
भस्मकादिषु कार्यस्य विघातादेव दोषता ।
अग्नेर्हि रसनिष्पत्तिः कार्यं जठरवर्तिनः ।। ७४ ।।
विद्यमानवस्तुरूपग्रहणे प्रतिबन्धृता ।
दोषाणामुपपन्नेति भ्रान्तिर्ग्रहनिबन्धता ।। ७५ ।। इति

———

(४) प्रमाणलक्षणप्रकरणम् ।।

*अनुभूतिः प्रमाणम् । काचानुभूतिः ? स्वतन्त्रपरिच्छित्तिः । किमिदं स्वातन्त्र्यं नाम ? परिच्छेदे पूर्वबुध्द्यनपेक्षत्वम्; स्मृतिस्तु परिच्छेदे पूर्वबुध्द्यपेक्षैवेति न प्रमाणम् ।।

अनुमानं तर्हि न प्रमाणम्, तस्य पूर्वबुध्द्यपेक्षत्वादिति चेन्न; तस्य न परिच्छेदे पूर्वबुध्द्यपेक्षत्वम्, किंतूत्पत्तावेव ।।

---

*अत्रानुभूतिशब्देन वृत्त्यवच्छिन्नसंविदद्वैत्यभिमता या सा किं विवक्ष्यते, उत केवलसंविद् इति विचारे यदि केवलसंविदेव विवक्ष्येत, तर्हि तस्याः प्रकरणपञ्चिकायामनुमानादिष्वपि स्वांशे प्रत्यक्षत्वमेव संविद इति निरूप्यानन्तरमनुमेयज्ञानं किमिति प्रश्ने यदुत्तरं दत्तं "किं तदिति न विद्मः; संविदुत्पत्तिकारणमात्ममनःसन्निकर्षाख्यं तदित्यवगम्य परितुष्यतामायुष्मते"ति, तत्रापरस्यापि ज्ञानस्यानुमेयस्य सूचनात् तदनुपपत्तिः स्यात् । अतो वृत्तिविशिष्टसंविदेव विवक्ष्यते । तत्रच वृत्तिरनुमेया संवित् प्रत्यक्षेति विषयविवेकः सिद्धो भवति । एवंच सति "संवित् न संवेद्या, किन्तु प्रमेये"ति बृहती वाक्यस्यापि "फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम् । ब्रह्मण्यज्ञाननाशार्थं पर्यालोचने पर्यवसानं भवति । एवं प्रभाकरसंप्रदायस्याद्वैतमते पर्यवसानकल्पनं हि बृहत्यादीनामपि संमतम् । यतो बृहत्यामद्वैतमतेऽत्यन्तमेवादरः, कर्मप्रवणत्वेन प्रकृते तदुपपादनानवसरश्च प्रतिपाद्यते । ततश्च तत्र तत्रात्मनो ज्ञानातिरिक्तत्वं यत्प्रभाकरमतावसरे प्रतिपाद्यते, तदपि वृत्तिरूपज्ञानातिरिक्तत्वाभिप्रायमेव, न संविदतिरिक्तत्वाभिप्रायमेव । तदुक्तं बृहत्यां विज्ञातृरूपता तु विज्ञानस्यानाशंकनीया; अनाशंकितत्वात् । युक्तं चानाशंकितं कर्मप्रवणत्वादि"ति । एवं चात्मास्वप्रकाशतावादोऽपि व्यवहारदृष्ट्यैव न परमार्थदृष्ट्येति बृहत्याशय इति गम्यते । अंहकारममकारादिकमपि अन्तःकरणप्रत्यगात्मनोः

कथमिदमवगम्यते – स्मृतेः परिच्छेदे पूर्वबुध्द्यपेक्षत्वम्, अनुमानस्य तूत्पत्ताविति ? ज्ञानस्वभावादेव सुखमवगन्तुं शक्यते । (तदाह)– स्मृतिर्हि 'तत्' इत्युपजायमाना प्राचीं प्रतीतिमनुरुध्यमाना न स्वातन्त्र्येणार्थं परिच्छिनत्तीति न प्रमाणं स्मृतिरिति, अनुमाने तु 'तत्' इति वेषाभावादुत्पत्तौ पूर्वबुध्द्यपेक्षेति निश्चीयते ।।

स्मृतिप्रमोषस्तर्हिप्रमाणम् ? 'तत्' इति वेषाभावात्, मैवम्, नावश्यं वेषत एव स्मृतित्वनिर्णयः, अपितु कारणतोऽपि; स्मृतिप्रमोषेऽपित्वग्रहणकारणसम्भवात् स्मृतित्वमित्यख्यातिसमर्थने व्यक्तमुक्तम्। स्मृतेः पूर्वबुध्द्यपेक्षा चेत्थम् — पूर्वबुद्धिविशिष्टार्थपरिच्छेदाद्वा, पूर्वबुध्द्युपलक्षितार्थपरिच्छेदाद्वा ।

ननु स्मृतेरपि स्वस्मिन् मातरि च प्रमाणत्वमिष्टम्, सत्यम्, स्मृतेः स्वापेक्षयाऽऽत्मापेक्षया च स्वातन्त्र्यमस्त्येव, अर्थापेक्षया च स्मृतित्वमस्वातन्त्र्यं च; अतो नातिव्याप्तमव्याप्तं वा लक्षणम् । अतः सिद्धं निरपेक्षत्वं प्रमाणस्य ।।

इति नन्दीश्वरकृतप्रभाकरविजये प्रमाणलक्षण
प्रकरणं समाप्तम् ।।

———

परस्परतदात्म्याध्यासनिबन्धनमित्येव परमार्थगतिः, एवमपि कर्मप्रसङ्गे तथा मिरूपणमनवसरमिति बृहत्यां निरूपितम् । तद्यथा :— अहंकारममकारौ अनात्मनि आत्मधर्माध्यास इति मृदित-कषायाणामेतत्कथनीयम्, नतु कर्मसङ्गिनाम्, तदुक्तं भगवता द्वैपायनेन — "न बुद्धिभेदं जनयदेज्ञानां कर्म-सङ्गिनाम् इति ।" इत्यादिकं श्रीयुक्तपशुपतिनाथशास्त्रिणां मीमांसोपोद्घात-नामके ग्रन्थे प.म. म गङ्गानाथ झा महाशयानां मतपरीक्षणपूर्वकं सम्यग्विवेचितमिति तत एव द्रष्टव्यम् ।

(५) प्रत्यक्षलक्षणप्रकरणम् ॥

*साक्षात्प्रतीतिः प्रत्यक्षम् । साक्षात्प्रतीतिः स्वरूपप्रतीतिः । स्वस्यैव रूपं स्वरूपं असाधारणरूपमित्यर्थः; यस्य वस्तुनो यदसाधारणं स्वरूपं, तेनैव रूपेण या व्यवहारयति, सा साक्षात्प्रतीतिः। जात्यादिविशिष्टस्य सविकल्पकज्ञानस्य साधारणाकारविषयत्वात् प्रत्यक्षत्वं न स्यादिति चेत्, न असाधारणाकारेणापि विषयीकारात्; असाधारणाकारस्यान्वयात्र लक्षणम्, न साधारणाकारव्यावृत्तिरपि, अनुमाने तु साधारणभूतव्यापकाकारेणैव सम्बन्धप्रतीतेर्न साक्षात्त्वम् ॥

यद्वा अव्यवहितप्रतीतिस्साक्षात्प्रतीतिः । विशिष्टज्ञानस्य विशेषणज्ञानव्यवहितत्वात् प्रत्यभिज्ञानस्य पूर्वज्ञानव्यवहितत्वात्तयोः प्रत्यक्षत्वं न स्यादिति चेन्न; अव्यवहितत्वं नाम स्वविषयानन्तर्गतज्ञानान्तराव्यवहितत्वमभिप्रेतम्, तेन समञ्जसं लक्षणम् ॥

एवं वा – साक्षात्त्वं स्वकालाकलितवस्तुसत्त्वावबोधकत्वम्; यत्कालीनं ज्ञानं तत्कालसम्बन्धिवस्तुविषयमित्यर्थः । प्रत्यभिज्ञायां तु स्वकालसंम्बन्धिवस्तुविषयत्वमप्यस्तीति न दोषः । वर्तमानाग्न्यनुमानस्य प्रत्यक्षत्वं स्यादिति चेत्, न तस्यापि स्वकालाकलितत्वम्, किन्तु व्याप्तिकालाकलितत्वमेव; अनुमानस्य तु व्याप्तिकालाकलिते शक्तिः कृता इतरथा भूतानुमाने भविष्यदनुमाने वा शक्त्यन्तरकल्पना स्यादिति न दोषः । अतः सिद्धं साक्षात् प्रतीतिः प्रत्यक्षमिति ॥

इति प्रत्यक्षलक्षणप्रकरणम् ॥

---

* चोदना प्रामाणमेवेति नियमसमर्थनोपयोगितया लौकिकवाक्याप्रामाण्यं सर्वज्ञानयथार्थतावादं चोपपाद्य चोदनैव धर्मे प्रमाणमिति नियमसमर्थनार्थं प्रत्यक्षस्य भाविनि धर्मे न प्रमाणत्वमिति सूचयन्नाह-साक्षादिति ।

(६) संवित्स्वप्रकाशता प्रकरणम् ।।

स्वप्रकाशत्वं नाम स्व (संबद्ध) व्यवहारे संविदन्तरनिरपेक्षत्वम् । ननु संविदो व्यवहारः शब्दप्रयोगरूपः, तस्य संविच्छब्देन सह वाच्यवाचकसम्बन्धज्ञानसापेक्षत्वादसंभवि लक्षणम्, नैवम्; स्वसंबद्धव्यवहारे ग्रहणान्तरनिरपेक्षत्वमित्यर्थः । संविद्व्यवहारस्तु वाच्यवाचकसम्बन्धस्मरणमेवापेक्षते । ग्रहणापेक्षा च स्मरणार्था, गृहीतेऽपि सम्बन्धेऽस्मृते शब्दप्रयोगाभावात् । अतः प्रमातृप्रमेययोः स्वव्यवहारे संविदपेक्षत्वादस्वप्रकाशत्वमिति *नातिव्याप्तिः ।।

प्रमाणं चानुमानमर्थापत्तिर्वा । अनुमानं तु – घटादिसंविद्व्यवहारो घटादिसंविन्निबन्धनः तदनन्तरमुपजायमानत्वात्, घटव्यवहारवदित्यादि । अर्थापत्तिस्तु - घटसंविद्व्यवहारो घटज्ञानहेतुतां विना नोपपद्यत इति घटसंविद्विषयसंविद एव सिद्धेः । न चान्योपपत्तिर्वक्तुं शक्यते ।।

ननु सर्वत्र व्यवहार्यातिरिक्तसंविद्धेतुक एव व्यवहारो दृष्टः; कथमत्र संविद्व्यवहारे संविद्धेतुकत्वं व्यवहारस्य साध्यते ? नैवम्; व्यवहार्यातिरिक्तहेतुकत्वं यदि दर्शनादेवाङ्गीक्रियते, तर्हि व्यवहार्यविसजातीयहेतुकत्वं व्यवहारस्य दृष्टमिति तदप्यङ्गीक्रियताम् । ततश्च संविद्व्यवहारस्य संविद्धेतुकत्वमपि न स्यात् । व्यवहार्य-

---

*यत्तु – श्रीयुक्तपशुपतिनाथशास्त्रिभिः प्रभाकरमतेऽप्यात्मनः स्वप्रकाशत्वमेवेति माध्वतात्पर्यचन्द्रिकादिपरीक्षणपूर्वकमुपपादितम्, तदाऽऽपाततः उक्तग्रन्थविरुद्धमिति प्रतिभाति, तत्त्वगवेषणायां तु न विरुद्धम् । तदुक्तं बृहत्याम्ः – प्रमातृरूपता तु विज्ञानस्यानाशङ्कनीया; अनाशङ्कितत्वात्; युक्तं चानाशङ्कितम्, कर्मप्रवणत्वादिति न दोषः – इति ।।

विसजातीयहेतुकत्वमत्र त्यजतां कः पक्षपातहेतुः ? क्लृप्तेन कारणेनोपपत्तौ संविदि्द्वतयकल्पनमनुचितम् ॥

एवं वानुमानम्– संवित् स्वप्रतिबद्धव्यवहाररूपकार्ये सजातीयपरानपेक्षा, तथाभूतपरगतकार्यकारित्वात्, यद्यथाभूतपरगतकार्यकारि तत् स्वगततथाभूते कार्ये सजातीयपरानपेक्षं यथा रूपं रूपान्तरानपेक्षम्, परिमाणं वा परिमाणान्तरानपेक्षम् ॥

ननु लिङ्गलिङ्गितेन लिङ्गेनानैकान्तिकः; यथा धूमेनाग्निरनुमीयते, अग्निना चौष्ण्यम्, तत्राग्निः परत्रानुमानज्ञानकार्यं करोति स्वानुमाने च धूममपेक्षते, नैवम्, तत्रापि विजातीयलिङ्गापेक्षत्वात् । नहि सजातीयशब्देनात्यन्तापरजातिरभिप्रेतः, एवं तर्हि घटज्ञानस्य घटज्ञानान्तरापेक्षाऽस्मन्मतेऽपि नास्ति, ज्ञानविषयज्ञानमेवापेक्षते; अतश्च सिद्धसाधनमिति चेत्, नैवम्; ज्ञानं सर्वमेकजातीयम्; घटज्ञानं पटज्ञानमित्युपाधिभेदाद्भेदः; यत्र तूपाधिमन्तरेण स्वत एव भेदो निरूपयितुं शक्यते, तत्र भेदाभ्युपगमः; अतश्च न सिद्धसाधनता ॥

नन्वङ्गुल्यग्रेऽनैकान्तिकत्वम्; यथाचाङ्गुलिः परगतस्पर्शकार्यं करोति, अथ स्वगते स्पर्शेऽङ्गुल्यन्तरमपेक्षते । तथाचोक्तम्–

"अङ्गुल्यग्रं यथात्मानं नात्मना स्प्रष्टुमर्हति ।
स्वांशेन ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति ॥" इति

नैवम्; यस्य पदार्थस्य यदसाधारणं कार्यं तस्य कार्यस्य स्वस्मिन्नुत्पत्तौ सजातीयपरानपेक्षत्वं साध्यम्; इह तु स्पर्शकार्यमंगुल्या नैवासाधारणम्, अवयवान्तरेणापि स्प्रष्टुं शक्यत्वात् । व्यवहाराख्यन्तु कार्यं ज्ञानस्यैव; रूपव्यवच्छेदोऽपि रूपस्यैव; मानव्यवहारोऽपि परिमाणस्यैव; अतो न कश्चिद्दोषः ॥

परप्रकाश्यत्वे यदनुमानम् – परापेक्षत्वाद्गुणत्वाद् व्यवहार्यत्वा-दात्मगुणत्वादित्यादि, तत् सर्वं धर्मिग्राहकप्रमाणविरुद्धत्वाद् बाधित-विषयम्, ज्ञानस्य स्वत एव सिद्धिः, न ज्ञानान्तरेणेत्युक्तत्वात् । तदुक्तम् – "स्वत एव यदुत्पद्यते न तत्र परापेक्षेति," "धीकर्मणः सिद्धिमभ्युऽपगच्छताऽवश्यं धीत्वेनापि सिद्धिरुपेया" इति । परप्रकाश्यत्वनिराकरणेऽप्यनुमानं व्यतिरेकिरूपमस्ति, अनुभूतित्वात् प्रकाशत्वात्-ज्ञानत्वात्-व्यवहारहेतुत्वादित्यादि, एतच्च नासाधारणम्, सपक्षाभावाद्विपक्षाभावाच्च ।।

यच्चोक्तम् – किं स्वस्य प्रकाशः स्वप्रकाशः, किंवा स्वश्चासौ-प्रकाशश्च इत्यादि, तदतिमन्दम्; प्रकाशशब्देन व्यवहारहेतुत्वमुच्यते; घटप्रकाश इति घटव्यवहारहेतुरित्यर्थः । स्वप्रकाश इति स्वयमेव स्वव्यवहारहेतुरित्यर्थः । अतः स्वयंप्रकाशा संविदिति सिद्धम् ।।

इति नन्दीश्वरस्य प्रभाकरविजये
संवित्स्वप्रकाशाख्यं प्रकरणम् ।।

———

(७) मनःसद्भावतदणुत्व प्रकरणम् ।।

नयविवेकाख्यो ग्रन्थोऽभ्यसनीयः सम्यग्ज्ञानोत्पत्त्यर्थम् । इदानीं मनस्सद्भावोऽणुपरिमितत्वं च साध्यते । बुद्ध्यादिकं तावत् कार्यम्; तस्यात्मसमवायित्वेऽसमवायिकारणत्वेन द्रव्यान्तरसंयोग एवास्थेयः। तथाहि – बुद्ध्यदिकार्यं स्वसमवायिकारणद्रव्यान्तरसंयोगासमवायि कारणकम्, नित्यद्रव्यगतानित्यविशेषगुणत्वात् पार्थिवपरमाणुगतरूपादिवत्; तद्द्रव्यं मनःशब्दाभिधेयम्; तच्च नित्यमित्यास्थेयम् । इतरथा तस्यापि कार(ण) कल्पना प्रसंगात् । नित्यं च द्रव्यमणुरूपं विभुरूपं वा भवति । तस्य च विभुत्वमयुक्तम्, संयोगाभावप्रसंगात्; संयोगस्य साक्षाद्वा परम्परया वा क्रियैव कारणम्, संप्रतिपन्ने संयोगे तथा दर्शनात् । नच नैरन्तर्यमात्रं संयोगः, गुण-गुणिनोरपि संयोगप्रसंगात्। नच द्रव्यनैरन्तर्यम्, अवयवावयविनोर्व्यभिचारात् । अप्राप्तयोर्द्रव्ययोरेव प्राप्तिः संयोगः; सच विभुनोर्न संभवति ।।

ननु विभुनोरपि संयोगः संभवति । तथाहि – विभुनी, मिथः संयुक्ते, द्रव्यत्वे सति निरन्तरत्वाद्रज्जुघटवत् ।।

तथाहि – आकाशमात्मसंयोगि, तत्संयुक्तद्रव्यान्तरसंयोगि(त्वात्) आत्मसंयुक्तघटसंयुक्तपटवदित्यादि, नैवम्, प्रमाणान्तरबाधितविषयत्वात्; अन्यत्र संयोगमनुगम्य विभुनोः साधयितुं युक्तम् । इतरथा अप्रसिद्धविशेषणत्वाच्छशविषाणवानयमितिवत् । ततश्चान्यत्र संयोगः क्रियाजन्यत्वेन दृष्टः, विभुद्वये तु संयोगे साध्ये कारणाभावात् कार्याभावानुमानबाधाद् बाधितविषयत्वम् । अतो न विभुनोः संयोगः।।*

*उक्तं हि कन्दल्याम्:– विभूनां परस्परतः संयोगे का प्रतिक्रिया? न ह्यसावन्यतरकर्मजः, नाप्युभयकर्मजस्तेषां निष्क्रियत्वात् । नापि संयोगजः, कार्यस्य हि कारणसंयोगिना अकारणेन संयोगजः संयोगो भवति । न चायं

यच्च विभुत्वसाधकमनुमानम् – मनो विभु; ज्ञानासमवायिकारण-संयोगाश्रयत्वादात्मवत्, द्रव्यत्वे सति स्पर्शशून्यत्वादाकाशवत्, निरवयवत्वे सति द्रव्यानारंभकद्रव्यत्वादाकाशवत्, द्रव्यत्वे सति भूतत्वादाकाशवत्, स्पर्शशून्यत्वे सतीन्द्रियत्वाच्छोत्रवदित्यादि – तत् सर्वं धर्मिग्राहकप्रमाणविरोधादेवापास्तम्, संयोगार्थत्वान्मनःकल्पनायाः। अतः पारिशेष्यादणुत्वमेव निश्चीयते* । तर्हि पार्थिवाद्यणुरे-

विभूनामुपपद्यते नित्यत्वात् । अस्ति च तेषां संयोगः आकाशममूर्तेनापि द्रव्येण समं संयुज्यते, मूर्तद्रव्यसंयोगित्वात् पटवदित्यनुमानात् प्रतीतः, स चाकारणवान्नित्यः । तस्मादनुपपन्नमिदम् अजः संयोगो नास्तीति, तत्राह– विभूनामिति । यत्र युतसिद्धिस्तत्रैव संयोगो दृष्टः । युतसिद्धिश्चाकाशादिषु नास्ति । अतो व्यापकाभावात् संयोगोऽपि तेषु न भवति । यच्च संयोगप्रतिपादकमनुमानमुक्तं तदसाधनम्; उभयपक्षसमत्वात् । यथेदं विभूनां संयोगं शास्ति तथा ताभ्यामेव हेतुदृष्टान्ताभ्यां विभागमपि । अस्तु द्वयोरप्युपपत्तिः, प्रमाणेन तथाभावप्रतीतेरिति चेन्न; संयोगविभागयोरेकस्य नित्यत्वेऽन्यतरस्यासम्भवादिति द्वयोरप्यसिद्धिः परस्परप्रतिबन्धात् । अथ केयं युतसिद्धिर्यस्या अभावाद्विभूनां संयोगो न सिद्ध्यति, अत्राह सा– पुनरिति । द्वयोरन्यतरस्य वा पृथग्गमनं युतसिद्धिर्नित्यानाम्, द्वयोरन्यतरस्य वा परस्परपरिहारेण पृथगाश्रयाश्रयित्वं युतसिद्धिरनित्यानाम् – इति ।

*उक्तं हि कन्दल्याम्:- विभुत्वे ह्यात्ममनसोः परस्परसंयोगाभावे सत्यात्मगुणानां ज्ञानसुखादीनामनुत्पत्तिः; असमवायिकारणाभावात् । आत्मार्थसंयोगस्य ह्यसमवायिकारणत्वेऽर्थदेशे ज्ञानोत्पत्तिः स्यात्; असमवायिकारणाव्यवधानेन प्रदेशवृत्तीनां गुणानामुत्पादात् । आत्मेन्द्रियसंयोगस्यासमवायिकारणत्वे शब्दज्ञानानुत्पत्तिः; आकाशात्मकेन श्रोत्रेणात्मनः संयोगाभावात् । न च बहिर्देशे प्रत्ययो नापि शब्दज्ञानानुत्पादः । तस्मादात्मार्थसंयोगस्यात्मेन्द्रियसंयोगस्य चासमवायिकारणत्वे

वास्तु, न द्रव्यान्तरं मन इति चेन्न, पार्थिवाद्यणूनां द्रव्यारंभकात्व-नियमात्; मनसश्च न द्रव्यारम्भकत्वम्, स्पर्शशून्यत्वादिति व्योमटीकायां प्रपञ्चितम् ।।

किञ्च विवादाध्यासितत्वात् पार्थिवादिद्रव्ययोगो न ज्ञानासमवायिकारणम्, पार्थिवादिद्रव्यसंयोगादितरपार्थिवादिद्रव्य-संयोगवत्, द्रव्यान्तरसंयोगवद्वा । विभुत्वपक्षे दिगात्मसंयोगो वा भवतु, कालात्मसंयोगो वा, किं द्रव्यान्तरेण मनसेति तुल्योऽयमनु-योगः । अतो मनसोऽस्तित्वमणुत्वं च सिद्धम् ।।

इति नन्दीश्वरस्य प्रभाकरविजये मनःसद्भावतदणुत्व
प्रकरणं समाप्तम् ।।

प्रतिषिद्धे परिशेषादात्ममनःसंयोगस्यासमवायिकारणत्वं व्यवतिष्ठते । तच्च मनसो व्यापकत्वे न सम्भवतीत्यनुत्पत्तिरेव ज्ञानसुखादीनाम् । अस्ति च तेषामुत्पादः । अतोऽणुपरिमाणमेव मन इति ।

(८) ज्ञानाननुमेयता प्रकरणम् ।।

*अत्र केचित् ज्ञानमनुमेयमिच्छन्ति; तेषां मते ज्ञानस्यैवाभावः प्रसते तथाहि :- ज्ञानानुमानं हि नार्थसत्तामात्रेण भवितुमर्हति; तस्य तदविनाभावनियमाभावात्, युधिष्ठिराद्यर्थाभावेऽपि ज्ञानं परं वर्तत एव । अथार्थज्ञानं लिङ्गमित्युच्यते, तदपि नोत्पत्तिमात्रेण लिङ्गम्,

---

*भाट्टमतानुयायिनः । व्यक्तश्चायं पक्षो न्यायरत्नाकरे श्लोक-वार्तिकव्याख्याने। तद्यथा :-

ज्ञानजन्योऽर्थगतः कश्चिदतिशयः प्राकट्यभासनादिपर्यायपदवाच्यः, स च पाकजन्यौदनादिगताऽतिशयवदनवगतेऽपि ज्ञाने शक्यतेऽवगन्तुम्; अतः ज्ञानस्य कल्पक इति; सत्यमस्त्यतिशयः, स च प्रत्यक्षेऽर्थे प्रत्यक्षाऽवगतः कल्पयेदपि ज्ञानम्, अनुमानादिषु तु तस्याप्रत्यक्षत्वात् प्राग्व्यवहारात्तद्व्याप्त-लिङ्गाऽभावादप्रमितस्य चाऽकल्पकत्वान्न ज्ञानं कल्पयेत्, अनुमितेऽपि चार्थे ज्ञातो मयाऽग्निरिति अग्निं ज्ञातमनुसंधत्ते, अतस्तत्त्वं वक्तव्यं, ज्ञाने प्रमाण-मुच्यते ज्ञानक्रियजनितो ज्ञातुर्ज्ञेयेन सहाऽऽसत्वसंबन्धः, स मानसप्रत्यक्षाऽ-वगतो ज्ञानं कल्पयति सत्यां जिज्ञासायां, यत्रापि च कश्चिदर्थमनुभूय तद्विषयं ज्ञानमकल्पयित्वैव कालान्तरे तमर्थं स्मरति, तत्रापि स्मृतिज्ञानेनैवात्मनोऽर्थस्य च दृश्यद्रष्टृत्वसम्बन्धे निष्पन्ने मानसप्रत्यक्षेण चाऽवगते तद्बलेन च ज्ञाने कल्पिते तस्य ज्ञानस्येन्द्रियादिप्रत्युत्पन्नकारणाऽसम्भवेन स्मृतित्वं निश्चित्य तदनुपपत्या पूर्वाऽनुभवः कल्प्यते, यथोक्तं 'तदैव ह्यस्य संवित्तिरर्थापत्योप-जायते' इति । स एवाऽऽत्मनोऽर्थेन संबन्धो दृष्टत्वज्ञातत्वादिपदैरभिधीयत इति । कः पुनरसौ संबन्धः, उक्तं प्राप्तिरिति । येऽपि च स्वप्रकाशां संविदं मन्यन्ते तेषामपि स्वोत्पत्तिसमये संवित्तिः स्वात्मानं कर्त्तारं वेद्यं च भासयति न तु स्वस्थवेत्तुर्वा संवेद्यसंबन्धम्, तस्य तदाऽनिष्पन्नत्वेनाऽसत्त्वात् ततो निष्पन्नायां संवित्तौ तस्याः कर्त्तुश्च तद्द्वारा विषयसंबन्धे जाते ततो मानसेनैव

अनवभासमानेऽप्युत्पन्नानुत्पन्नयोरविशेषात्, नह्यनवभासमानं लिङ्गमनुमापकं भवति । न चार्थज्ञानस्य ज्ञानान्तराधीनमवभासनम्; ज्ञानान्तरानवगमादुक्तरीत्यानवस्थापातात् । तस्मादर्थज्ञानं स्वयं प्रकाशमेवाभ्युपगन्तव्यम् ॥

इति ज्ञानाननुमेयताप्रकरणम् ॥

प्रत्यक्षेणाऽर्थेन सह संवित्तेः संवेत्तुश्च संबन्धोऽवभासत इति अङ्गीकर्त्तव्यम्, संविदन्तरोत्पत्तिसमये व पूर्वसंविदो नष्टत्वान्न तद्धर्मत्वेन संवेद्यसंबन्धः शक्यते प्रत्यक्षेण ग्रहीतुमिति संवेत्तृधर्मभूत एव संवेद्यसम्बन्धः कोऽपि नाम सर्वजनीनः प्रातिपर्यायो गृह्यत इति तत एव संवित्तिरूपक्रियाकल्पनासिद्धेरलं स्वप्रकाशतया – इति ।

अनेनेदं ज्ञायते यस्याः संविदः स्वप्रकाशत्वं प्राभाकरमतानुयायिभिरूरीक्रियते, तस्या एवानुमेयत्वं भाट्टैरूरीक्रियत इति । परन्तु प्रकरणपञ्चिकासिद्धान्तात् स्वप्रकाशसंवित् अनुमेयं ज्ञानं च विलक्षणमवगम्यते । तद्यथा –

ज्ञानमनुमेयमिष्यते । तदनुमाने च नार्थसत्तामात्रं लिङ्गम्; तस्य तदविनाभावनियमाभावात् । अथार्थज्ञानमित्युच्यते, तदपि नोत्पत्तिमात्रेण लिंगम्; अनवभासमाने उत्पन्नानुत्पन्नयोरविशेषात् । न ह्यनवभासमानमेव लिङ्गं लिङ्गिनमनुमापयति । न चार्थज्ञानस्य ज्ञानान्तराधीनमवभासनम्; ज्ञानान्तरानवगमात् । तस्मादर्थज्ञानं स्वयंप्रकाशमेवाभ्युपगन्तव्यम् । एतेन ये सुखादिवन्मानसप्रत्यक्षं ज्ञानान्तरमेव ज्ञानसद्भावे प्रमाणमाहुस्ते निराकृताः । स्वयम्प्रकाशत्वेनाप्युपपत्तौ पराधीनप्रकाशकल्पनाऽनुपपन्नेत्युक्तमेव । किन्तर्ह्यनुमीयते ज्ञानम् ? ननु न तत्संविदः स्वयंप्रकाशायाभिन्नमुपलभ्यते । सत्यमत एवानुमीयते । ननु किं तदिति? न तद्विद्मः । संविदुत्पत्तिकारणमात्ममनःसन्निकर्षाख्यं तदित्यवगम्य परितुष्यतामायुष्मता – इति ।

(९) क्रियानुमेयता प्रकरणम् ।।

*संप्रति क्रियाया अनुमेयत्वं प्रसाध्यते । तत्र तावद्गच्छति देवदत्ते संयोगविभागातिरिक्तं गमनाख्यं वस्तु नेन्द्रियेणोपलभ्यते । ननु प्रत्यक्षैव क्रिया; विवादाध्यासितं गमनादिज्ञानमिन्द्रियजम्, इन्द्रियभावभावित्वात्, रूपादिप्रतीतिवत्, मैवम्; लैङ्गिकत्वेनापि प्रतीतेरुपपत्तेः । कथम् ? ऐन्द्रियिकत्वलैङ्गिकत्वयोः केन विशेषेण लैङ्गिकत्वस्वीकार इति चेत्, अस्त्येव विशेषः; ऐन्द्रियकत्वे इन्द्रियस्य क्रियाग्रहणे शक्तिरक्लृप्ता कल्प्यते । लैङ्गिकत्वेऽपि शक्तिकल्पनमविशिष्टमिति चेन्न, सामान्येन व्याप्यस्य व्यापके क्लृप्तशक्तित्वात्; इन्द्रियस्यतु सामान्ये न शक्तिः, क्वचित्संयुक्तस्य घटादेर्ग्रहणम्, क्वचि (च्च) संयुक्तस्यैव गोलकादेः, परमाण्वादेश्चाग्रहणम्, संयुक्तसमवायाच्चक्षुषा रूपादिग्रहणम्, न रसादीनाम्; अतो यत्र प्रतीतिस्तत्रेन्द्रियस्य शक्तिरिति प्रतिविषयमिन्द्रियस्य शक्तिकल्पनया लैङ्गिकत्वेनाप्युपपत्तेरैन्द्रियिकत्वकल्पनमन्याय्यम् ।।

किंच विवादाध्यासितं गमनादिकमनुमेयम्, क्रियात्वात् आदित्यादिक्रियावत्; अतोऽनुमेयैव क्रिया । किं तर्हि क्रियानुमाने लिङ्गम् ? विभागपूर्वकः संयोगः । तथाहि – यद्यत्कादाचित्कं तत्तदागन्तुकाज्जायमानं दृष्टं यथा तन्तुसंयोगेभ्यः पटः, अयमप्यागन्तु (क) कारणवानिति । आगान्तुकशब्देनासमवायिकारणमुच्यते ।।

ननु समवायेनानैकान्तिकः, तस्य समवायिकारणासमवायिका-

*"प्रत्यक्षेणैव हि दृष्टं कर्मस्वरूपं, तदनन्तरं च देशान्तरप्राप्तिं देवदत्तादेरुपलभामहे, न हि नित्याऽनुमेयं कर्मस्वरूपम्, अपरोक्षेणैवाऽवभासात्, नित्याऽनुमेयत्वे च देवदत्तेऽप्यनुमेयत्वाद् "देवदत्तस्य गतिपूर्विकां देशान्तरप्राप्तिमुपलभ्यादित्येऽपि गतिस्मरण" *मिति भाष्यमनुपपन्नं स्यात्।

रणयोरभावात् । कार्यं यत्र समवैति तत्समवायिकारणम्; असमवायिकारणं च कार्यैकार्थसमवायि, कारणैकार्थसमवायि वा; समवायस्य समवायान्तराभावादुभयमपि नास्ति, नैवम्, तस्यापि पिण्डसमवायिकारणादिनोपपत्तेः । तथा चोक्तं प्रकरणपञ्चिकायाम्– "यत एव हि पिण्डस्योदयः समवायिकारणात्तत एव तस्य जातिसमवायोऽपि सम्पद्यते" इति । समवायिकारणासमवायिकारणलक्षणं च समवायव्यतिरिक्तविषयम्, अतो नानैकान्तिकत्वम् ॥

ननु विभागपूर्वकसंयोगस्य स्थाण्वादावपि दृष्टत्वात् तत्रापि कर्मानुमानं स्यात्, नैवम्, एकत्र कर्मानुमानेनोभयत्रापि विभाग संयोगोपपत्तेः । यत्कार्यं तत्कारणवदिति व्याप्तिः; न पुनर्यत्र (कार्यं तत्र) कारणमिति । किंच स्वदेशविभागपूर्वकसंयोगस्यैव लिङ्गत्वम्, स्थाणौ तु तदभावात् न कर्मानुमानमिति । किंच लिङ्गवत्त्वे स्थितेऽपि पूर्वकर्मवशादेव विभागसंयोगयोरुप (पत्तौ) कर्मान्तरानुदयाच्च न चलतीति प्रत्ययप्रसङ्गः ॥

ननु कर्मकारणाभिमतात् प्रयत्नवदात्मनः शरीरसंयोगादेव विभागसंयोगयोरुपपत्तौ किमन्तर्गडुना कर्मणा ? प्रत्यक्षत्वे तु यथादर्शनं कर्माङ्गीकारेऽपि न दोषः, नैवम्; संयोगो हि स्वाश्रये स्वाश्रयसमवेते वा कार्यमारभत इति नियतम् । यथा तन्तुसंयोगाः स्वाश्रयेषु तन्तुषु पटम्, प्रचयावयवसंयोगास्तु स्वाश्रयसमवेतेऽवयविनि महत्त्वम्, तन्तुतुरीसंयोगस्तु स्वाश्रये तुर्याम्, स्वाश्रयसमवेते च पटे पटतुरी संयोगम्; अतः स्वाश्रयास्वाश्रययोः शरीरदेशयोर्विभागसंयोगौ

न च देशान्तरप्राप्त्याऽतीन्द्रियस्यापि कर्मणोऽनुमानं सम्भवति, दृष्टैरेव प्रयत्नवदात्मसंयोगादिभिः कर्मकारणत्वाभिमतैस्तदुपपत्तेरि" ति शास्त्रदीपिकादौ प्रपञ्चितमित्यास्तां तावत् ।" इति न्यायरत्नाकरे यत् उक्तं तदिदं यथाप्रकरण-पञ्चिकं निरस्यति – संप्रतीति ।

संयोगहेतुकौ न भवतः; अत आत्मशरीरसंयोगात् स्वाश्रये शरीरे कर्मोत्पद्यते, ततो विभागसंयोगाविति न कर्मविच्छेदः ।।

ननु यथा स्वाश्रये कार्यकरस्य संयोगस्य स्वाश्रयसमवेतेऽपि कार्यकरत्वमङ्गीकृतम्, तथैवास्वाश्रयेऽपि कार्यकरत्वमङ्गीक्रियताम्; स्वाश्रयसमवेतेऽपि हेत्वन्तरं वा कल्प्यताम्; किमर्धवैशसेन ? नैवम्; अन्वयव्यतिरेकाभ्यां हि स्वाश्रये स्वाश्रयसमवेते च हेतुत्वम्; तत्रान्यदर्शनापेक्षान्यतरस्य नास्ति । आत्मशरीरसंयोगस्य विभाग-संयोगहेतुत्वे नास्त्यन्वयव्यतिरेकाभ्यां हेतुत्वम्, व्यतिरेकाभावात् । आत्मशरीरे संयोगे सत्येव कार्यस्योदयाद्यद्यपि सिद्धोऽन्वयः, तथाप्यात्मशरीरसंयोगस्य सर्वदा सद्भावान्नास्ति तदभावे कार्याभावः। अतश्चबुद्ध्यादीनामात्मकारणत्ववदन्वयव्यतिरेकावसितकार्यकारणभावदृष्टान्तेन तत्समवेतकार्यत्वादित्यादिहेतुनाऽनुमानेन कार्यकारणभावः इति प्रति-वक्तव्यम् । अतोऽन्वयव्यतिरेकापेक्षत्वादनुमानस्यान्वयव्यतिरेकाभ्यां च स्वाश्रये स्वाश्रयसमवेते वा कार्यारम्भस्यावगतत्वात् तदनुसारेणानु-मातव्यम्, नास्वाश्रय इति । स्वाश्रयस्वाश्रयसमवेतोदाहरणयोरन्योन्या-पेक्षा नास्ति, तुल्यप्रमाणगम्यत्वात्; अतः संयोगस्य स्वाश्रये स्वाश्रय-समवेते वा कार्य्यारम्भकत्वम्, नास्वाश्रय इति कर्मैवानुमेयम् । अर्थेन्द्रियसंयोगस्यात्मनि ज्ञानजनकत्वात् स्वाश्रय इति नियमो नास्तीति चेन्न, असमवायिकारणप्रयुक्तत्वात् अस्य नियमस्य; अर्थेन्द्रियसंयोगस्तु निमित्तकारणम् । असमवायिकारणस्यापि तर्हि व्यभिचारः, वेणुदन्तविभागसमवायिकारणे नखदलविभागोत्पत्तेः (१) एकत्वेन च खादेः क्रियायाश्च देशविभागसंयोगोत्पत्तेश्चेति चेदेवं ह्यसमवायि-कारणसंयोगप्रयुक्त इत्यवगम्य शाम्यतु भवान् । तर्हि तन्तुद्वयसंयोगस्या-समवायिकारणभूतस्य बहुतन्तुव्यापिपटहेतुत्वाद् व्यभिचार इति चेन्न, तत्रापि विभागद्वारेणोत्पादकत्वात् ।।

तथाहि – तन्तुद्वयसंयोगः प्रथमं स्वाश्रये तन्तुद्वये पटभागमुत्पादयति, उत्पन्नेन पटभागेन तन्त्वन्तरस्य संयोगात् स्वाश्रये पटभागान्तरमित्येवमुत्तरत्राप्यूह्यम्; अतो न व्यभिचार इति । एवं त्र्यणुकाद्युत्पत्तावपि द्रष्टव्यम् ॥

अथवा यावतां संयोगानामेकस्मिन् कार्येऽसमवायिकारणत्वं तावन्तमपेक्ष्य स्वाश्रयादिव्याप्तिः; अत एककार्यत्वेऽपि महापटस्य न व्यभिचारः । अथवा यत्रैकस्मिन् कार्ये एकस्यैवासमवायिकारणत्वम्, तत्रैवेयं व्याप्तिः; प्रयत्नवदात्मशरीरसंयोगस्त्वेक एवेति न कश्चिद्दोषः॥

ननु यदा प्रयत्नवदात्मशरीरसंयोगाच्छरीरे विभागसंयोगोत्पत्तिः, तदा प्रयत्नवदात्मदेशसंयोगाद्देशेऽपीति न तदतिरिक्तकर्मानुमानम्, नैवम्; देशशरीरविभागसंयोगस्त्वेकं कार्यम् । अत एकस्मिन्नेव कार्ये प्रयत्नवदात्मशरीरसंयोगस्य प्रयत्नवदात्मदेशसंयोगस्य च हेतुत्वात् नात्मशरीरसंयोगस्यास्वाश्रये देशे कार्यकरत्वं आत्मदेशसंयोगस्य वाऽस्वाश्रये शरीर इति ॥

किञ्चात्मदेशसंयोगस्यापि हेतुत्वं न क्लृप्तम्, कल्पनीयम्; तद्वरं कर्मकल्पनम् । अतः कर्मैव शरीरेऽनुमेयं ततो विभागसंयोगाविति सर्वमुपपन्नम् ॥

इति नन्दीश्वरस्य प्रभाकरविजये क्रियानुमान प्रकरणं समाप्तम् ।

———

(१०) अतीन्द्रियशक्तिसमर्थन प्रकरणम् ॥

*सम्प्रत्यतीन्द्रियशक्तिसमर्थनमनुमानेन क्रियते । अग्न्यादिकमजनकदशातो जनकदशायामतिशयवत्, कार्यकरत्वात् कुठारादिवत्॥

सर्वकार्याणामदृष्टस्यापि हेतुत्वात्सिद्धसाधनमिति चेन्न, अग्न्यादेर दृष्टातिशयवत्त्वाभावात् । नचाप्यौष्ण्यातिशयेन सिद्धसाधनता, औष्ण्यस्यापि कादाचित्कत्वेन तज्जननेऽप्यतिशयान्तरानुमानप्रसङ्गात् ॥

नच प्रतिबन्धकाभावेन सिद्धसाधनता, अभावस्यापि भावान्तरत्वस्य स्थितत्वात्; (भा) वत्वे स्वरूपादीनां चाजनकदशायाम (पि) सम्भवान्न तेषां कारणत्वम् । अजनकदशाविलक्षणस्यैव भावस्य प्रतिबन्धकाभावत्वे नामान्तरेण शक्तिरेवाङ्गीकृता ॥

भावान्तराभावपक्षेऽपि नाभावाद्भावोत्पत्तिः संभवति । अभावप्रमेयस्य नास्तिज्ञानजनकत्वात् संभवतीति चेन्न, विषयस्याकारणत्वात्; इतरथातीतानागतयोरपि विषयत्वेन कारणत्वप्रसङ्गात् ॥

विहिताकारणात् प्रत्यवायोत्पत्तिरिति चेत्, नाकारणात् प्रत्यवायोत्पत्तिः, किन्तु अन्यकारणात् । तदुक्तम्—

"स्वकाले यदकुर्वंस्तु करोत्यन्यदचेतनः ।
प्रत्यवायोऽपि तेनैव नाभावेन स जन्यते ॥" इति ॥

---

*सर्वभावानां च शक्तिरदृष्टस्वलक्षणापि कार्येणानुमीयते; अग्नेर्यथाभूतादेव दाहो दृष्टस्तथाभूतादेव मन्त्रौषधिप्रणिधाने कार्यं न दृश्यते । न तत्र दृष्टमेव रूपं कारणम् । तस्याजनकावस्थातो विलक्षणत्वाभावात्कार्यानुदयप्रसङ्गात् । यच्च खलु अजनकदशातो निरतिशयं ततः कार्यं नोत्पद्यते कुण्ठादिव कुठारात् । यदा तु तत एव कार्यं दृश्यते तदा तदवस्थातोऽस्त्येव वैलक्षण्यं तीक्ष्णत्वमिव । अग्नौ च कार्यानुदयदशातो विलक्षणं न कार्योदयसमये

अनुपलब्धेर्नास्तिज्ञानजनकत्वमिति चेन्न, अनुपलब्ध्यभावेऽपि नास्ति ज्ञानोत्पत्तिदर्शनात्; दृश्यमानस्यैवार्थस्य 'प्रागयमिह नासीत्' इति प्रतिपत्तिर्दृश्यते । इदानीमुपलम्भादेवानुपलम्भोऽस्ति; प्रातरनुपलम्भोऽनुवर्तत इति चेन्न, प्रातर्भानादेव तस्य गतत्वात् । एतच्चाभावनिराकरणे प्रपञ्चयिष्यामः । भाववदन्वयव्यतिरेकयोस्तुल्यत्वात् ।।

प्रतिबन्धकाभावस्य कारणत्वमिति चेन्न, अन्यथा सिद्धत्वाद् व्यतिरेकस्य ।।

तथाहि – मुद्गराभिघाते घटानुत्पत्तिर्न प्रतिबन्धकाभावाभावात्, किंतु मुद्गरपाते सति प्रतिपन्नकारणभूतावयवसंयोगविशेषाभावात्; अ (न) न्यथा सिद्धान्वयव्यतिरेकौ हि कार्यकारणभावं कल्पयतः, अन्थाऽनवस्थाप्रसङ्गात् ।।

किंच कार्यविघातकरः प्रतिबन्धक इति सर्ववादिभिरभ्युपेयम्; प्रतिबन्धकाभावस्यापि कारणत्वमभ्युपगच्छताऽवश्यं प्रतिबन्धकोऽभ्युपगन्तव्यः; तथाच सति प्रतिबन्धकसद्भावादेव कार्यविघातोपपत्तौ न तदभावस्य कारणत्वमुचितम् । अन्यथासिद्धत्वात्कल्पनायाः ।।

प्रत्यक्षदृश्यं रूपमुपलक्ष्यते । भवितव्यञ्च वैलक्षण्येन, अन्यथा कार्यानुत्पत्तिप्रसङ्गादिति कार्योदयेऽतीन्द्रियं किञ्चिद्रूपं वह्नेरनुमीयते । तस्य मन्त्रौषधिप्रयोगेण विनाशात् कार्यं नोत्पद्यते । नच वाच्यं मन्त्रौषधादिभिरतीन्द्रियं रूपं न किञ्चिद्विनाश्यते, किन्तु मन्त्रौषधादिसन्निधाने नैव कार्यान्वय इति; कारणावैगुण्ये कार्योदयविघातासम्भवात् । अथोच्यते मन्त्राद्यप्रयोगोऽपि कार्योत्पत्तिनिमित्तं सम्प्रयोगे चाप्रयोगो निवर्तत इत्यस्ति कारणवैगुण्यमिति, तन्न; अप्रयोगस्य प्रयोगाभावरूपत्वात् । सर्वभावानाञ्च भावकारणनियततत्वदर्शनात् । अभावस्य क्वचिदपि कार्ये जनकत्वाश्रयणानुपपत्तेः । यच्च तदतीन्द्रियमग्ने रूपं तच्छक्तिसामर्थ्यादिवाच्यतया लोके प्रतीतम्, तस्य च

प्रतिबन्धकाभावस्य कारणत्वेऽपि क्वचित्प्रध्वंसः क्वचित्तु प्रागभावः क्वचिदुत्तेजकासहभाव इत्यनेककारणकल्पनं स्यात्, तद्वरं शक्तिकल्पनम् ॥

ननु शक्तिवादिनामपि प्रतिबन्धावस्थायां शक्तेर्विनाशादिकं कल्पनीयम् न; शक्तेर्विनाशोत्पादौ नाभ्युपेयेते, शक्तेः कारणकल्पनाप्रसङ्गात्, शक्तेरपि शक्तिकल्पनाप्रसङ्गाच्च । अतो यावद्द्रव्यभाविनी शक्तिरिति स्थितम् ॥

एवंच सति विद्यमानाया एव शक्तेः प्रतिबन्धकसद्भावादेव कार्याकरणम्, तदभावे करणमित्यास्थेयम् ॥

एवंच सति स्वरूपस्यैव प्रतिबन्धकाभावे कार्यकरणम्, तदभावे चाकरणमस्तु; किमनया शक्त्या ?

मैवम्, उपलभ्यमानस्यैव स्वरूपस्य प्रतिबन्धा (नु) पपत्तेः; अनुपलभ्यमानस्य हि घटस्य कुड्यादिना प्रतिबन्धो दृष्टः । अतः स्वरूपस्यैव प्रतिबन्धकत्वकल्पनायां प्रमाणविरोधः, शक्तेस्तु कार्यकल्प्यत्वादेव कार्यादर्शने प्रतिबन्धकत्वकल्पनायामपि न विरोधः ॥

कार्यानुत्पत्तौ द्वयी गतिरभिभवो वा विनाशो वा यत्र कदाचिदपि पुनः कार्यं न दृश्यते, तत्र विनाश एव वस्तुतः । यत्र पुनः प्रतीकारवशेन कार्योदयस्तत्राभिभवमात्रम् । तस्य चैवं वन्ह्यादिप्रसिद्धस्य सर्वभावेषु कार्योदयानुकूल्यं कार्योत्पादकानुमानेन परिकल्पनीयम् । तस्य च नित्याश्रयाश्रितस्य नित्यत्वमनित्याश्रयाश्रितस्य तदुत्पत्तिकारणादेवोत्पत्तिः । संस्काराच्चास्यायमेव विशेषः– संस्कारो हि नाम नित्येष्वनित्योऽनित्येषु च कारणान्तरायत्त इति । इति प्रकरणपञ्चिका । अतः प्रतिबन्धकाभावकारणाशंकादिकं स्पष्टं न निरस्तम्, अत्र तदपि स्पष्टं निरस्तमिति विशेषः ।

यत्तूक्तम् – कोऽयं शक्तेः प्रतिबन्धः; किं प्रागभावः, किंवा प्रध्वंसाभावः, आहोस्वित्सहकारिवैकल्यमिति – तस्यैषां पक्षाणामनभ्युपगम एव परिहारः; किंतु कार्यविघात एव; मणिमन्त्रादिसन्निधाने कार्यं नोत्पद्यते तदभावे चोत्पद्यत इति सर्वं सिद्धम् ॥

ननु कार्याभावः कारणाभावादेव, नच भवतां कारणाभावः; अस्मन्मते तु प्रतिबन्धकाभाव (रूप) कारणाभावः,

नैवम्, प्रतिबन्धकस्यैवाभावप्रसङ्गात् । तथाच सति प्रतिबन्धके तदभावस्य कारणत्वमपि न स्यात्; नहि कारणाभावमात्रस्य प्रतिबन्धकत्वम्; मुद्गराभिघातो घटस्य प्रतिबन्धकः, न मृदाद्यभाव इति व्यवस्थानुपपत्तेः । अतोऽनुमानसिद्धस्यातिशयस्येन्द्रियविषयत्वाभावादतीन्द्रियत्वम् ॥

नन्वजनकदशायामपि शक्तेरभ्युपगमात् जनकदशायामतिशयत्वं शक्तेर्नस्यात्, नैवम्; प्रतिबन्धावस्थायां शक्त्यवगमो नानुमानायत्तः, किंतु जनकदशातो विलक्षणरूपेणैवानुमानसिद्धस्यैव पश्चादेवं विमर्शो जायते – प्रतिबन्धावस्थायां किं नाश एव युक्तः, उत कार्याकरत्वमेव – इति; ततश्च कार्याकरत्वमेवेति निर्णयो जायते । ततः कल्पनालाघवात्कार्याकरत्वमात्रम्, न नाशोत्पादाविति । तेनानुमानमूलत्वादस्य निर्णयस्य न तेनानुमानबाधनम् । अतः सिद्धमतीन्द्रिया शक्तिरनुमेयेति ।

इति नन्दीश्वरस्य प्रभाकरविजये शक्तिसद्भाव प्रकरणं समाप्तम् ।

———

(११) परमाणुसमर्थन प्रकरणम् ।।

सम्प्रति परमाणुसद्भावः साध्यते । अल्पपरिमाणतारतम्यं, क्वचिदवधिमत्, परिमाणतारतम्यत्वात्, महत्परिमाणतारतम्यवत् । नित्यश्चासाववधियुक्तः, अनित्यत्वे तस्यापि कारणवत्त्वेनानवधित्वप्रसङ्गात् । यश्चासाववधिः स परमाणुरिति ।।

तथा त्र्यणुकं प्रत्यक्षस्वपरिमाणादल्पतरपरिमाणकार्यद्रव्यारब्धम्, कार्यद्रव्यत्वात्, घटादिवत् । तथा द्व्यणुकम्, स्वावयवारब्धम्, साव यवत्वात्, घटादिवत् – इति ।।

ननु द्व्यणुकमपि कार्यद्रव्यारब्धं स्यात्, कार्यद्रव्यत्वात्, घटादिवत्; अतो न नित्यरूपपरमाणुसिद्धिः नैवम्; महतः कार्यद्रव्यस्य कार्यद्रव्यारब्धत्वम् ।।

तर्हि तदेव द्रव्यं कारणवद्दृष्टमति न द्व्यणुकस्य कारणवत्त्वमपि सिध्यति, तथापि यदि कार्यत्वादेव कारणवत्त्वमनुमीयेत, तर्हि कार्यत्वादेव कार्यद्रव्यारब्धत्वमप्यनुमीयताम्; कः पक्षपातहेतुः? नैवम्; द्व्यणुकस्यापि कार्यद्रव्यारब्धत्वे तस्यापि कार्यद्रव्यारब्धत्वप्रसङ्गेनानवस्था प्रसज्येत । अथ क्वचित् कार्यद्रव्यारब्धत्वं नाश्रीयेत, तर्हि प्रथमस्य तथाभावे कः प्रद्वेषः ? इति स एव परमाणुः ।।

अनवस्थायामपि को दोष इति चेत्, अयमेव दोषः – सर्वेषामवयविनां स्वावयवपरम्परायाः क्वचिदपरिनिष्ठितत्वादनन्तावयवप्रसङ्गः । भवत्विति चेत्, तर्हि सर्षपमहीधरयोरपि तुल्यपरिमाणत्वप्रसङ्गः । अवयवाल्पत्वावयवमहत्त्वाभ्यां हि सर्वत्रावयविनां परिमाणाल्पत्वमहत्वव्यवस्था; अनन्तावयववत्त्वे तु सर्षपोऽप्यनन्तावयवः, पर्वतोऽपि तथैवेति तुल्यपरिमाणत्वमपरिहार्यमेव; अतोऽनवस्थादिदोषप्रसङ्गेन द्व्यणुकस्य न कार्यद्रव्यारम्यत्वं शक्यानुमानम् ।।

ननु – कार्यस्य कारणद्रव्यानुमानमप्यनवस्थाप्रसङ्गेनैव न घटते नैवम्; अन्यतरव्याप्तिपरित्यागे प्रसक्ते कार्यद्रव्यारब्धत्वमेव परित्याज्यम्, न तु कारणवत्त्वमात्रव्याप्तिः, तस्या अवश्यं भावित्वात् ॥

तथाहि – कार्यं करणवदिति सामान्यव्याप्तिमङ्गीकृत्य तत्कारणमपि कार्यरूपमेवेति द्वितीयानुमानेन साध्यते; अतः सामान्यानुमानविरोधे तदुपजी (वक) विशेषानुमानं ते परित्याज्यं स्यात्, न तूभयोरपि परित्यागः ॥

भवतु; द्व्यणुकं परमाणुकं चोभयमपि नाश्रीयताम्, आद्यमेव प्रत्यक्षं महिमगुणशाल्येवावधिर्भविष्यति, परमाणुसाधकानुमानमपि सिद्धसाधनं भवतु, नैवम्, विकल्पासहत्वात् ॥

तत्किमाद्यप्रत्यक्षं सावयवमनित्यम्, उत निरवयवं नित्यम्? यदि सावयवमनित्यम्, तदा तस्यावयववत्त्वेन कारणवत्त्वेन च द्रव्यान्तरानुमानप्रसङ्गीकृतः परमाणुः; निरवयवं नित्यमित्याश्रीयमाणे उत्तरोत्तरसावयववानित्यकार्यद्रव्यस्य कारणत्वं न स्यात् । यद्यद्घटादिकार्यद्रव्यकारणं पिण्डादि तत्तत्सावयवमनित्यं च दृष्टम्; निरवयवस्य चाकाशादेर्द्रव्यारम्भकत्वमपि न दृष्टम्; अतो निरवयवनित्येना (द्य) प्रत्यक्षेणोत्तरोत्तरकार्यारम्भो न सिद्ध्यति ॥

अथ सत्यपि तथा दर्शने उत्तरोत्तरकार्यदर्शनबलान्निरवयवं नित्यमाद्यप्रत्यक्षं कारणमिति कल्प्येत, तर्हि परमाणुरपि नित्यो निरवयव एव कारणं भवतु, द्व्यणुकमपि नित्यद्रव्यकार्यं भवत्विति तुल्यचर्चम्॥

नन्वस्माकं दृष्टविरुद्धनित्यनिरवयवस्य कार्यद्रव्यसमवायिकारणत्वे कल्प्यमानेऽप्युभयसंप्रतिपन्ने आद्यप्रत्यक्षे धर्ममात्रमेव कल्पनीयम्, तव तु द्व्यणुकमपरमाणुरूपधर्मिकल्पनं कृत्वा तत्र निरवयवनित्यकारणत्वधर्मकल्पनमपीति न तुल्यत्वम्, सत्यम्; दृष्टस्वरूपे आद्यप्रत्यक्षे

न विरुद्धधर्मकल्पनमुचितम्, क्लृप्तहानिप्रसङ्गात्; अदृष्टस्वरू(पं) परमाण्वादिकमेव कल्प्यते; अतः क्लृप्तहानिपरिहारेणाक्लृप्तकल्पनमेव न्याय्यम्; इतरथा पर्वतधूमस्य कारणत्वेनाग्निकल्पने लाघवमस्तीत्यग्न्यनुमानोच्छेदप्रसङ्गः ॥

अथ धूमजातीयस्याग्निसम्बन्धस्यावगतत्वात् क्लृप्तहानिप्रसङ्ग इति चेत्, तर्ह्यत्रापि द्रव्यस्य सावयवानित्यत्वस्वभावस्य क्लृप्तत्वात् तत्परित्यागे क्लृप्तहानिः समैव । एवं क्रियाशक्तीन्द्रियादिष्वपि लाघवादनुमानं न स्यात् । अत एवोक्तम् – ''प्रमाणबलकल्प्यानि सुबहूनि'' इति ॥

अतः कार्यद्रव्यं समवायिकारणवदित्येतावदेवानुमातव्यम्; न महत्कार्यद्रव्यं कारणवत्, नापि कार्यद्रव्यारब्धमिति ॥

किंच कार्यद्रव्यं कारणवदिति सामान्यव्याप्त्युपजीवनेन – महत्कार्यद्रव्यं कारणवत्, कारणमपि कार्यद्रव्यमेव दृष्टम् – इत्यादि निक्षेप्तव्यम्; तथाच सति महत्त्वादेर्व्यतिरेकाभावात्प्रयोजकत्वं न सम्भवति ॥

तथाहि – इतरसामग्रीसंभवेऽपि यस्य व्यतिरेकात्कार्यानुत्पादो दृष्टः तस्यैव धर्मस्य प्रयोजकत्वम्; अत्र तु कार्यत्वे सत्यपि महत्त्वादिधर्माभावात् कारणवत्त्वाभावः क्वचिदपि न दृष्टः; अतः कारणवदित्येतदेव प्रयोजकम् ॥

किंच कार्यद्रव्यं कार्यद्रव्यारब्धमितीयं व्याप्तिरुभयोरपि वादिनोर्व्यभिचारिणी; तव तु आद्यप्रत्यक्षे उत्तरकार्यारम्भके व्यभिचारः, मम तु परममहतः कार्यात् त्र्यणुकात् द्व्यणुकसिद्धिः, द्व्यणुककार्यात्परमाणुसिद्धिः ॥

ननु परमाणवस्त्र्यणुकमेवारभन्ताम्, किमन्तर्गडुना द्व्यणुकारम्भेण? नैवम्; महतः कार्यद्रव्यस्याल्पपरिमाणकार्यद्रव्यान्तरारभ्यत्वं

दृष्टमिति तदनुसारेण त्र्यणुकस्य कार्यद्रव्यमेव कारणमनुमेयम्, विशेषव्याप्तेः परित्यागायोगात्; परमाणवश्च नित्या इति न तैस्त्र्यणुकारम्भः ॥

ननु – अनित्याः, परमाणवः, मूर्तत्वात्, घटादिवत्; तथा सावयवाः, परमाणवः, मूर्तत्वात्, घटादिवत्; तथा अनित्याः सावयवाः, परमाणवः, सर्वदिक्संबन्धत्वात्, घटादिवत् इत्येभिर्निराकृताः परमाणवः कथं सिध्यन्ति ? सिद्ध्यन्त्येव तैरेव हेतुभिः ॥

एतेषां हेतूनां पक्षधर्मत्वं विना हि न हेतुत्वमिति एतेषां पक्षवृत्तितादिसाधकप्रमाणैरेव परमाणवोऽपि सिद्धा भवन्ति, अन्यथैतेषां हेतुत्वमेव न स्यादिति भावः ॥

तथाहि – तत्र पक्षीकृताः परमाणवः सिद्धा असिद्धा वा ? यदि सिद्धाः, तदा धर्मिग्राहकप्रमाणबाधात् बाधितविषया हेतवः; अथासिद्धाः, तर्ह्याश्रयासिद्धत्वादेव न साध्यसाधकाः ॥

अथ प्रसङ्गापादनमुखेन हेतवः साध्यं साधयन्ति; तर्हि पक्षभूतपरमाण्वङ्गीकारेण चेत्प्रसङ्गस्तथापि धर्मिग्राहकबाध एव; अनङ्गीकारेणेति चेत्, तदापि पूर्वोक्ताश्रयासिद्धिस्तदवस्थैव । प्रसङ्गापादनमपि नानुमानविलक्षणं प्रमाणम्, किंतु अनुमानस्यैव प्रयोगभेदमात्रम्; साधनदूषणलक्षणान्यपि तान्येवेति न विधान्तरं प्रसङ्गापादनमिति सर्वमुपपन्नम्। अयं तु नित्यकारणवादः ब्रह्मकारणत्वपक्षे प्रकृतिकारणत्वपक्षे च तुल्यः अतः परमाणुकारणवादे ये दोषास्ते सर्वेषामपि समाना इत्युपरम्यते ॥

इति नन्दीश्वरस्य प्रभाकरविजये परमाणुसद्भावप्रतिपादनप्रकरणं समाप्तम् ।

———

(१२) कार्यव्युत्पत्ति समर्थनम् ।।

इदानीमाद्या व्युत्पत्तिः कार्य एवेति प्रतिपाद्यते । प्रवृत्तावेवाद्या व्युत्पत्तिः; प्रवृत्तिश्च कार्यज्ञानादेव भवति ।।

ननु – न तावदवश्यं प्रवृत्त्यधीनैव व्युत्पत्तिः; पुत्रस्ते जात इति वाक्यश्रवणसमनन्तरं श्रोतुर्मुखविकासं व्युत्पित्सुः पश्यति; तदा मुखविकासस्य हर्षहेतुकत्वेन तस्य स्वस्मिन्नवगतत्वात् हर्षोऽस्तीति निश्चिनोति; हर्षस्य च प्रियार्थावगमपूर्वकत्वेनावगमात् प्रियार्थज्ञान-मनुमिनोति; प्रियार्थज्ञानं च शब्दानन्तर्यात् शब्दहेतुकमेवेत्यवधारयति; तत्र कः प्रियार्थ इति पर्यालोचनायां प्रत्यक्षेण पुत्रजननं दृष्ट्वा हेत्वन्त-रादर्शनाच्च पुत्रजन्मैवानेन शब्देन प्रतिपादितमिति समाकलयति; तत्र प्रतिपदमावापोद्धाराभ्यां पदार्थविशेषोऽपि निश्चीयत इति सुकरैव सिद्धेऽप्याद्या व्युत्पत्तिः । अथोच्येत पुत्रजन्मैवास्य प्रियमिति पारिशे-ष्यावधारणं न शक्यते, अतीतानागतहर्षहेतूनामपि तदैव संभ-वादिति । तन्न, दृष्टहेतौ हेत्वन्तरसंभावनामात्रेण तत्र हेतुत्वत्यागो न युक्तः । अतिप्रसङ्गात्, "हेतुदर्शनाच्च" इत्यधिकरणविरोधाच्च । अतः पुत्रजन्मैव हर्षहेतुरिति शक्यः पारिशेष्यनिश्चयः ।।

किंच पुत्रजनने सत्येव बहुशः प्रयोगदर्शनात् हर्षहेत्वन्तरेष्वप्रयो-गात्पुत्रजननरूपो हर्षहेतुविशेषोऽर्थ इति निश्चीयते । किंच यद्यपि न शक्यः पारिशेष्यनिश्चयः, तथापि हर्षहेतुमात्रनिश्चयात् सिद्धस्यापि शब्दार्थतावगमात्सिद्धः कार्यव्यभिचारः ।।

किंच यद्यपि प्रवृत्त्यधीनैवाद्या व्युत्पत्तिः, तथापि न कार्यविषयैवेति नियमः; यदा वृद्धमातुरं वा प्रति विनोदार्थं – नद्यास्तीरे फलानि सन्ति– इति वाक्यं प्रयुङ्क्ते, तदा अन्यः कश्चिदेतद्वाक्यमर्थाच्छ्रुत्वा तत्र गत्वा फलमाहरति; तत्राऽन्योऽव्युत्पन्नस्तदृष्ट्वा तत्प्रतिपादने तस्य

वाक्यस्य सामर्थ्यं कल्पयति; अतो न कार्य एव व्युत्पत्तिरिति नियमः ॥

किंच – कोऽयं राजा? पाञ्चालराजः – इत्यादिषु प्रश्नप्रतिवचनादिषु-दृष्टः कार्यव्यभिचारः । किंच यद्यपि कार्य एवाद्या व्युत्पत्तिः, तथा-प्युत्तरकालं बहुशः सिद्धार्थे लौकिकवैदिकप्रयोगदर्शनात्सिद्धार्थकार्य-विशेषं परित्यज्यार्थमात्रे शक्तिनिश्चयो युक्तः; यथा गोशब्दस्यैकस्यां व्यक्तौ चेष्टां दृष्ट्वा तत्रैव शक्तिकल्पने सति तेन व्यक्तिमात्रानिश्चयप्रसङ्गे पश्चाद्व्यक्त्यन्तरेऽपि बहुशः प्रयोगदर्शनादनुगतं सामान्यमेव गोशब्दार्थ इति कल्प्यते, एवमत्रापि सिद्धकार्यविशेषं परित्यज्यार्थमात्रे शब्दस्य शक्तिकल्पनमुचितम् ॥

किंच कार्यज्ञानात्प्रवृत्तिरितीदमेव दुर्घटम्, सर्वत्रेष्टोपायज्ञानादेव प्रवृत्तिदर्शनात्; यत्रेष्टोपायत्वमवगतं तत्र लौकिकाः प्रवर्तन्ते, यत्र तन्नास्ति न तत्र प्रवर्तन्त इत्यन्वयव्यतिरेकाभ्यामिष्टसाधनज्ञानमेव प्रवर्तकम् ॥

अथोच्येत – अनन्यथासिद्धावन्वयव्यतिरेकौ हि कार्यकारणभावं कल्पयतः; अत्र चेष्टोपायज्ञानात् 'ममेदं कार्यम्' इति ज्ञानमुत्पद्यते, तज्ज्ञानात्स्वतन्त्रः प्रवर्तत इति, तन्न; इष्टोपायज्ञानादेव प्रवृत्त्युपपत्तौ किमर्थमन्तर्गडूयमानं कार्यज्ञानं मध्ये निक्षिप्यते?

नन्विष्टोपायज्ञानमात्रं प्रवृत्तो व्यभिचरति, अतीतेऽनागते चेष्टो-पायज्ञानं न प्रवर्तयति; अतः कार्यज्ञानं निक्षिप्यते; कार्यं च कृति-साध्यम्; अतीतमनागतं च कार्यमेव न भवति, कृतत्वात्करिष्य-माणत्वाच्च; अतोऽतीतानागतकार्यज्ञानेषु न व्यभिचारः शङ्कनीयः; अतोऽव्यभिचारित्वात्कार्यज्ञाननिक्षेपः, एवं तर्हीष्टोपायज्ञानं

कार्यज्ञानोत्पादकमित्यङ्गीकृतम्; तत्र चातीतानागतयोरिष्टोपायज्ञानं कार्यज्ञानं नोत्पादयतीति कार्यज्ञानं कारणं न स्यादिति तुल्यचर्चम् ।।

अथ कृत्यर्हेष्टोपायज्ञानात् कार्यज्ञानमुत्पद्यत इति विशेषयाम इति चेत्, तर्हि तत एव प्रवृत्तिरिति किं कार्यज्ञानव्यसनेन?

किंच कृत्यर्हेष्टोपायातिरिक्ते कृत्युद्देश्ये न तन्निरूप्यते; अतः कार्य ज्ञानं प्रवर्तकमिति वदतां नामान्तरेणेष्टोपायज्ञानविशेषात्प्रवृत्तिरित्युक्तं भवति – इति,

अत्रोच्यते – कार्यधीत एव प्रवृत्तिः; तदन्वयव्यतिरेकित्वात्प्रवृत्तेः, इष्टोपायज्ञानस्याप्यन्वयव्यतिरेकौ स्त इति चेन्न; कार्यज्ञानोत्पादकत्वेनान्यथासिद्धत्वात् ।।

तथाहि – यत्र कार्यज्ञानं नास्ति, केवलमिष्टोपायज्ञानमेव, तत्रातीतानागतवर्तमानोपायज्ञानेऽपि प्रवृत्तिर्न दृश्यते ।।

नन्वयं व्यभिचार इष्टोपायतायाः कार्यधीजननेऽपि समः, नैवम्; कृत्युद्देश्यस्येष्टोपायस्य कार्यधीहेतुत्वम्, अतोऽतीतादिव्यावृत्तिसिद्धिः; द्विधा(ह्यु)पायताधीः – अतीताद्याकारा कार्याकारा च । तत्र कार्याकारातः प्रवृत्तेः कार्यधीतः प्रवृत्तिरुच्यते ।।

ननु पूर्वापरविरुद्धमुच्यते – पूर्वमिष्टोपायज्ञानात्कार्यज्ञानमुत्पद्यते, कार्यज्ञानात्प्रवृत्तिरित्युक्तम्; इदानीमिष्टोपायधीवेद्यमेव कार्यमित्युक्तम्, नैवम्; इष्टोपायताऽऽकारोल्लेखादेव कार्यपर्यन्तं वेद्यमितिकृत्वा इष्टोपायताज्ञाप्यत्वमुक्तम्, नतु भिन्नज्ञानाङ्गीकारेण; यथा आकृतिव्यक्त्योरेकज्ञानविषयत्वेऽप्याकृतिज्ञाप्यत्वं व्यक्तेरुक्तं भाष्यकारेण, शब्दादाकृतिः आकृतितो व्यक्तिः – इति । अतः कृत्युद्देश्यत्वं नाम धर्मः कृत्यर्हेष्टोपायपर्यवसानसिद्धोऽङ्गीकर्तव्यः । तदेव च कार्यमित्युच्यते ।।

ननु कृत्यर्हेष्टोपायज्ञानात् प्रवृत्तिरस्तु, किं कृत्युद्देश्यत्वाख्येन धर्मेणाङ्गीकृतेन? नैवम्; यदि तथाविधस्य कृत्यर्हता कृतिप्रयोजनत्वं विनापि सिध्यति, ततः कृत्युद्देश्यत्वधर्मानङ्गीकारो युक्तः; नच तथा संभवति; तथाविधेषु कृतिसंबन्धः कृत्युद्देश्यतयैव संभवति, नान्यथा; अतो मानसानुमानाभ्यां कृतीप्सितधर्मत्वाख्यो धर्मोऽवश्याङ्गीकार्यः। इष्टोपायत्व(मे)व कार्यत्वमिति न शक्यते वक्तुम्, कार्यत्वेष्टोपायत्वयोरत्यन्तभेदस्य स्फुटत्वात्। कार्यत्वं च इष्टे च वर्तते इष्टसाधने च, तथाऽनिष्टपरिहारेऽपि वर्तते, इष्टोपायत्वं तु न तथेति तयोर्भेदः स्फुटतर एव; इष्टसाधनत्वं तु फलप्रतियोगिकम्, का (र्यत्वं) च कृतिप्रतियोगिकम्। नचैकाधिष्ठानतया तयोरभेदः पितृपुत्रत्वयोरिव; यथैक एव देवदत्तः स्वपित्रपेक्षया पुत्रः स्वपुत्रापेक्षया पिता; पितृत्वप्रयुक्तं च कार्यमन्यदेव, पुत्रत्वप्रयुक्तं चान्यत्; नच तत्रैकाधिष्ठानतया तयोरभेदः। किञ्च रूपभेदादपि तयोर्भेदः; एकस्य फलसाधनत्वं रूपमितरस्य कृतिप्रयोजनकत्वम् कथं विभिन्नरूपयोरभेदः? विलक्षणाकारबुद्धिबोध्यं वस्तुविलक्षणमिति हि प्रसिद्धिः ॥

किंच अन्योन्यव्यभिचारादपि भेदः – कार्यत्वं सुखेऽपि विद्यते, तत्रेष्टोपायत्वं नास्ति; इष्टोपायत्वं भूतभोजनादावपि वर्तते, तत्र कार्यत्वं नास्ति; अतोऽन्योन्यव्यभिचारादपि भेदः ॥

किंच इष्टसाधन(तै) व कार्यतेति यो वदति (सः) प्रष्टव्यः, किं कार्यशब्दानुविद्धबोध्ये कृतिजन्यतातिरेकेण कश्चिद्धर्मः स्फुरति, न वा? यदि न स्फुरति, तर्ह्यपुरुषार्थेऽपि कृतिजन्ये कार्यधीः स्यात्; स्फुरति चेत्स कृतिप्रतियोगी धर्मः कार्यबुद्धिशब्दयोरर्थोऽङ्गीकृतः। किंच कार्यशब्दस्तावत्सभागशब्दः – कृतिस्तु प्रकृत्यर्थः, तत्प्रयोजनं प्रत्ययार्थः; अतः प्रकृत्यर्थसंब(द्ध) एव प्रत्ययेन सोऽर्थोऽभिधातव्यः;

इतरथा सामर्थ्याभावात्प्रकृतिप्रत्ययसमभिव्याहारो न स्यात् । अतएव "समर्थः पदविधिः" इति । अतः कृतिसंब(द्ध) रूपमेव कार्यशब्देनाभिधातव्यम् । अतः कार्यशब्द एवेष्टसाधनकार्ययोर्भेदे प्रमाणम् । अथेष्टसाधनतापि कृतिजन्याधिष्ठानतया कृतिनिरूप्या; तस्मात्तदभिधानेऽपि कृतिसंबन्ध उपपद्यत इति, तन्न; कृतिसंबन्धाभिधानेऽङ्गीकृते साक्षात्कृतिसंबन्धाभिधायित्वमेवाश्रयणीयम्, व्यवधाने प्रमाणाभावात्; नच कृतिनिरूप्यधर्माभिधानं युक्तम्; अत इष्टसाधनकार्ययोः स्फुटतर एव भेदः । एतत्सर्वमभिप्रेत्योक्तं प्रकरणपञ्चि (कायाम्)-

"फलसाधनता नाम (परा) (प) रा (च) कार्यता ।" इति ।

तत्सिद्धम् - कार्यता कृतिसाध्यत्वम्, फलसाधनता पुनः ।।
कारणत्वं फलोत्पादे ते भिद्येते परस्परम् ।। इति ।

यत्तूक्तम् - आद्या व्युत्पत्तिः सिद्धेऽपि युक्ता 'पुत्रस्ते जातः' इत्यादाविति, तदयुक्तम्; यद्यपि 'पुत्रस्ते जातः' इति वाक्यश्रवणसमनन्तरं श्रोतुर्मुखविकासो दृश्यताम्, मुखविकासश्च हर्षकार्य इति निश्चीयताम्, हर्षश्च प्रियार्थज्ञानकार्य इति; तथापि हर्षहेतुविशेषनिश्चयो न घटते ।।

न भवतु विशेषनिश्चयः, एतावतैव शब्दार्थत्वनिश्चयः कार्यव्यभिचारश्च सिद्धः; नैवम्; इदंच हर्षहेत्वनुमानमात्रम्; हर्षहेतुमात्रं च न 'पुत्रस्ते जातः' इति वाक्यास्यार्थः, किंतु पुत्रजननरूपहर्षविशेष एव; यावद्विशेषनिश्चय(श्च) न शक्यते, हर्षहेतूनां बहूनां संभवात् । नच पारिशेष्याद्विशेषधीः; नहि कस्यचिज्जन्तोरेकमेव प्रियम् ।।

अथ यद्यपि बहूनां प्रियार्थानां संभावनास्ति, तथापि पुत्रजननविशेषस्य दृष्टत्वात्पारिशेष्यनिश्चय इति, नैवम्, तत्रैव बहूनां हर्षहेतूनां दृष्टत्वात्; यथा पुत्रजननं हर्षहेतुस्तथा सुखप्रसवः प्रियायाः, पितामहा

दीन्प्रति ऋणापकरणम्, तथा पुन्नाम्नो नरकात् त्रायत इति पुत्रः, अतो नरकात् त्राणम्, अव(न्ध्या)त्वं चेत्येवमादीनां बहूनां दृष्टत्वान्न विशेषावधारणम् । किंच वर्तमान एव हर्षहेतुः हर्षोत्पादक इति नियमो नास्ति, अतीतादीनामपि स्मृतिद्वारेण हर्षहेतुत्वेन स्वस्मिन् दृष्टत्वात्, परहर्षेऽपि तथैव संभवात्; किंच विरक्तश्च कश्चित्सुवर्णादि-लाभे सत्यपि स्ववैराग्यनिमित्तं सर्वसन्न्यासं स्मृत्वा हसति विकसित-मुखश्च दृश्यते, तत्र वर्तमानोऽपि सुवर्णादिलाभो न हर्षहेतुः ।।

यदुक्तम् – बहुशः पुत्रजनने स(ति ए)वं विधवाक्यप्रयोगात्पुत्रजन्म-विशेषावगतिरिति, तदतिमन्दम्; बहूनां हर्षहेतूनां संभवा(त् यदाऽनि)श्चयः, तदा प्रयोगान्तरेऽपि(तत्सं)भवादनिश्चय एव । यदि प्रयोगान्तरे निश्चयहेतुरस्ति, सच प्रथममेव वक्तव्यः ।।

यत्तूक्तम् – यद्यपि प्रथ(मं) कार्य एव व्युत्पत्तिः, तथाप्युत्तरकालं बहुशः सिद्धेऽपि प्रयोगदर्शनादुभयानुगतेऽर्थमात्रे शक्तिर्युक्तेति; तदयुक्तम्; गङ्गाशब्दस्य नदीविशेषवाचकत्वे निश्चिते उत्तरकालं तीरादिषु बहुशः प्रयोगदर्शनादुभयानुगतेऽर्थान्तरे शक्तिकल्पना प्रसङ्गात् । तीरादिषु लक्षणादिवृत्त्या प्रयोगोपपत्तेर्न शक्तिकल्पनेति चेत् अत्रापि तर्हि लक्षणया सिद्धार्थप्रयोगोपपत्तेर्न कल्प्यतामिति तुल्यचर्चः । गोपदे तु आनन्त्यव्यभिचाराभ्यां व्यक्तौ कल्पनानुपपत्तेः सामान्ये कल्पनमिति विशेषः ।।

यदुक्तं यद्यपि प्रवृत्तावेव व्युत्पत्तिः, तथापि कार्यज्ञाननियमो नास्ति, यथा वृद्धादीन् प्रति विनोदार्थं – नद्यास्तीरे फलानि सन्ति– इति कार्यपदरहितवाक्यप्रयोगे यादृच्छिकः कश्चित्प्रवर्तत इति; तच्च नैवम्, तत्रापि कार्यज्ञानादेव यादृच्छिकस्य प्रवृत्तिः, प्रत्यक्षाद्यवगतो-दकादौ यथा पिपासोः कार्यबुद्धिरुत्पद्यते, तथात्रापीति । तत्र शब्दा-

त्कार्यबुद्धिर्नास्ति, तथापि व्युत्पित्सोः शब्दहेतुकत्वभ्रमः; सोऽपि पश्चान्निवर्तते; अतो न कार्यव्यभिचारः प्रवृत्तेः । यत्तूक्तम् – अर्थान्तरान्वितपरत्वकल्पनयापि कार्यपरत्वसिद्धेः वृथैव कार्यरूपविशेषे शक्तिगौरवमिति, तदपि न; प्रवृत्तेः कार्यनियतत्वेन कार्यान्वित एव कल्पनं युक्तम्, नत्वर्थान्तरान्विते; कल्पनागौरवमपि विपरीतमेव, अस्माकं तु कार्यमात्रे शक्तिरेकविषया, तव त्वर्थान्तरान्विते महाविषये शक्तिरिति; यथा वह्निरिति नियते दाहकार्ये, न द्रव्यमात्रे शक्तिः । एवं कार्यपरत्वद्वारेण पस्परान्वयोऽपि व्युत्पन्न इति न प्रतिपदाधिकरणविरोधः । नच लोकवाक्यवत्परस्परान्वयपरत्वं वेदान्तानामभ्युपगन्तुमुचितम्, विवक्षाभावात्; अतः कार्यपरत्वमेव वेदान्तानाम्; ननु सिद्धार्थव्यपदेशेषु लौकिकेषु मुख्यार्थाभावादन्विताभिधानं न स्यात्, सत्यम्; तत्र वक्त्रभिप्रायादेवार्थनिश्चयः, नान्विताभिधानात्; संकेतपदेभ्य इव सिद्धार्थेऽपि व्युत्पत्तेरितरविभक्त्यर्थानां व्युत्पत्तिरस्त्येव, तथास्य शब्दस्यायमर्थ इत्यप्यस्ति, तथा प्रश्नप्रतिवचनादिष्वपि । तत्र पदीया व्युत्पत्तिः, आद्या कार्यविषयैवेति सिद्धं कार्य एव व्युत्पत्तिरिति ।।

इति नन्दीश्वरस्य प्रभाकरविजये कार्यव्युत्पत्तिसमर्थनप्रकरणं समाप्तम् ।।

---

(१३) अर्थापत्त्यनुमानवैषम्यसमर्थनम् ।।

इदानीमर्थापत्तेरनुमानाद् भेदः समर्थ्यते । एषा चार्थापत्तिः दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यत इत्यर्थकल्पना, यथा जीवतो देवदत्तस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनेति ।।

केचिदियमनुमानान्न भिद्यत इति वदन्ति । तथाहि- प्रमेयाधिक्यात्सामग्रीभेदाद्वा प्रमाणान्तरत्वमुपपद्यते प्रत्यक्षादीना- मन्योन्यम्; इह तु उभयमपि न दृश्यते । यद्बहिर्भावादिलक्षणं प्रमेयं तदनुमानेनाप्यवगन्तुं शक्यते ।।

तथाहि – देवदत्तो बहिर्देशसंयोगी, गृहाभावे सति विद्यमानत्वात्; यो यो गृहाभावे सति विद्यमानः स स बहिर्देशसंयोगी, यथाऽहम् । तथा जीवतो गृहाभाववान् कालः, क्वचित् भाववान्, जीवद्गृहाभाव- वत्त्वात्, यो यः कालो जीवद्गृहाभाववान्, स स क्वचिद्भाववान्; यथा ममैव कालः । अतोऽनुमानगम्यत्वादर्थापत्तेः प्रमेयान्तरं नाव- शिष्यते । पक्षधर्मताद्यङ्गप्रदर्शनेन सामग्रीभेदोऽपि न निरूपयितुं शक्यते ।।

किं च अर्थापत्तेरनुमानत्वमप्यनुमानेन साध्यते । विवादाध्यासिता- र्थापत्तिरनुमानम्, अविनाभावबलेनोपजायमानत्वात्, धूमादग्नि- ज्ञानवत् ।।

नन्वन्यथा नोपपद्यत इति कल्पनाऽर्थापत्तिः, अतोऽविनाभावेनोप- जायमानत्वमसिद्धम् ।।

नैवम्; बहिर्भावं विना गृहाभावोऽन्यथा नोपपद्यत इति कथमव- गम्यते? जीवतो गृहाभावस्य बहिर्भावेन नियमदर्शनादिति चेत्, तर्ह्यविनाभाव एवान्यथानुपपत्तिशब्देनाप्युक्तो भवतीति नासिद्धत्वम्।

अथ यत्र सामान्यतो विशेषतो वाऽन्वयग्रहणं तत्रानुमानम्, यत्र तु तदुभयं नास्ति शक्त्यादौ, तत्रार्थापत्तिरिति, तन्न; तत्रापि केवलव्यतिरेकिरूपानुमानस्य सामग्री(त्व) संभवात् ।।

अन्वयाभावेन तन्नानुमानमिति चेत्; तर्हि केवलान्वयिनो व्यतिरेकाभावेन प्रमाणान्तरत्वं स्यात् । भवत्विति चेन्न, स्पर्शनप्रत्यक्षस्य रूपवत्त्वाभावात् प्रत्यक्षात्प्रमाणान्तरत्वप्रसङ्गः – इति ।।

अत्रोच्यते– यदर्थान्तरेणापादितसन्देहं कल्पयति, साऽर्थापत्तिः । अनुमाने तु न सन्दिग्धं सन्देहापादकं वा गमकम्; अतः सामग्रीभेदादेव भेदः । अत्र चानुपपत्तिशब्देन सन्देह एवोच्यते । अनुपपद्यमानमपि सन्दिग्धं सन्दिग्धविशेषणं वोच्यते । अत्र कः सन्देहहेतुः? जीवनं च गणितागमादिसिद्धमपि प्रायशो गृहाधिकरणतया दृष्टमिति – गृह एव नियतमिति भ्रमो जातो यस्य, तस्य गृहाभावदर्शने पूर्वनिरूपितधर्मविरहात्सन्दिग्धं जीवनम् । किंच आगमसिद्धस्यैव जीवनस्य गृहाभावनिश्चये गृहवद्बहिर्देशोऽपि देशत्वाच्चैत्राभाववानिति व्याप्तिभ्रमाद् बहिर्देशाभावस्तावदवगतः । एवं सकलदेशीयजीवनाभावभ्रमाद्भवति जीवनभावाभावविषयः संशयः; एवं संशयरूपानुपपत्तिव्युदासाय जीवनमेव बहिर्देशसंबन्धितया कल्प्यते ।।

यच्चोक्तं न सन्दिग्धं कल्पकं दृष्टमिति, व्याप्तं वा गमकं कुत्र दृष्टम्? धूमादौ दृष्टमिति चेत्, तर्ह्यत्रापि जीवनादौ दृष्टमेव । अनुपपद्यमानादन्यत्र सर्वत्र न दृष्टमिति चेत्, तर्हि तत्रापि लिङ्गादन्यत्र न दृष्टमेव । अथान्यत्रादृष्टमपि व्याप्यद्व्यापके प्रतीतिदर्शनबलेन व्याप्तं गमकमित्यङ्गीक्रियत इति चेत्, तर्ह्यत्रानुपपद्यमानादुपपादके प्रतीतिदर्शनबलादभ्युपगम्यत इति समानचर्चम् ।।

यत्पुनरेतदभिहितम् – सन्देहस्य कारणनिरासाद्वा, अन्यतरपक्षावधारणाद्वा निरास इति; तदत्राप्यस्त्येव । तथाहि-नात्र जीवनस्य भावाभावौ सन्दिह्येते, जीवनमेव बहिः स्थि(त) तया निश्चीयत इत्यन्यतरप-क्षावधारणमस्त्येव । यस्तु संशयहेतोरेव निश्चयहेतुत्वं नोपपद्यत इति; तदप्यत्र नास्ति, भिन्नहेतुकत्वादुभयोः; पूर्वनिरूपितधर्मवैधुर्यं ह्यत्र सन्देहहेतुः, बहिर्भावकल्पनं निर्णयहेतुरिति ॥

यत्पुनरेतदुक्तम् – अनुमानेऽपि सन्दिग्धमेव गमकम्, धूमस्याप्यग्न्यकल्पने सन्दिग्धत्वादिति; नैष दोषः; धूमस्तु कल्प्याकल्पनात्सन्दिग्धः, जीवनं तु कल्प्याकल्पनमन्तरेणापि गृहाभावदर्शनात्सन्दिग्धमिति विशेषः । एवमेव सन्देहोत्पादस्तन्निर्णयोत्पादश्च लोकप्रसिद्ध एव । अन्तर्भाववादी चैवंविधं ज्ञानं न नास्तीति वक्तुं शक्नोति; प्रामाण्यं च नापाकरोति; केवलमन्तर्भावस्यैव प्रतिपाद्यमानत्वात् । अतोऽनुमानेऽनिश्चितं गमकम्, अर्थापत्तौ तु सन्दिग्धमिति विशेषः ॥

किंच यत्सन्दिग्धं गमकं जीवनम्, तदेव गम्यं बहिः संबन्धितयाऽर्थापत्तौ; अनुमाने त्वन्यदेव गमकम्, अन्यदेव गम्यम्; अतोऽत्यन्तं भेदः । यदपीदमुद्भावितम् – बहिर्भावो गृहाभावेनानुमीयत इति, तदतिमन्दम् नहि गृहाभावमात्रं लिङ्गम्, मृतेष्वपि दृष्टत्वात् । नच जीवनविशिष्टम्, जीवनस्य प्रथममवगमप्रसङ्गात्; विशेषणभूतं च गृहेऽविद्यमानत्वाद् बहिः संबन्ध्येव सद्गम्यम्; अतो लिङ्गावगमसमय एव बहिर्भावस्यावगमान्न गम्यमवशिष्यते । यद्यर्थापत्तिगम्यस्यानुमानेनाप्यवगन्तुं शक्यत्वात्तदन्तर्भावः, तर्हि दृष्टस्वलक्षणस्यानुमानस्य प्रत्यक्षेणाप्यवगन्तुं शक्यत्वादतिप्रसङ्गः; अतः सामग्रीभेदाद्भेद इति सर्वं समञ्जसम् ॥

अत्र केचित् – पीनो देवदत्तः, दिवा न भुङ्क्ते – इति श्रुतार्थापत्तौ–रात्रौ भुङ्क्ते इति शब्द एव कल्प्यत इति – वदन्ति । तथाहि – पीनत्वानुमितं भोजनं दिवा निषिद्धं रात्रिभोजनकल्पनया शब्द-संजल्पितया सविकल्पिकया शाम्यतीति शब्द एव प्राथम्यलाघवाभ्यां कल्प्यते, कल्पितेन तेनोपस्थापितादर्थादनुपपत्तिशान्तेः; नन्वेवमैन्द्रिय-कसविकल्पकज्ञानेऽपि प्राथम्यलाघवाभ्यां शब्दस्यैव कल्पनयाऽ-नैन्द्रियकत्वप्रसङ्गः, नैवम्; तिर्यगादिषु शब्दशून्येष्विन्द्रियस्यार्थ एव शक्त्यवधारणान्न शब्देऽपि सामर्थ्यकल्पनं युक्तम् । अथ दृष्टार्थापत्तावर्थ एव शक्तिः क्लृप्तेति नात्रापि शब्दः कल्पनीयः, नैवम्; तत्राप्युपपादकेऽर्थे शक्तिकल्पनम्, नार्थमात्रे; अत्र शब्द एवोपपादक इति शब्द एव श्रुतार्थापत्तौ कल्प्यः । अत एव विश्वजिदादौ स्वर्गकामपदाध्याहारः, द्वारम् इत्यादौ संव्रियताम् इति पदाध्याहारः; ऊहेऽपि 'सूर्याय जुष्टं निर्वपामि' इति शब्द एव कल्प्यते, तथाऽनुषङ्गेऽपि । अपि च पचत इति प्रयुक्ते ओदनादिपूरकपदाश्रवणे प्रत्यक्षौदनेनानुपपत्तिशान्तिः स्यात्; नच तथा दृश्यते, तस्माद्वाक्यगतानुपपत्तेस्तत्पूरकशब्द एव कल्पनीय इति । एतदेवाभिप्रेत्य भाष्यकारेण "दृष्टः श्रुतो वा" इति श्रुतपदं प्रयुक्तमिति ।।

तदिदमनुपपन्नम्; श्रुतार्थापत्तावप्यर्थ एव कल्पनीयः, न शब्दः; शब्दविशिष्टसविकल्पके तद्विशिष्टोऽर्थ एव वेद्यः । ननु न शब्दस्यापि वेद्यत्वम्; तस्य स्मृतिसमारूढत्वात्, अतोऽत्र शब्दविशिष्ट-कल्प्याभिनिवेशोऽप्यर्थस्यैव कल्प्यत्वम्, न शब्दस्यापि; अतो न शब्देन कल्पितेनानुपपत्तिशान्तिः । अथ बोधकावस्थशब्दस्य कल्प्य-त्वादनुपपत्तिः शाम्यतीति चेत्, नैवम्; तत्रापि प्राप्ताप्राप्तविवेकेनार्थ-स्यैवानुपपत्तिशमकत्वम्, न शब्दस्य । किंच अर्थपरावस्थस्य कल्पनेऽर्थे शब्दे च शक्तिकल्पनमिति गौरवप्रसंगात् वरमर्थमात्रस्यैव कल्पनम् ।

अपिच दृष्टार्थापत्तेरुपपादकार्थमात्रे शक्तिर्दृष्टा; श्रुतार्थापत्तौ तूपपादकबोधकशब्दे शक्तिकल्पनमिति वैरूप्यमप्यसांप्रतम् । किंच अन्यत्र सविकल्पके स्मृत्यारूढशब्दो दृष्ट इत्यत्रापि तथाविधस्यैव कल्पनाप्रसङ्गः, न मितिस्थस्य; एवं च विश्वजिदादावप्यर्थासद्भावाद्वाक्यार्थापरिपूर्तिरित्यर्थ एव तत्रापि कल्प्यः ॥

यत्तूक्तमूहादौ शब्दकल्पना दृष्टेति, सत्यं दृष्टा; तत्र साक्षाच्छब्द एवोपपादकः, नतु शब्दस्योपपादकबोधकत्वम् । तथाहि – आभिधानिकं प्रकाशकं प्रकृतौ मन्त्राणां कार्यतया क्लृप्तम्; अतो विकृतावपि तत्कार्योपपत्तये सूर्यायेति शब्दप्रक्षेपो युक्तः । एवमनुषङ्गेऽपि । यत्पुनरेतदभिहितं पचतीत्युक्ते प्रत्यक्षसिद्धस्यौदनस्यान्वयेनानुपपत्तिशान्तिप्रसङ्ग इति, तच्च नैवम्; तत्र विवक्षावधारणाभावादनन्वयः, न शब्दाभावात् । अतोऽवधारितायामन्वयोऽस्त्येवेति सर्वमुपपन्नम् ॥

इति नन्दीश्वरस्य प्रभाकरविजये अर्थापत्यनुमानवैषम्यसमर्थनम् ॥

---

(१४) अभावप्रमाणनिरास प्रकरणम् ।।

इदानीमभावाख्यं प्रमाणं निराक्रियते । 'नास्ति' इति व्याहारव्यवहारौ प्रमाणान्तरमन्तरेण नोपपद्येते इति चेन्न, भूतलादिविशेषादेवोपपत्तेः । ननु च 'नास्ति' व्यवहारस्य 'अस्ति' व्यवहारविषयभूतं भूतलं नावलम्बनम्, 'अस्ति नास्ति' व्यवहारयोरेकविषयताप्रसङ्गात्, नैवम्; अभावाख्यं प्रमेयमस्तीति वादिनाऽपि तदभावस्य 'अस्ति' व्यवहारविषयत्वमङ्गीकृतम्; इतरथाऽभावाभावस्य नास्तित्वप्रसङ्गात्; ततश्चाभावेऽपि नास्तिव्यवहारे विषयो न स्यात् ।।

अथ यद्यप्यभावस्य स्वापेक्षया 'अस्ति' व्यवहारविषयत्वम्, तथापि घटापेक्षया 'नास्ति' व्यवहारविषय इति, एवं तर्हि भूतलमपि स्वापेक्षया 'अस्ति' व्यवहारविषयः, घटापेक्षया 'नास्ति' व्यवहारविषय इति किं तत्त्वान्तराभ्युपगमेन? भूतलमात्रस्य विषयत्वात् । ननु तर्हि कः केवलपदार्थः? यदि भूतलमेव, तर्हि घटवत्यपि प्रसङ्गः; अथ ततोऽन्यत्, अङ्गीकृतं तर्हि तत्त्वान्तरम् । अथैकाकि भूतलमिति चेत्, ऐकाकि चासहायमिति सहायाभावाङ्गीकारप्रसङ्गः । अथ स्मर्यमाणेऽपि प्रतियोगिनि भूतलमेवाऽऽलम्बनम्; गृह्यमाणे तु स्मरणाभावादेव न 'नास्ति' व्यवहारः, एवं तर्हि देशान्तरस्थे गृह्यमाणे देशान्तरे तदभावव्यवहारो न स्यात् । अथ तत्रापि देशान्तरसम्बन्धिरूपस्य प्रतियोगित्वात्तत्संबन्धितया स्मरणासंभवान्नास्ति व्यवहारो न स्यात् । अथ जिज्ञासिते प्रतियोगिनि भूतलमालम्बनम्; सघटे तु प्रतियोगिनो ज्ञातत्वान्न जिज्ञासेति, नैवम्; प्रिये पुत्रादौ ज्ञातेऽपि पुनर्ज्ञानेच्छासंभवात् व्यवहारप्रसङ्गात् । जिज्ञासायाश्च विलक्षणव्यवहारहेतुत्वं विलक्षणार्थज्ञानहेतुतया । दृष्टम्, अतो घटजिज्ञासायां 'नास्ति' व्यवहारहेतुत्वं भूतलातिरिक्तघटाभावपरिच्छेदेनैव भवतीत्यङ्गीकृतं तत्त्वान्तरम् ।।

अथ तदतिरिक्तसामग्रीविशिष्टं भूतलमालम्बनम् । सघटे तु तदभावाच्च प्रसङ्ग इति, किमिदं तदतिरिक्तत्वम् ? यदि ततोऽन्यत्वम्, तर्हि संसृष्टावस्थायामपि तत्संभवात् 'नास्ति' व्यवहारप्रसङ्गः; यदि तदभावः, स्वीकृतमेव तर्हि तत्त्वान्तरत्वम् । अतोऽप्येतद्भूतलमात्रविज्ञानं न कारणम्, अपि तु भूतलबुद्धिविशेषः । स च संसृष्टबुद्धेर्विलक्षण एव; नचाप्यभावज्ञानम्, अभाववादिभिरभावज्ञानकारणत्वेन विलक्षण-बुद्धेरङ्गीकारात्; अतो यस्याभावज्ञानोत्पादकत्वमङ्गीकृतम्, तेनैव व्यव-हारोऽस्त्विति, नैवम्; अभावज्ञानोत्पादकस्य ज्ञानस्य न भूतलातिरिक्त-विषयत्वम्; भूतलमात्रविषयत्वेऽपि न संसृष्टावस्थायामभावज्ञान-जनकत्वम्, सहकारि वैकल्यात्, घटानुपलब्धिस्तु सहकारिणी, तेनानुपलब्धिविशिष्टं भूतलमात्रज्ञानप्रभावज्ञानोत्पादकम् । एवं तर्हि तदेव व्यवहारकारणमस्त्विति चेत्, नैवम्, विषयवैलक्षण्याभावत् ॥

तथाहि – भूतलमात्रस्यैवानुपलब्धिसहकारिसमवधानाज्ज्ञानान्त-रोत्पादकत्वमुपपद्यते, यथैकस्यैव घटस्य चक्षुस्पर्शनभेदाज्ज्ञानभेदः; अतः संसृष्टबुद्धिविलक्षणबुद्ध्युत्पादादभावज्ञानहेतुत्वमुपपद्यते; तव तु भूतलमात्रज्ञानादनुपलब्धिसहकृताद्विलक्षणव्यवहारो नोपपद्यते, विलक्षणव्यवहारस्य विलक्षणविषयकृतत्वेन दृष्टत्वात्, यथा घटपटव्यवहारयोः । अतोऽभावज्ञानकारणेनैवाभावव्यवहार इति न प्रतिबन्दिसिद्धिः ॥

अत्रोच्यते – नास्तिव्यवहारस्य नास्ति-ज्ञानकारणकत्वेऽपि-नास्ति-ज्ञानस्य कारणत्वेन तन्मात्रबुद्धिरभाववादिनाप्यङ्गीकृता; सा च संसृष्ट-ज्ञानादभावविशिष्टज्ञानाच्च विलक्षणत्वेनाङ्गीकृता; तदुक्तम्–

"गृहीत्वा वस्तुसद्भावं स्मृत्या च प्रतियोगिनम् ।
मानसं नास्तिताज्ञानं जायतेऽज्ञानपेक्षया ।।" इति

अतो वस्तुसद्भावग्रहणरूपतन्मात्रबुद्धिस्वसंवेदनादेव विलक्षण-व्यवहारोपपत्तिः; अतो न घटवत्यपि प्रसङ्गः, तत्र विलक्षणतन्मात्र-बुद्धेरभावात् ॥

यद्यपि कारणभेदाद् भेदः; तथापि विषयकृत एव भेदो व्यवहारहेतु-रिति चेत्, सत्यम्; विलक्षणतन्मात्रबुद्ध्यङ्गीकारादेव तद्विषयस्यापि वैलक्षण्यमवश्याङ्गीकार्यम् विषयविषयिभावस्य भेदात् । अतो विल-क्षणव्यवहार उपपद्यते । यथा विलक्षणतन्मात्रबोधाद्विलक्षणाभाव-ज्ञानोत्पत्तिः, तथा विलक्षणव्यवहारोऽस्माकमिति न दोषः ॥

यत्तूक्तम् – कारणभेदमात्रेण ज्ञानभेदे न विलक्षणव्यवहारो दृष्टः, यथाचाक्षुषस्पार्शनयोरेकविषययोः – इति, तदतिमन्दम्, चाक्षुषपट-ज्ञानात् शुक्लः पटः इत्यपि व्यवहर्तुं शक्यते, स्पार्शनात्तु - मृदुः पटः – इति, अतस्तत्रापि विलक्षणव्यवहार इति । किञ्च विलक्षण-व्यवहारो विलक्षणार्थपरिच्छेदादित्यपि मन्दम्; घटाभावो नास्ति, घटो नास्ति – इति विलक्षणव्यवहारयोरभावमात्रपरिच्छेदानिबन्धनत्वे-नानैकान्तिकत्वात् । अथ तत्रार्थैक्याद् व्यवहारवैलक्षण्यमेव नास्तीत्युच्यते, एवं तर्हि – भूतलमस्ति, घटो नास्ति – इति व्यवहारयोरप्यर्थैक्याद् वैलक्षण्यं न स्यात् ॥

नन्वस्माकं प्रतियोगिजिज्ञासायां तन्मात्रधियो विशेषः, जिज्ञासा-याश्च विलक्षणव्यवहारहेतुत्वं विलक्षणार्थपरिच्छेदादेव; अतो विलक्षणाभावज्ञानाङ्गीकारप्रसङ्गः? नैवं जिज्ञासायाश्च व्यवहारहेतुत्वम्, किंतु तन्मात्रबुद्धिविशेष एव व्यवहारहेतुः । केचित्तन्मात्रबुद्धिविशेषाः प्रतियोगिजिज्ञासानन्तरभाविनः, केचिच्च नेति, ये च प्रतियोगिजिज्ञासा-नन्तरभाविनो विशेषाः, ते व्यवहारहेतवः । प्रतियोगिजिज्ञासा चात्रोपलक्षणकोटिनिविष्टा, न व्यवहारकारणम्, भवतामपि प्रतियोगि-

जिज्ञासाया अभावज्ञानहेतुत्वं नास्ति, किन्तु तत्कारणभूततन्मात्रबुद्धावुपलक्षणत्वमेव, वस्तुसद्भावग्रहणं प्रतियोगिस्मरणं च कारणमित्युक्तत्वात् ।।

यत्तूक्तम् – प्रिये ज्ञातेऽपि पुनर्ज्ञानेच्छा संभवति, अत उपलक्षणत्वेऽपि व्यभिचार इति, तद्भवतामपि समानम् । तथाप्युच्यते– न प्रतियोगिजिज्ञासामात्रमुपलक्षणम्, किंतु अन्यत्र ज्ञायमाने प्रतियोगिनि जिज्ञासेति विशेषितव्यम्, अतो न कश्चिद्दोष इति ।।

ननु भवतां तन्मात्रबुद्धेः किं कारणम्? न चैकं नियतमुपलभ्यते, क्वचिन्मुद्गरप्रहारः, क्वचिद्विभक्तो घटः, क्वचित्कपालमाला, क्वचिच्चूर्णीभूतोऽवयवः, क्वचिच्च देशान्तरस्थितिः; 'अतोऽनियतहेतुकत्वादहेतुकमेव तन्मात्रज्ञानम्; अस्मन्मते त्वभावोऽभावज्ञानकारणमिति,

मैवम्; भवतामप्येकत्र प्रागभावः, अन्यत्र प्रध्वंसाभावः, अपरत्रेतरेतराभावोऽभावज्ञानहेतुरित्यनियतहेतुत्वमपि सममेव । अथ घटप्रतियोगिकाभावत्वेनैकत्वेऽप्यवान्तरभेदं कल्पयित्वा कारणभेदः समर्थ्यते, तर्ह्यस्माकमपि घटतन्मात्रबुद्धिरूपेणैकत्वेऽप्यवान्तरभेदः कल्प्यताम् । अथ न जातिभेदः – अभावानामेव कारणभूतानां भावविरोधित्वेनैकत्वमेव, तर्हि भावानामप्यनेकेषामभावविरोधित्वेनैकत्वेनाभावविज्ञानं व संभवति ।।

योग्यानुपलब्धिर्हि कारणत्वेनाभिमता; तस्याश्च सत्तया कारणत्वम्, ज्ञायमानतया वा । न तावज्ज्ञायमानतया, तस्या अप्यभावत्वेनानुपलब्ध्यन्तरग्रहणप्रसङ्गेनानवस्था प्रसङ्गात्; न च सत्तया हेतुत्वम्, तदभावेऽप्यभावज्ञानदर्शनात् । उपलभ्यमानेऽपि देवदत्ते – प्राङ् नासीदयमिह – इति दर्शनानुपलम्भादेवानुपलम्भो निरस्तः ।।

ननु प्रत्यक्षोपलम्भात्प्रत्यक्षानुपलब्धिमात्रस्यैव निरासः, नानुपलब्धिमात्रस्य; अतस्तत्र तत्स्मृत्यनुपलम्भस्य संभवादभावज्ञानमिति, नैवम्; तस्याप्यभावेऽप्यभावज्ञानदर्शनात् । तथाहि – मध्यन्दिने दृष्टो देवदत्तः – प्रातर्नास्त्येवायमिह - इति सायंबुध्या तत्र तदा मध्यन्दिन-स्मृत्या स्मृत्यनुपलम्भो निरस्तः, सायं ग्रहणेनैव ग्रहणानुपलम्भोऽपि निरस्त एव; अतोऽनुपलब्धिमात्रस्यैव व्यभिचारान्न सत्तया हेतुत्वम् ।।

अथोपलम्भात्तत्कालीनानुपलम्भबाधः, न प्रातरनुपलम्भस्य; अतः प्रातरनुपलब्ध्या प्राङ्नासीदिति नास्तित्वं गृह्यते, तन्न; उपलम्भकत्वेन तत्प्रागभावरूपानुपलम्भोऽप्येक एव; अत उपलम्भे जातेऽनुपलम्भमात्रस्य नाशः; प्रातर्वर्तित्वोपाधिरपि प्रातर्नाशादेव (नष्टः); अतो यावदुपलम्भक्षणं प्रसक्तः प्रागभाव उपलम्भादेव नश्यति; इतरथा प्रध्वंसेऽपि मुद्गरप्रहारकालीन एव घटो नष्ट इति पूर्वकालीनो घटोऽनुवर्तेत; नचैतद्दृष्टमिष्टं वा ।।

ननु यद्यप्युपलम्भोदयादनुपलम्भनिरासः; तथापि प्रातरुत्पत्तियोग्योपलम्भस्याप्यनुत्पन्नत्वात्तदनुपलम्भो वर्तते; ततोऽभावग्रहणमस्त्विति, नैवम्; नित्यतुच्छत्वात्तस्योपलम्भस्य तत्प्रतियोगिकोऽप्यनुपलम्भो नास्ति ।।

तथाहि – नच तस्य प्रातरुत्पत्तिः, नच पूर्वम्, नच पश्चादित्युपलम्भजातीयत्वमेव तस्य नास्ति; अतोऽनुपलम्भस्य सत्तया कारणत्वमपि दूरोत्सारितमेव । अतोऽभावाख्यं प्रमाणान्तरं नास्तीति सिद्धम् ।

इति नन्दीश्वरस्य प्रभाकरविजये अभावनिराकरण-

प्रकरणम् ।

———

(१५) अथ सत्तासामान्यनिराकरणप्रकरणम् ॥

इदानीं सत्तासामान्यं निराक्रियते* । नहि द्रव्यगुणकर्मसामान्येषु द्रव्यगुणकर्मसु वा–सत्–इत्यनुवृत्ताकारप्रतिपत्तिः । नन्वनुवृत्तिप्रत्यय-मन्तरेणैकशब्दप्रयोगो नोपपद्यते तथाहि-नानाभूतेषु वृक्षघटलोष्टादिषु-सत् सत्–इत्येकशब्दप्रयोगो दृश्यते; एकशब्दप्रयोगस्त्वेकनिबन्धन-मन्तरेण नोपपद्यत इत्यर्थापत्त्याऽनुमानेन वा एकनिबन्धनत्वे सिद्धे तत्प्रतीतिपूर्वकत्वमेकशब्दप्रयोगस्य, नैवम्, व्यभिचारित्वात्, एको हि गोशब्दः सास्नादिमति भूमौ रश्म्यादौ च ॥

गोशब्दस्य भिन्नशब्दशक्त्यैव वृत्तिः, एकत्र गृहीतसंबन्धस्यान्यत्र प्रयोगाभावात्; सच्छब्दस्य तु न प्रतिविषयं व्युत्पत्त्यपेक्षा गवादि-शब्दानामिव, तन्न, तथाप्यन्यथोपपन्नत्वात्; उपाधिरप्येकशब्दप्रयोगस्य कारणं भवत्येव; यथा पाचकः, वाचकः, मीमांसक इत्यादि । एवं तर्ह्युपाधिविशेषे वक्तव्यः । श्रूयताम्–क्वचिद् गुणयोगः शुक्लादिशब्देषु, क्वचिच्च क्रियायोगः पाचकादिशब्देषु; अत्र तु प्रमितिक्रियायोग एवो-पाधिः । अतश्च सर्षपमहीधरादिषु प्रयोगः; शशविषाणादिष्व-

---

* सत्तासामान्यानभ्युपगमे ब्राह्मणादिजातिव्यवस्था कथमुपपद्यते इति प्रश्नस्तु प्रकरणपञ्चिकायामेवं समाहितः । यथा– "अनयैव च दिशा ब्राह्मणत्वादिजाति-रपि निवारिता । नहि नानापुरुषव्यक्तिषु पुरुषत्वादर्थान्तरभूतमेकमाकारमात्म-सात्कुर्वन्ती मतिराविर्भवति । नहि क्षत्रियादिभ्यो व्यावर्तमानं सकलब्राह्मणेष्वनुवर्तमानमेकमाकारमतिचिरमनुसन्दधतोऽपि बुध्यन्ते । यदप्याहुः, यद्यप्यापातसंजातया धिया ब्राह्मण्यं नावसीयते; तथापि ब्राह्मणमातापितृसम्बन्धानुसन्धानप्रभवायां बुद्धौ तच्चकास्तीति, तदपि च स्वमानसविसंवादि । अनुसन्दधानोऽपि मातापितृसम्बन्धं को जात्वेकमाकारमवबोद्धुं प्रभवति ? यच्चोपदर्शितम् यथा विलीनमाज्यं

प्रयोगश्चेति नाव्याप्तिः । नन्वेवं भूतभविष्यतोरपि सत्त्वप्रसङ्गः, तयोरपि प्रमाणसंबन्धस्य विद्यमानत्वात् । सत्- इत्यत्र प्रकृतिमात्रस्योपाधिः, न प्रत्ययपर्यन्तस्य; भूतभविष्यतोरपि प्रकृत्यर्थो विद्यत एव, न वर्तमानप्रत्ययार्थः; अतो यस्य स्वरूपं वर्तमानं तत् वर्तते - इत्युच्यते, यस्य स्वरूपं विनष्टं तत् भूतम् - इत्युच्यते, यस्य स्वरूपमुत्पत्स्यते तत् भविष्यत् - इति त्रिधा व्यपदेशोपपत्तिः ॥

यत्तु निध्यादिषु प्रमाणाभावात्सदसत्सन्देहो न स्यादिति, तत्रापि यस्य कस्यचित्प्रमाणसंबन्धोऽस्ति नास्तीति सन्देह इत्युपेक्षणीयम्। ननु प्रमितिक्रियायोगः संविदि नास्ति; स्वयंप्रकाशत्वादेव; अतः संविदोऽसत्त्वप्रसङ्ग इति, नैवम्; यद्यपि संवित्स्वयंप्रकाशा, तथापि स्वयंप्रकाशत्वग्राहकप्रमाणसंबन्धोऽस्तीति नासत्त्वम्; परेण परसंविदनुमानाच्च ॥

ननु प्रमितिनानात्वेन नैकं निबन्धनमस्ति; तद्वरं भिन्नानामेव स्वरूपाणामुपाधित्वम्, नैवम्; यद्यपि प्रमितीनां स्वरूपतो नानात्वम्, तथापि प्रमितिसामान्यमेकमस्तीति तदेव निबन्धनमस्तु । प्रमितिसामान्यं नास्तीति येषां पक्षः, तेषामपि प्रमात्रैक्यनिबन्धनमेकत्वम्।

तैलादव्यतिरिच्यमानं गन्धग्रहणसहकारिणा चक्षुषैव भिन्नमवगम्यत इति, तदपि न सुन्दरम्; नहि तदानीं चाक्षुषस्य संवेदनस्य विषयातिरेकः, किं त्वनुमानमेव तत्र सर्पिषः; यस्तु निपुणदर्शी सूक्ष्ममपि रूपमीक्षितुं क्षमः, स चक्षुषैवाज्यमपि प्रत्येति, न गन्धग्रहणमपेक्षते ।

नन्वेनं बह्ववहीनम्, किंनिबन्धनो हि तदानीमाहवनीयादिसाध्यकर्मसु केषांचिदधिकारो नान्येषाम् ? किं निबन्धना च ब्राह्मणशब्दप्रवृत्तिव्यवस्था? अत्रोच्यते; अनादौ संसारे जन्यजनकभावेन व्यवस्थितास्तावत् काश्चिदेव पुरुषसन्ततयः सन्ति । तासामन्योन्यव्यतिरेकजाताः स्त्रीपुंसव्यक्तयो

प्रमातॄणामपि नानात्वादुपाधित्वं नोपपद्यत इति चेत्, नैवम्; प्रमातृत्वं हि जातित उपाधितो वा एकमिति निश्चितं सम्प्रतिपन्नं च; अतस्तेनैवैकत्वेन प्रमितीनामेकमिति न दोषः । सत्तासामान्याभ्युपगमे स्वरूपसत्ता हि स्वीकर्तव्या । वैशेषिकास्तु द्रव्यगुणकर्मसु सत्तासामान्यमिच्छन्ति, सामान्यविशेषसमवायेषु स्वरूपसत्त्वमेव; वार्तिककारीयाश्च द्रव्यगुणकर्मसामान्येषु सत्तासामान्यमिच्छन्ति, सत्तासामान्यस्य स्वरूपसत्त्वमेव; अतः सर्वत्र स्वरूपसत्त्वमेवास्तु, किमर्धजरतीयेन? किंच सत्तासामान्यं कुत्र वर्तते ? – इति पर्यनुयोगे स्वरूपेषु वर्तते – इति वक्तव्यम्; स्वरूपाणां किं सत्त्वम्, असत्त्वं वा? – इति विकल्पिते–सत्त्वमेव–इति वक्तव्यम्; अन्यथा शशविषाणादिष्वपि सत्तासमवायप्रसङ्गात् । अतः सत्तासामान्ययोगव्यतिरेकेणापि स्वरूपसत्त्वमङ्गीकर्तव्यम् । एवं च सति स्वरूपसत्त्वमेव

ब्राह्मणशब्दवाच्याः । अनिदम्प्रथमतया च सन्ततेः सर्वेषां तत्सन्ततिपतितत्वात् सिद्धा ब्राह्मणशब्दवाच्यता, तेन सन्ततिविशेषप्रभवत्वमेव ब्राह्मणशब्दप्रवृत्तावुपाधिः, तत्प्रभवानामेव कर्मस्वधिकार इति न किञ्चिदवहीनम् । के पुनस्ते सन्ततिविशेषाः? न ते परिगणय्य निर्देष्टुं शक्यन्ते, किन्तु लोकत एव प्रसिद्धाः प्रत्येतव्याः । तथाच तज्जन्यत्वेऽवगते ब्राह्मणशब्दं प्रयुञ्जते लोकाः ।

कथं पुनस्तज्जन्यत्वमेव शक्यमवगन्तुम्, स्त्रीणामपराधसम्भवात् ? संभवन्ति हि पुंश्चल्योऽपि स्त्रियः परिणेतारं व्यभिचरन्त्यः, उच्यते; उक्तमेतत् हृदयादर्शनमेवाभाव इति । यत्र यावदुपलब्धिसामग्री तावत्यां सत्यामपि यासां व्यभिचारो न दृश्यते, तासां नास्त्येव व्यभिचार इति लोकप्रमाणकमेतत् । अपिच अप्रमत्तैः स्त्रियो रक्षणीयाः, तासु च नास्त्येव व्यभिचारसम्भावनावकाशः; यासु त्वस्ति, मा भूत् तदपत्येषु तत्सन्ततिप्रभवत्वनिश्चयः । नचैतावता यत्रापि निश्चयः शक्यः, तत्राप्यनिश्चय इति युक्तमिति । यच्च

कृताकृतप्रसङ्गित्वादास्थेयम् । अतोऽनुवृत्तिप्रत्ययाभावादेव सत्तासामान्यं नास्तीति स्थितम् ॥

इति नन्दीश्वरकृते प्रभाकरविजये सत्तासामान्यनिराकण-प्रकरणम् ।

बह्वीषु ज्वालास्वेकवर्तिवर्तिषु ज्वालात्वं सामान्यं प्रत्यभिज्ञागोचरः कैश्चिदिष्यते, तदपि गुरुरस्माकं न गृष्यति । स खल्वेवं निरीक्षांचक्रे, अन्यथासिद्धा बुद्धिः सामान्यकल्पनाबीजम् । इयं तु भेदाग्रहणेन शुक्तिकारजतप्रत्ययवदुपपद्यत इति नालं सामान्यमुनुपस्थापयितुम् । तेन भेदाग्रहणपुरस्सरमभेदज्ञानं भिन्नेषु जात्यभ्युपगमे शरणमिति निरवद्यम्'' – इति ।

(१६) अपौरुषेयत्व प्रकरणम् ।।

सम्प्रति वेदवाक्यानामपौरुषेयत्वं साध्यते । प्रमाणं चार्थापत्तिरनुमानं वा । अतीन्द्रियार्थप्रतिपादकत्वमपौरुषेयत्वं विना नोपपद्यत इत्यर्थापत्तिः । अनुमानं तु वेदवाक्यान्यपौरुषेयाणि, अतीन्द्रियार्थप्रतिपादकत्वात्, यदित्थं न भवति तत्तथा न भवति; यथा भारतादि- इति । नच सुरभि गगनकुसुममिति वचनेऽनैकान्तिकत्वम्; अपसिद्धान्तप्रसङ्गात्, प्रतिवादिनापि तादृशस्य प्रतिपादकत्वानभ्युपगमात् प्रसङ्गापादनमपि न भवति स्वपक्षसाधनत्वपरपक्षासाधनत्वपरपक्ष दूषणत्वाभावात् । अत्र च न स्वपक्षसाधनत्वम्; नाप्यसिद्धत्वाद्युद्भावनम् । नच योगीश्वरेन्द्रियविषयतयाऽन्यतरासिद्धत्वम्; अस्मदादीन्द्रियाभिप्रायेणातीन्द्रियार्थत्वम्, तद्व्यतिरिक्तस्यैन्द्रियत्वासिद्धेः । रूपादिनियतविषयं हीन्द्रियम्; तयोरपि तथाविधेन्द्रियेण नासिद्धत्वम् । नच मन्वादिष्वनैकान्तिकत्वम्; तेषामतीन्द्रियार्थप्रतिपादकत्वाभावात्, श्रुतिमूलत्वेन तदनुवादकत्वात्, अत एव परमाण्वादिप्रतिपादकं वाक्यं न प्रतिपादकम्, अनुमानसिद्धार्थानुवादकत्वात् । न च भागासिद्धताऽनुवादिषु, वेदवाक्यस्यैव पक्षीकृतत्वात् । हुमादीनामार्थाभावेन न पदत्वं वाक्यत्वं च; न चानध्यवसितत्वम्, पक्ष एव वर्तमानत्वेऽपि केवलव्यतिरेकित्वात्, व्यतिरेकित्वे सपक्षाभावात् । नच गगनादिः सपक्षः, नित्यत्वापौरुषेयत्वयोर्भेदात्, उच्चारणपूर्वकोच्चारणं ह्यपौरुषेयत्वम्; नच भारताद्यद्यतनवाक्यस्यापौरुषेयत्वम्, साक्षाद्वा परंपरया वा तस्योच्चारणपूर्वकत्वाभावात् ।।

नच वाक्यत्वादिति हेतुना कालात्ययापदिष्टत्वम्, तस्य सामान्यविषयत्वेन विलम्बितत्वादस्य च वेदैकविषयत्वात् । नच व्यतिरेकित्वेन विलम्बः, अन्वयव्यतिरेकिण्यपि व्यतिरेकस्य विद्यमानत्वात् ।।

नापि पौरुषेयत्वमपि साधयितुं शक्यम्, विकल्पासहत्वात् । किमस्मादादिपुरुषकृतत्वम्, आहोस्विद्विलक्षणकृतत्वम् ? अस्मदादिकृतत्वेऽपसिद्धान्तः विलक्षणकृतत्वे दृष्टान्तः साध्यविकलः । नचोभयानुगमेन पुरुषमात्रकृतत्वं साध्यम्, उभयाभावात् । नाप्येतेनैवानुमानेन विलक्षणसिद्धेरनुगतत्वसिद्धिः, इतरेतराश्रयत्वात्; विलक्षणपुरुषसिद्धौ तदनुगतपुरुषकृतत्वं साध्यं तत्सिद्धौ विलक्षणपुरुषसिद्धिरिति । नचेश्वरानुमानेन विलक्षणसिद्धिः, तत्रापि विकल्पस्य समानत्वात्; अस्मदादिकर्तृकत्वे साध्येऽपसिद्धान्तः, विलक्षणकर्तृकत्वे साध्यविकलः, उभयानुगतकर्तृकत्वमात्रत्वे साध्येऽन्योन्याश्रयत्वमिति ।।

ननु सर्वत्रादृष्टस्वलक्षणमनुमानमुच्छिद्येत, तत्राप्येवं विकल्पस्य संभवात् । उच्छिद्यतां काममिति वार्तिककारीयाः । नच प्राभाकारणां क्रियाशक्त्यादिष्वेवं विकल्पप्रसंगः, लोकक्लृप्तकारणजातीयस्वभावानतिक्रमेण कारणत्वाभ्युपगमात् । अतीन्द्रियस्य कारणत्वं न दृष्टमिति चेन्न; अदृष्टादीनां कारणत्वाभ्युपगमात् । अत्र तु कुलालादयः शरीरद्वारेण कर्तारः, अदृष्टाधीनाश्च, अनित्येच्छाज्ञानादियुक्ताश्च; विलक्षणस्त्वशरीर्येव कर्ता, नाप्यदृष्टाधीनः, नित्येच्छाज्ञानादियुक्तश्च; अतोऽत्यन्तापरिदृष्टस्वरूपत्वान्न विलक्षणस्य क्रियाशक्त्यादिसाम्यम् ।।

किं च पौरुषेयत्वं नाम? यदि वर्णोत्पादकत्वम्, तर्हि साध्यविकलता; नित्यत्वाल्लोके वेदे च वर्णानाम्; अथवा वाक्यक्रमोऽनुवादकत्वम्; तर्हि सिद्धसाधनत्वम्, अध्येतॄणामप्युक्तत्वात् । उच्चारणमेव हि पदादीनामुत्पादनम्, नान्यत् ।।

अथ स्वतन्त्रपुरुषकृतत्वम्, तर्हि वेदभारतयोरन्यतरवाक्यस्य पौरुषेयत्वं न स्यात् । अथ स्वतन्त्रपुरुषपूर्वकत्वम् । किमिदं स्वातन्त्र्यं नाम? अथ यदि प्रमाणान्तरेणार्थं ज्ञात्वा तत्प्रतिपादकवाक्यरचनम्,

तर्हि अनाप्तवाक्यस्यापौरुषेयत्वं स्यात् । अथ प्रतीतिमात्रपूर्वकत्वम्, तर्हि विप्रलिप्सोर्वचनस्य न स्यात् । अथोच्चारणान्तरनिरपेक्षत्वं पौरुषेयत्वम्, तर्हि पुनरपि भारताद्यद्यतनवाक्यस्य न स्यात् । अथ साक्षात्परंपरया वोच्चारणनिरपेक्षत्वम्, तर्हि वेदविषयोच्चारणस्य भवत्पक्षे उच्चारणान्तरपूर्वकत्वाभावात् प्रत्यक्षादिमूलत्वं वाच्यम् । एवं च सति भेदार्थविषये प्रत्यक्षाद्यभावात् कारणाभावे कार्याभावानुमानबाधाद् बाधितविषयत्वम् । योगीश्वरज्ञानपूर्वकत्वस्य संभवान्न कारणाभाव इति चेन्न, तथाविधप्रमाणासिद्धेः । अथानेनैवानुमानेन तदपि सिद्ध्यतीति चेन्न, इतरेतराश्रयप्रसङ्गात् । किंच पौरुषेयत्वानुमानस्य प्रवृत्तिरेव न सिध्यति । सिध्यति चेत्सन्दिग्धेभ्यो ह्यर्थेभ्यः प्रवर्तेत; नच वेदकर्तरि सन्देहोऽस्ति, अनुपलब्धेरभावनिश्चयात्, शशमस्तके विषाणाभाव-निश्चयवत् । अथायोग्यानुपलब्धित्वेन वेदकर्तर्यनुमानं प्रवर्तेत; तर्हि-शशादिमस्तकं विषाणवत्, चतुष्पादात्मकत्वात्, गोमस्तकवत्-इत्यप्यनुमानं स्यात् । अथ वेदकर्तुरनुमानसिद्धत्वेऽपि परमाणुवदु-पलब्धियोग्यत्वं नास्ति, तर्हि शशमस्तकेऽप्यनुमानसिद्धं विषाणं परमाणुवदयोग्यं स्यात् । अथ विषाणजातीयस्य रूपवत्त्वमहत्त्वादि-दर्शनाच्छशमस्तकेऽपि प्रत्यक्षत्वम्, तर्हि वाक्यकर्तुरप्यस्मदादेः प्रत्यक्षत्वयोग्यत्वाद् वेदकर्तर्यपि प्रत्यक्षत्वमिति तुल्यचर्चः ॥

एवं वाऽनुमानम् – अपौरुषेयो वेदः, पौरुषेयविवादास्पदत्वात्, यदित्थं न भवति न तत्तथा, यथा भारतादि । न च प्रकरणसमत्वम्; पौरुषेयत्वसाधनदशायां सपक्षासद्भावेनायमेव हेतुरनध्यवसित इति । न च वाक्यत्वादित्यादिना कालात्ययापदिष्टत्वम्, पूर्वोक्तदोष-प्रसङ्गात् ॥

न च वादिविप्रतिपन्नत्वेन संशयहेतुत्वम्, अनुमानसामग्रीत्वेन हेतुत्वात् । न च विप्रतिपत्तिमात्रेऽतिप्रसङ्गः; पौरुषेयापौरुषेयविवादा-

स्पदत्वेनेतिविशेषणात् । न साध्याव्यावृत्तिशंका; गगनादिषु विपक्षेष्व-पौरुषेयत्वस्य व्यावृत्तत्वात् । नच नित्यत्वमात्रमपौरुषेयत्वमित्युक्त-मेव । नचाप्रयोजकत्वशङ्का; केवलव्यतिरेकिलक्षणोपेतत्वे सोऽपि प्रयोजको भवतु । नचोभये प्रयोजकत्वे चान्यतरस्याप्रयोजकत्वम्। नचाप्रयोजकत्वस्य दूषणत्वमपि सम्मतम् ।।

एवं वानुमानम् – विवादाध्यासितं वेदाध्ययनम्, गुर्वध्ययनपूर्वकम्, वेदाध्ययनत्वात्, अधुनाध्ययनवदिति । भारतेऽप्येवं प्रसज्यत इति चेन्न; तत्र पौरुषेयत्वस्य भवतामपि सिद्धत्वादपसिद्धान्तप्रसङ्गात् । प्रसङ्गापादनमपि न भवति, स्वपक्षसाधनत्वाभावात् परपक्षदूषणत्वा-भावाच्च ।।

ननु किमस्मदध्ययनस्य गुर्वध्ययनपूर्वकत्वं साध्यते, तद्व्यतिरि-क्तस्य वा? प्रथमपक्षे सिद्धसाधनत्वम् द्वितीये चाश्रयासिद्धत्वम्; अतो नात्र संप्रतिपन्नो धर्मी विद्यते, नैवम्; सिद्धस्यैवाध्ययनविशेषस्या-स्मत्कर्तृकत्वेन विलक्षणकर्तृकत्वेन च विप्रतिपन्नस्य धर्मित्वमित्य-दोषः । याच पौरुषेयत्वानुपपत्तिरुक्ता, साच नैयायिकस्येश्वरसिद्धौ, बौद्धस्य सर्वज्ञत्वसिद्धौ, वेदान्तिनो ब्रह्मसिद्धौ च समैव; अन्यत्र परिकल्पनायास्तुल्यत्वात् । तदुक्तम्ः –

"सर्वज्ञकल्पनान्यै(द्यै)स्तु वेदे या पौरुषेयता ।
तुल्यवत्कल्पिता येन तेनेदं संप्रधार्यताम् ।।" इति ।

किं च अपौरुषेयत्वानङ्गीकारे ईश्वरसिद्धिर्न स्यात् । तथाहि – न तावत्प्रत्यक्षेण गृह्यते; अयोग्यत्वात्, नाप्यनुमानेन; तस्य कर्तृमात्र-विषयत्वात्, नापि पक्षधर्मतयाविशेषसिद्धिः; लोकस्वभावानतिक्रमेण विशेषमात्रापेक्षत्वात्, पर्वतगताग्निविशेषवत् । अत्रापि दृष्टस्वभावानु-गुणकर्तृविशेषस्य सिद्धिः पक्षधर्मतया, नतु दृष्टस्वभावविपरीतस्य ।

नाप्यागमेन कृतकेन, अन्योन्याश्रयप्रसङ्गात् – तद्वचनत्वे सिद्धे तदीयाम्नानम्, तदीयाम्नाने तस्य प्रामाण्यम्, तस्य प्रामाण्ये तत्सिद्धिरिति । नच परं नियोगमेकानभ्युपगमात् (?)

किं च ईश्वरस्य वेदकरणात् प्रागप्रमाणकत्वप्रसङ्गः; अपौरुषेयत्वे सिद्धे स्वर्गादि सिद्धिवदुपपद्येतापि । तदुक्तम् – "एवं चेश्वरे परोक्तमनुमानं निरस्तम्; नेश्वरो निरस्तः" इति । अतः सिद्धमपौरुषेयत्वं वेदस्य ॥

इति नन्दीश्वरस्य प्रभाकरविजये अपौरुषेयत्व-
प्रकरणं समाप्तम् ॥

———

(१६) स्वरूपभेदसमर्थन प्रकरणम् ।।

संप्रति स्वरूपभेदः समर्थ्यते । यदिदं द्रव्यगुणादीनामसाधारणं रूपं तद्व्यतिरेकेण भेदो नाम धर्मो नास्ति; स्वरूपमात्रेणैव भेदव्यवहारयोरुपपत्तेः । ननु यदि स्वरूपमात्रमेव भेदः; तर्हि स्वरूपमात्रदर्शनान्तरमेव भेदव्यवहारः स्यात्; न च तथा दृश्यते, सत्यं स्वरूपसमकालं भेदव्यवहारो नास्ति, तथापि स्वरूपातिरिक्तो भेदो नास्त्येव किंतु प्रतियोगिसापेक्षो भेदव्यवहारः; स्वरूपमात्रदर्शने तदभावान्न भेदव्यवहारप्रसङ्गः । ननु तर्हि प्रतियोगिसव्यपेक्षो भेदः, स्वरूपंतु प्रतियोगिनिरपेक्षमेव; कथमनयोरेकत्वम्? नैवम्; भेदस्तु न प्रतियोगिसव्यपेक्षः, किन्तु भेदव्यवहार एव; अत एव निर्विकल्पके प्रतियोगिज्ञानाभावादेव भेदव्यवहाराभावः । तर्हि को भेदव्यवहारविषयः? स्वरूपमात्रमेवेत्युक्तम् । नचैतावता स्वरूपदर्शनमात्रेण भेदव्यवहारप्रसंगः, भेदस्तु स्वरूपतन्त्रमेव; नहि स्वरूपमात्रं भेदः । यथा देवदत्तः पित्रपेक्षया पुत्रः, न नु देवदत्तमात्रं पुत्रः; अथ देवदत्तव्यतिरिक्तोऽपि न भवति पुत्रः ।।

ननु किमनया क्लिष्टकल्पनया? भेदस्तावदयमस्माद्भिन्नः – इति प्रत्यक्षेण प्रतीयत एव, सत्यं प्रतीतिरस्ति । नच स्वरूपादिवत् द्रव्यधर्मत्वमुपपद्यते, द्रव्यगुणादिष्वनन्तर्भावात्, गुणादिवृत्तित्वात् । न च पदार्थान्तरत्वकल्पनमुचितम् । भेदप्रतीतिव्यवहारयोः स्वरूप मात्रालम्बनत्वेनोपपद्यमानत्वात् ।।

ननु तर्हि स्वरूपाणामानन्त्याद्भेदशब्दवाच्यमेकं न भवेत्, नैवम्, प्रतियोगिसव्यपेक्षं स्वरूपमित्यौपाधिकत्वेनैकत्वोपपत्तेः ।।

ननु प्रतियोगिसव्यपेक्षं स्वरूपं भेद इत्युक्तम्; केयं प्रतियोगिसव्यपेक्षता नाम? यदि स्वरूपमात्रमेव, तर्हि पूर्वोक्तो दोषः, अथ

धर्मान्तरं प्रतियोगिसव्यपेक्षत्वम्, तर्हि स एव भेद इति, अङ्गीकृतः स्वरूपातिरिक्तो भेदः, नैवम्; धर्मभेदवादिनां मिथ्याभेदवादिनां च भेदव्यतिरिक्तमेव प्रतियोगिव्यपेक्षत्वं नाम धर्मान्तरमङ्गीकर्तव्यम्, इतरथा घटस्वरूपमात्रेण तद्गतभेददर्शनादेकस्मिन्नेव भेदव्यवहार-प्रसङ्गात्; अथ संयोगादिवद्द्विशिष्टत्वाद्भेदस्य द्वयोर्दर्शन एव भेदप्रतीतिः, अथ संयोगादिवद्द्विशिष्टत्वाद्भेदस्य द्वयोर्दर्शन एव भेदप्रतीतिः नैवम्; घटाद्भिन्नः पटः – इति भेदव्यवहारः, न संयोगवद्द्विशिष्टतया, तत्राय-मस्मात्संयोगः – इति न कदाचिदपि प्रतीतिः; एवं संप्रतियोगिकत्वेन प्रतिपन्नस्य भेदस्य पश्चाद् व्यवहारमात्रमनयोर्भेद इति; तस्माद्भेद-व्यतिरेकेण प्रतियोगिसव्यपेक्षत्वं नाम सर्वभेदवादिभिरङ्गीकर्तव्यम्; तदपेक्षं स्वरूपं भेदव्यवहारकारणमस्तु, किमन्तर्गडुना भेदधर्मेण?

ननु धर्मवादिना प्रतियोगिसव्यपेक्षस्वभावत्वं धर्मस्याङ्गीकर्तु-मुचितम्, सर्वत्र तदपेक्षादर्शनात्, स्वरूपं तु न, प्रतियोगिनिरपेक्षस्यापि स्वरूपस्य कदाचिद्दर्शनात्; अतो न प्रतिबन्दिसिद्धिरिति, नैवम्; अत्रापि प्रतियोगिसव्यपेक्षत्वं न स्वरूपस्य स्वभावः, किंतु भेदव्यवहारस्य ।।

ननु विलक्षणव्यवहारो विलक्षणव्यवहार्यनिबन्धिनोऽपि दृष्टः, यथा घटव्यवहाराद्भेदिनो भिन्नोभेदः – इति व्यवहारः; तत्र विलक्षणो व्यवहारोऽस्ति, नतु विलक्षणं व्यवहार्यम्; अतोऽनैकान्तिको हेतुः, अभिन्नो भेदिनो भेद इत्यङ्गीकारे नामान्तरेण स्वरूपभेदवाद एव स्वीकृतः स्यात् । अथ तत्रार्थैक्याद्विलक्षणव्यवहारत्वमेव नास्ति, तर्हि–भिन्नो घटः – इत्यत्रास्मन्मतेऽर्थैक्याद्विलक्षणव्यवहारवैलक्षण्यमेव न भवेत्; अतः स्वरूपातिरेकेण भेदाङ्गीकारो न युक्तः ।।

ननु स्वरूपस्य प्रतियोग्यपेक्षा वक्तव्या; तत्र विकल्पनीयम् – किं स्वरूपाद्भिन्नः प्रतियोगी, किं वा अभिन्नः? इति; न तावदभिन्नः,

स्वयमेव स्वस्य प्रतियोगित्वप्रसङ्गात्, न च भिन्नः; भेदे सति प्रतियोगित्वसिद्धिः, प्रतियोगित्वसिद्धौ च भेदसिद्धिरितीतरेतराश्रयत्वम् । अथ भेदान्तरेण भिन्नः प्रतियोगी, तर्ह्यनवस्थाप्रसङ्ग इति, नैवम्; धर्मभेदवादिनोऽपि प्रतियोगिसव्यपेक्षत्वमस्त्येव; तत्राप्येवं विकल्पो दोषश्च समानः; यस्तत्र परिहारः, स एवात्रापि ।।

ननु स्वरूपभेदवादः प्रतीतिविरुद्धः । तथाहि – पटाद्भिन्नो घटः– इति विशेषणत्वेन भेदः प्रतीयते; भवतस्तु स्वरूपव्यतिरेकेण भेदाभावाद्विशेषणभूतोऽर्थो नास्त्येव; अतः – भेदो घटः – इत्येव व्यवहारः स्यात्, न – भिन्नो घटः – इति, नैवम्; – भेदिनो भिन्नो भेदः – इत्यत्र भेदव्यतिरेकेण विशेषणभूतो भेदो नास्त्येव, तथापि–भिन्नो भेदः – इति ।।

अथ भेदस्य भेदान्तराभावेऽपि प्रतियोगिसव्यपेक्षं स्वरूपं विशेषणम्, भेदमात्रं विशेष्यमिति; तर्हि - भिन्नो घटः - इत्यत्रापि प्रतियोगिसव्यपेक्षस्वरूपस्यैव विशेषणत्वम् स्वरूपमात्रस्य विशेष्यत्वमिति तुल्यचर्चः पाचकादिशब्दवत् । यथा – पाचको देवदत्तः – इत्यत्र पाचक-व्यक्तिष्वनुगतमेकं सामान्यं गुणो वा नास्त्येव, तथापि तटस्थभूतपचनक्रियोपलक्षितपाचकव्यक्तिषु पाचकशब्दो वर्तते; नहि पाचक-शब्दस्य पचनक्रियार्थः । एवं प्रतियोग्युपलक्षितस्य विशेषणत्वाङ्गीकारादेव प्रतीतिविरोधोऽपि नास्त्येव ।।

यत्तूक्तम् – भेदपटशब्दयोः पर्यायत्वप्रसङ्ग इति, तदपि – भिन्नो भेदः – इत्यत्रापि समानम्, तथाप्युच्यते – प्रतियोगिसव्यपेक्षरूपस्य भेदशब्द प्रवृत्तिनिमित्तत्वान्न पर्यायतेति ।।

अथोच्येत – भेदस्य विदारणात्मकत्वात्स्वरूपस्यैव विदारणात्मकत्वात्तदंशांशस्यापि तथैव प्रसङ्गाच्छून्यं जगदभविष्यदिति, नैवम्;

भेदस्य विदारणात्मकत्वेऽपि यस्माद्यस्य भेदव्यवहारः, तस्मात् तस्यैव विदारणात्मकत्वम्; नहि सर्वस्मात्स्वस्य भेदव्यवहार इति न तत्र विदारणात्मकत्वम्; अत उपेक्षणीयोऽयं पक्षः ॥

यदप्येतदुक्तम् – भेदस्य भेदान्तराभ्युपगमेऽपि नानवस्थादोषः, मूलभेदव्यवहारस्य भेदान्तरापरिज्ञानेऽपि विरोधाभावादिति; तच्च नैवम्, भेदस्य ज्ञायमानतया व्यवहारहेतुत्वात्; यत्र सत्तया हेतुत्वं बीजाङ्कुरादौ, तत्र नानवस्थादोषः, अत्रत्वाश्रयप्रतियोगिभ्यां भिन्नत्वेन ज्ञातो भेदो भेदव्यवहार हेतुः; अन्यथा ताभ्यां भेदस्य च भेदान्तरापरिज्ञाने वस्तुदर्शनमात्रेण सकलभेदव्यवहारप्रसङ्गः, भेदिनो भेदस्य भेदज्ञाने आश्रयधर्मयोर्भेदज्ञानस्यावश्यं भावित्वात्; तस्याप्येवमित्यनवस्था दुर्निवारैव ॥

यत्तु कैश्चिदुक्तम् – भेदस्य भेदान्तरापेक्षा नास्त्येव, परगतभिन्न-व्यवहारहेतुत्वात्; यत् परगतकार्यकारि तत् तथाभूते कार्ये न परमपेक्षते, यथा रूपं रूपव्यवहारे परिमाणं वा मानव्यवहारे; अतो भेदस्य भेदान्तरापेक्षा नास्त्येवेति, तर्हि सिद्धो नः पक्षः; भिन्नव्यवहाराः सर्वत्र भेदधर्मयोगिन इति त्वत्पक्षं परित्यज्य भेदस्वरूपमेव स्वस्मिन् भिन्नव्यवहारहेतुरित्युक्तं भवताऽपि; तदेवास्माभिरपि साध्यम्; सर्वत्र स्वरूपं स्वस्मिन् व्यवहारहेतुरित्यास्थेयम्; लाघवात् ॥

अथ रूपस्य व्यवच्छेदे रूपान्तरनिरपेक्षत्ववद्घटादयोऽपि स्वव्यवच्छेदं स्वयमेव कुर्वन्त्विति रूपापलापप्रसंग इति, नैवम्; यदि रूपव्यतिरेकेण रूपिबुद्धिः स्यात्, तदा रूपापलापोऽपि भवेत्, नहि कदाचिद्रूपमन्तरेण रूपिबुद्धिरस्ति; अत्र तु भेदमन्तरेणापि स्वरूपस्य कदाचिद् ग्रहणमस्तीति भवतैवोक्तम्; अतो यो धर्मभेदवादि-भिराश्रयोऽङ्गीकृतः प्रतियोगी वा, तस्मिन्नेवाऽऽश्रये तस्माद्भेदव्यवहारः प्रवर्तत इति किं प्रमाणशून्येन भेदधर्मेण?

यत्तूक्तम् – स्वरूपभेदवादिभिरुक्तेन दूषणेन धर्मभेदवादो दूषितः; धर्मभेदवादिभिरुक्तेन दूषणेन स्वरूपभेदवादो दूषितः; अतो भेदस्य प्रमाणासहिष्णुत्वाद् भ्रान्त एव । किंच विवादाध्यासितो भेदो मिथ्या, भेदत्वात्, द्विचन्द्रादिभेदवत्; विवादाध्यासितो भेदो मिथ्या, दृश्यत्वात्, रज्जुसर्पवत्; ''नेह नानास्ति किंचन'' इत्यागमाच्च प्रतीयमानस्य भेदस्य भ्रान्तत्वमवगम्यते; प्रमाणाभावाच्च, नहि प्रत्यक्षं भेदग्राहि, सन्मात्रविषयत्वात्तस्य; तन्मूलत्वादेव नानुमानादिकमपि भेदे प्रमाणम्–इति,

अत्रोच्यते – घटाद्भिन्नः पटः – इति प्रतीतिव्यवहारौ सर्ववादिभिरङ्गीकर्तव्यौ; अतः प्रतीतिबलसिद्धो भेदः कथमपह्नोतुं शक्यते? सत्यं प्रतीतिरस्ति, तथापि कारणाभावाद् भ्रान्तत्वमिति चेत्; नैवम्; प्रतीतिरेव हि कार्यभूता यथायोग्यं कारणमुपस्थापयति; नहि कारणादर्शनमात्रेण प्रतीतेरपलापो युज्यते, शून्यवादप्रसंगात् । तदुक्तं प्रकरणपञ्चिकायाम् – ''कार्यं हि प्रतीयमानं कारणकल्पानायां प्रमाणम्, न पुनः स्फुटावधारितकार्यकारणानिरूपणयाऽपन्यायमर्हति'' –इति।।

किंच एवमनङ्गीकारे सति सकलानुमानोच्छेदप्रसङ्गः; पर्वते धूमदर्शनमात्रेऽग्न्यदर्शनमात्रेण धूमप्रतीतेर्भ्रान्तत्वं न लाघवाद्भिद्यते; अतोऽनुमानोच्छेद एव । अथ धूमस्याग्निव्याप्त्यवगतेरग्न्यभावे सति क्लृप्तहानिरेव स्यात्; अतः क्लृप्तकल्पनमेव वरमिति पर्वतेऽग्निरस्तीति कल्प्येत; तर्हि कार्यमपि योग्येन कारणेन व्याप्तमिति भेदप्रतीतिकार्यदर्शनाद्योग्यमेव कारणमनुमास्यामहे ।।

ननु शुक्तिकारजतज्ञानेऽपि रजतज्ञानदर्शनात्तदनुगुणं कारणमपि कल्प्यत इति सर्वत्र भ्रान्तिर्न स्यात्, नैवम्; तत्रापि कार्यदर्शनाद्योग्यमेव कारणमनुमीयत एव, किंत्वबाधितकार्यदर्शनात्क्वचित्पुष्कलमेव

कारणमनुमीयते, क्वचित्तु बाधितकार्यदर्शनात् तद्योग्यस्य कारणदोषादेः परिकल्पनमिति सर्वत्र योग्यकरणानुमानमस्त्येव; अतो भ्रान्ताभ्रान्त-व्यवस्थाऽप्युपपद्यत एव । तदुक्तम्– "यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः, स एवासमीचीनः प्रत्ययो नान्यः"– इति । भेद-व्यवहारस्य तु न साक्षाद् बाधकमस्ति – नायं भेदः – इति । यौक्ति-कमपि बाधकं नास्त्येव, कार्यत एव कारणस्य कल्प्यमानत्वात् ।।

यत्तु पश्चाददद्वैतज्ञानेन बाधो भविष्यतीत्युक्तम्, तदपि नास्ति; उपनिषदां कार्यशेषतया प्रामाण्यवर्णनात्,* तासामद्वैतज्ञानजनकत्वा-सिद्धेः तथाविधबाधा न संभाव्यते; प्रमाणप्रमेयव्यवहारिणां तावद्भेदस्य बाधादर्शनेन तात्त्विकत्वमुपपद्यत एव ।।

यत्तु प्रत्यक्षं सन्मात्रग्राहि, न भेदग्राहीति; नैतदुपपद्यते; यदि सन्मात्रमेव गृह्यते, तर्हि – सन् घटः – इति प्रतीतिर्न स्यात्; अथ सत्ताव्यतिरेकेण घटोऽपि नास्त्येव, – तर्हि – सन् इति तत्प्रत्ययः स्यात्, न – सन् घटः – इति; सन् घट इति पर्यायत्वप्रसङ्गश्च ।।

अथ घटादावनुवर्तमानं सत्त्वमेव, अतश्चानुवृत्तमेव प्रत्यक्षम्; व्यावर्तमानत्वात् घटादिरप्रत्यक्ष एवेति; केयं राजाज्ञा – अनुवर्तमानमेव

* यद्यप्यत्रत्यग्रन्थस्वारस्येनाद्वैतमतविरोध्येव प्रभाकरसंप्रदाय इति गम्यते, कार्यविधिसम्बन्धप्रयुक्तमेव वेदान्तानां प्रामाण्यमिति वर्णनेन हि स्पष्टमिदं सूच्यते यत् सिद्धब्रह्मस्वरूपमात्रबोधने न वेदान्तानां तात्पर्यमिति; तथापि भूमिकायां निरूपितरीत्या कर्मप्रसङ्गेऽद्वैतमतनिरसनं कर्मठानां बुद्धिभेदाजन-नार्थमित्येवोरीकर्तव्यम्, नतु वस्तुगत्या भेदमिथ्यात्वादिनिरसने तात्पर्य-मिति । अतएव बृहतीगतम् – यत्तु ब्रह्मविदामेष निश्चयः, यत्तूपलभ्यते तदतथ्यमिति, यन्नोपलभ्यते, तत्तथ्यमिति, नमस्तेभ्यः, विदुषां नोत्तरं वाच्यमिति वाक्यमुपपद्यते । यथा चेदं नोपहासपरं तथा वाक्यान्तराणामपि पर्यालोचने

प्रत्यक्षमिति? यदिन्द्रियेण गृह्यते, अनुवर्तमानं व्यावर्तमानं वा तत्प्रत्यक्षमिति सर्वजनसिद्धम् ।

यत्तु भेदो मिथ्येत्यनुमानम्, तत्र वक्तव्यम् – यद्यन्यत्रामिथ्याभूतस्य द्वित्वस्य चन्द्रे मिथ्यात्वम्, तदा यत्रामिथ्याभूतो भेदः तेनानैकान्तिको भेदत्वादिति हेतुः; यदिवा सर्वत्र मिथ्याभूतत्वमभिप्रेत्य चन्द्रे मिथ्यात्वम्; तर्हि साध्यविकलो दृष्टान्तः, अन्यत्र घटादावमिथ्याभूतस्यैव चन्द्रमात्रे मिथ्यात्वाभ्युपगमात्; अनुमानान्तरेऽपि तथैव दोषः । अतो भ्रान्तिभेदवादोऽपि न युक्त इत्यलमतिप्रसंगेन ।।

इति नन्दीश्वरस्य प्रभाकरविजये स्वरूपभेदसर्मथनं नाम प्रकरणं समाप्तम् ।।

नियतं सिद्धं भवति । वाक्यान्तरं चात्रानुसन्धेयं भूमिकायामुल्लिखितमेव । सर्वथातु नाद्वैतसंप्रदायविरोधी प्रभाकरसंप्रदायः । व्यक्तमिदमग्र एव भविष्यति– यत्र 'न बुद्धिभेदं जनयेदि'ति न्यायमनुसृत्यैवाद्वैतमतनिरासः प्राभाकरैः क्रियते । अधिकं च भूमिकातोऽनुसन्धेयम् ।

(१८) ईश्वराऽनुमानिकतानिरास प्रकरणम् ॥

इदानीमीश्वरस्यानुमानिकत्वं निराक्रियते । केचिदेवमनुमानं वदन्ति– विवादाध्यासितम्, सकर्तृकम्, कार्यत्वात्, यत्कार्यं तत् सकर्तृकं यथा घटः, तथेदम्, तस्मात्तथा । अत्र सन्दिग्धकर्तृकं भूधरांकुरादिकं पक्षः, प्रसिद्धकर्तृको घटादिः सपक्षः, असिद्धकर्तृकमाकाशादि विपक्षः । न च कार्यत्वमसिद्धमिति वाच्यम्; सावयवत्वेन कार्यत्वस्य सिद्धत्वात् ॥

ननु विरुद्धो हेतुः, यत्कार्यं तच्छरीरिकर्तृकं दृष्टम्, यथा घटादिकं विग्रहवत्कुलालादिकर्तृकम्; एवं च कार्यत्वं शरीरिकर्तृकत्वमेव साधयति, भवतां चाशरीरिकर्तृकत्वं सिषाधयिषितम्; अशरीरिकर्तृकत्वविपरीतं शरीरिकर्तृकं घटादिकं विपक्षः; तत्र कार्यत्वस्य पक्षविपक्षयोरेव वर्तमानत्वाद्विरुद्धत्वम्, नैवम्; यद्यशरीरिकर्तृकत्वमेव साध्यम्, तदा विरुद्धत्वम् । अस्माकं तु सशरीरकर्तृकत्वाशरीरिकर्तृकत्वविशेषं परित्यज्य सकर्तृकत्वमात्रमेव साध्यम्; इतरथाऽग्निमत्त्वे साध्ये किं प्रत्यक्षाग्निमत्त्वमुताप्रत्यक्षाग्निमत्त्वमिति, विकल्पे, प्रत्यक्षाग्निमत्त्वे बाधितविषयत्वम्, अप्रत्यक्षाग्निमत्वे साध्यविकलतैवेति सकलानुमानोच्छेदप्रसङ्गः; अतः प्रत्यक्षाप्रत्यक्षविशेषपरिहारेणाग्निसत्तामात्रमेव साध्यमिति वक्तव्यम्, तथाऽत्रापि ॥

अथास्माकमपि धर्माधर्मद्वारेण क्षेत्रज्ञस्यैव कर्तृत्वात्सकर्तृकत्वमस्त्येवेति सिद्धसाधनता; नैवम्; क्षेत्रज्ञस्य धर्माधर्माद्यधिष्ठेयज्ञानासंभवात् कर्तृत्वमेव न संभवतीति तद्विलक्षणो धर्मादिसाक्षात्करणनिपुणः (कर्ताधिकरणसिद्धान्तन्यायापरपर्यायतया) पक्षधर्मतया विचित्रजगन्निर्माणचतुरः कर्ता सिद्धो भवति ॥

ननु विलक्षणस्यापि कर्तृत्वं नोपपद्यते, तस्यापि धर्माधर्मसाक्षात्करणाशक्तेः; तदशक्तिश्च चेतनत्वात् क्षेत्रज्ञवत् । नच तस्य प्रत्यक्षस्य धर्माधर्मविषयत्वम्, प्रत्यक्षत्वात् संप्रतिपन्नप्रत्यक्षवत् । न च तस्य बाह्येन्द्रियाणि धर्माधर्मगोचराणि, इन्द्रियत्वात्, अस्मदादीन्द्रियवत् । आन्तरमपि मनः करणं बहिरर्थे स्वतन्त्रं न भवति, अन्तःकरणत्वात्, अस्मदाद्यन्तःकरणवत्, नच तस्येच्छाज्ञानयोरपि नित्यत्त्वम्; इच्छाज्ञानत्वात्; अस्मदादीच्छाज्ञानवत्, नच तस्य विग्रहस्यापि नित्यत्वम्; भौतिकत्वात्, अस्मदादिविग्रहवत्, न तस्याभौतिको दिव्यो विग्रहः संभवति; विग्रहत्वात्, अस्मदादिविग्रहवत्, प्रयोजनरहितत्वात् नच तस्य कर्तृत्वम्; जगत्सृष्ट्यादिकमपि न तस्य संभवति; चेतनत्वात्, क्षेत्रज्ञवत्; इत्यादिभिर्हेतुशतैर्विलक्षणाङ्गीकारो निष्प्रमाणकः, अङ्गीकारेऽपि न तस्य जगन्निर्माणसामर्थ्यम् – इति ॥

ननु तदेतदश्रुतन्यायशास्त्राणां छान्दसानां वेदापौरुषेयत्वश्रद्धाविजृंभितम् । तथाहि-तदेतत्सर्वमनुमानजातं विलक्षणमेव परमङ्गीकृत्य उच्येत, अनङ्गीकृत्य वा? अङ्गीकृत्य चेत्, धर्मिग्राहकप्रमाणविरोधः सर्वेषाम्, अनङ्गीकृत्य चेत्, आश्रयासिद्धिः । अथ प्रसंगापादनमुखेनोक्तानां हेतूनामवकाशः, नैवम्; प्रसङ्गापादनमप्यनुमानमेव, किंत्वनुमानस्यैवोक्तिप्रकारभेदमात्रम्; अतस्तदङ्गीकारे तद्ग्राहकप्रमाणविरोधः, अनङ्गीकारे चाश्रयासिद्धिरिति तदवस्थमेव पूर्वोक्तं दूषणम् । किंच अन्त्यावयविप्रभृत्याऽऽद्व्यणुकमचेतनं कार्यं चेतनाधिष्ठितमेवोत्पद्यत इति निर्विवादम् । द्व्यणुकोत्पत्तिस्तु परमाणुक्रियातः; सा चादृष्टवदात्म संयोगात् भवति; अदृष्टं च चेतनाधिष्ठितमेव सत् कार्यकरम् ॥

तथाहि – विमतिपतितमेवं चेतनाधिष्ठितं सत् कार्यकरम्, अचेतनत्वात्, यद्यदचेतनं तत्तच्चेतनाधिष्ठितं कार्यकरं दृष्टम्, यथा वास्यादि,

तथाचेदम्, तस्मात्तथा । अधिष्ठेयस्वरूपशक्तिकार्यज्ञानवानधिष्ठाता भवतीति क्षेत्रज्ञादन्यो नित्येच्छाज्ञानादिमानधिष्ठाता पक्षधर्मता-बलात्सिद्धो भवति पर्वतगताज्ञाताग्निविशेषवत्; अतो न ज्ञानोत्पत्त्यर्थं शरीरेन्द्रियाद्यपेक्षा । न च ज्ञानस्य क्षेत्रज्ञज्ञानवदनित्यत्वप्रसङ्गः; पार्थिवाणुरूपादिकमनित्यं दृष्टमित्याऽऽप्यपरमाणुषु न रूपाद्य-नित्यत्वप्रसंगः । न च क्षेत्रज्ञगतादृष्टेन विलक्षणस्य संबन्धाभावः, विलक्षणसंयुक्तपरमाणुसंयुक्तक्षेत्रज्ञसमवेतत्वाददृष्टस्य संयुक्तसंयोगि-समवायः संबन्धः संभवत्येव । अतः क्षेत्रज्ञविलक्षणोऽधिष्ठाता सिद्धः ।।

एवं वाऽनुमानम्– विवादाध्यासितमुपादानोपकरणसंप्रदानप्रयो-जनाभिज्ञबुद्धिमत्कर्तृकम्, कार्यत्वात्, घटादिवदिति; अतः सिद्धो-ऽनुमानेनैव क्षेत्रज्ञविलक्षणो भगवानीश्वरः इति – चेत्

अत्रोच्यते – नानुमानिकत्वमीईश्वरस्य संभवति, अनुमानस्य कर्तृमात्रगोचरत्वात्; तेन न विलक्षणसिद्धिः ।।

यदुक्तम् – क्षित्यादिकं सकर्तृकं कार्यत्वात्, घटादिवदिति, तत्सिद्ध-साधनम्, क्षेत्रज्ञस्यापि धर्माधर्मद्वारेण कर्तृत्वाभ्युपगमात् । तदुक्तम्–

"कर्मभिः सर्वसिद्धानां तत्सिद्धेः सिद्धसाधनम् ।" इति ।।

अथ बुद्धिमत्कर्तृमात्रत्वं साध्यमिति चेन्न; बुद्धिमत्त्वमपि क्षेत्र-ज्ञस्य विद्यत इति पुनरपि सिद्धसाधनमेव । अथ न बुद्धिमत्कर्तृकता-मात्रं साध्यम्, किंतु उपादानोपकरणादिस्वरूपशक्तिकार्यबुद्धिमत्क-र्तृत्वम्, तर्हि साध्यविकलो दृष्टान्तः; सर्वोत्पत्तिमतामदृष्टस्याप्युप-करणत्वात् घटस्यापि तदुपकरणम्; परमाण्वादिकमुपादानम्, न च कुलालस्य तद्विषयं ज्ञानमस्तीति साध्यविकलत्वमेव । किंच किमत्र साध्यत्वेनेप्सितम्, किमस्मदादिकर्तृकत्वम्, उत विलक्षणकर्तृकत्वम्,

यद्यस्मदादिकर्तृकत्वम्, तर्हि सिद्धसाधनमपसिद्धान्तश्च; अथ विलक्षणकर्तृकत्वम्, तर्हि साध्यविकलो दृष्टान्तः ।।

अथोभयानुगतकर्तृत्वमात्रं साध्यमिति चेन्न उभयाभावात् । अथ कर्तृत्वसामान्येऽपि पक्षधर्मतया विलक्षणसिद्धिः, नैवम्; इतरेतराश्रयप्रसंगात् उभयानुगतसामान्यवदसिद्धिरिति ।।

ननु सर्वत्रादृष्टस्वलक्षणानुमानोच्छेदप्रसंगः । तथाहि – कादाचित्कं कारणवदिति कर्मसाधने द्रव्यगुणादिव्यतिरिक्तमेव कर्म सिषाधयिषतम्; तत्रापि – किं द्रव्यादि कारणम् विलक्षणं वा इति विकल्पे द्रव्यादौ सिद्धसाधनम्, विलक्षणे साध्यविकलता, उभयानुगतकारणमात्रे साध्येऽन्योन्याश्रयत्वमिति समानत्वात्, नैवम्; तत्र विलक्षणधर्माक्षेपः पक्षधर्मतया युक्तः, कारणजातीयस्वभावानतिक्रमेण विलक्षणधर्मिमात्राक्षेपात्; अत्र तु कर्तृजातीयस्वभावातिलंघनेन विशेषाक्षेपो भवताम् ।।

तथाहि – संप्रतिपन्नः कर्ता कुलालादिः सशरीरः पुण्यपापाधीनोऽनित्येच्छाज्ञानादियुक्तः, भवदभिलषितस्त्वशरीरः पुण्यपापादिरहितो नित्येच्छाज्ञानादियुक्तश्चेति न विलक्षणस्य क्रियाशक्त्यादिसाम्यम्, पक्षधर्मतया सर्वज्ञत्वसर्वशक्तित्वसर्वेश्वरत्वादिकर्तृजातीयविलक्षणगुणानामाक्षेप इति घटते । किंच कार्यत्वादित्ययमसिद्धो हेतुः, क्षित्यादीनामुत्पत्त्यसिद्धेः । तदुक्तम्–

"इदानीमिव सर्वत्र दृष्टान्ताधिक्यमिष्यते ।" –इति ।।

अथ सावयवत्वात्कार्यत्वं साध्यत इति, तन्न; नहि सावयवत्वं प्रयोजकं कार्यत्वस्य, सावयवत्वाभावेऽपि बुद्ध्यादौ कार्यत्वदर्शनात्; अतः प्रागभाववत्त्वमेव प्रयोजकं कार्यत्वस्य । अथ तदेव हेतुर्भवतु, तर्हि असिद्धो हेतुः, क्षित्यादीनां प्रागभाववत्त्वासिद्धेः ।।

ननु सावयवत्वं प्रागभाववत्वं चोभयं प्रयोजकं भवतु; अतः सावयवत्वेन कार्यत्वं प्रसाध्यते, सपक्षैकदेशवृत्तेरपि साधकत्वाभ्युपगमात्, नैवम्; शक्यक्रिये हि सावयवत्वेन कार्यत्वं दृष्टं घटादौ; अशक्यक्रिये हि सावयवत्वेन विशेषहेतुना कार्यत्वे प्रतिषिद्धे सावयवत्वसामान्यहेतुना कार्यत्वं न शक्यते साधयितुम्, बाधितविषयत्वात्; यथा मूर्तत्वमनित्यत्वेन घटादौ व्याप्तमप्यशक्यनाशेषु परमाणुष्वनित्यत्वं न साधयितुं शक्नोति ॥

किंच विरुद्धश्चायं हेतुः । तथाहि – यत्र कार्यत्वं सकर्तृकत्वेन विशेषहेतुना व्याप्तं दृष्टं घटादौ, तत्र सर्वत्र विग्रहवत्कर्तृकत्वेन व्याप्तं दृष्टं कुलालादौ; अतः सकर्तृकत्वं साधयत् कार्यत्वं विग्रहवत्त्वविशिष्टमेव साधयति । ननु अशरीरिणोऽपि कर्तृत्वं दृष्टं स्वशरीरप्रेरणायाम् नैवम्; तत्रापि सशरीरस्यैव प्रेरणायां कर्तृत्वम् प्रेर्यमपि स्वशरीरमेव; प्रयत्ननिमित्तं हि प्रेरणम्; तत्त्वशरीरिणो न संभवति, मुक्तान्यात्मन्यसंभवात् । अथ पूर्वशरीरपरित्यागेनैव शरीरान्ता-ग्रहादशरीरस्य शरीरपरिग्रहे कर्तृत्वं दृष्टम्; नहि युगपच्छरीरद्वयपरिग्रहः संभवति, नैवम्; तत्रापि सूक्ष्मशरीरस्य संभवात्, पूर्वशरीरपरित्यागे सर्वत्र शरीरिण एव कर्तृत्वम् ॥

नचैतावता सकलानुमानोच्छेदप्रसंगः, सपक्षदृष्टस्याव्यभिचारिण एव धर्मस्य परिग्रहात्; यथा धूमस्याग्निव्याप्तावुष्णत्वदाहकत्वप्रकाशकत्वाद्यव्यभिचारि धर्मविशिष्टस्याग्नेर्गम्यत्वमङ्गीक्रियते । अपर्वतस्थत्वमपि व्याप्तमिति चेन्न, पर्वतेऽपि क्वचित्प्रत्यक्षदर्शनात् । अनुमित्सितदेशव्यतिरिक्तदेशस्थत्वमप्यव्यभिचारादुपाधिरिति चेन्न, व्याप्तिग्रहणदशायामकस्मादेवाननुमित्सितदेशस्य स्मरणाभावात्; अतः सकर्तृकत्वं साध्यमानं सशरीरकर्तृकत्वमेव; सशरीरकर्तृकत्वेऽप-

सिद्धान्तः । अशरीरकर्तृकत्वे सशरीरकर्तृकं सर्वं विपक्षः; अतः पक्षविपक्षयोरेव कार्यत्वस्य हेतोर्वर्तमानत्वात् विरुद्धार्थसाधकत्वाद्वा विरुद्धो हेतुः ॥

किंच अशरीरकर्तृकत्वं साध्यधर्मत्वेनेप्सितम्; तत्र कार्यत्वं सशरीरकर्तृकत्वव्याप्तमिति तदेव साधयतीति धर्मविशेषविपरीतसाधनो हेतुः । तथा धर्मिविशेषविपरीतसाधनश्च । अशक्यक्रियस्य हि भूभूधरादेर्धर्मित्वम्, कार्यत्वं च शक्यक्रियेण घटादिना व्याप्तमिति तदपि साधयति । तथा कार्यत्वं क्षेत्रज्ञकर्तृकत्वेन व्याप्तमिति तदपि साधयति । तथा कार्यत्वमदृष्टवत्कर्तृत्वेन व्याप्तमिति तदपि साधयति । तथा अनित्येच्छाज्ञानादिमत्कर्तृकत्वेन व्याप्तमिति तदपि साधयति । अथ अशेषविशेषपरिहारेण सकर्तृकत्वसामान्यं साध्यम्, तर्हि सामान्यमात्रकर्तृकत्वाभावात्साध्यविकलतैव । पक्षधर्मतया विशेषाऽऽक्षेपो कर्तृजातीयस्वभावानुगुणमेव क्षेत्रज्ञत्वादिविशेषमेवाक्षिपति, न विपरीतस्वभावम्, यथाग्निमत्त्वे साध्ये पक्षधर्मतयोष्णत्वदाहकत्वादिधर्मयुक्तस्याग्निविशेषस्यैवाक्षेपः, न विपरीतस्यानुष्णत्वादियुक्तस्य ॥

किंच अनैकान्तिकश्चायं हेतुः, चेतनकर्तृकत्वं हि साध्यत्वेनाभिमतम्; तत्र भूभूधरादिकं पक्षः, चेतनकर्तृको घटादिः सपक्षः, चेतनकर्तृकव्यतिरिक्तः सर्वो विपक्षः, तत्र कार्यत्वं पक्षत्रयेऽपि वर्तते भूभूधरादौ शाखाभङ्गादौच । (?) अतोऽनैकान्तिकत्वमपरिहार्यम् ॥

किं च अनध्यवसितश्चायं हेतुः । तथाहि किमिदं कार्यत्वमभिप्रेतं भूभूधरादेः, किं भूभूधराद्यवयविन एवाभूत्वा भवनलक्षणकार्यत्वम्, आहोस्विदविनाशिन्येवावयविनि क्रमेण कतिपयावयवोत्पत्तिलक्षणं वा ? अभूत्वा भवनलक्षणस्य कार्यत्वस्यास्माभिरनभ्युपगमादसिद्धो हेतुः, क्रमेण कतिपयावयवोत्पत्तिलक्षणे कार्यत्वेऽनध्यवसितत्वम्,

एवंविधस्य कार्यत्वस्य भूभूधरादिष्वसंभवादन्यत्राभावाच्च, पक्ष एव वर्तमानत्वात्, सपक्षसद्भावेन केवलव्यतिरेकित्वाभावाच्च ॥

किंच कालात्ययापदिष्टो हेतुः । तथाहि अनुपलब्ध्या तावत् क्षित्यादीनामकर्तृकत्वमेव निश्चीयते; अतोऽनुपलब्धिबाधितमिदमनुमानम्, यथा शशमस्तकं विषाणवत्, चतुष्पान्मस्तकत्वात्, गोमस्तकवदित्यनुमानमनुपलब्ध्या बाध्यते । अथच जगत्कर्तुरनुमान सिद्धत्वादशरीरत्वाच्चास्मदाद्युपलंभयोग्यता नास्तीति योग्यानुपलम्भाभावान्नानुमानबाधः; एवं तर्हि शशविषाणस्याप्यनुमानसिद्धत्वात्परमाणुवदयोग्यानुपलंभ इति न तत्राप्यनुमानबाधः । (यदि) विषाणजातीयस्य रूपवत्त्वमहत्त्वादिदर्शनात्तत्र प्रत्यक्षयोग्यता; अत्रापि तर्हि कर्तृजातीयस्य विग्रहवत्त्वेन प्रत्यक्षयोग्यत्वेनास्मदाद्युपलम्भयोग्यत्वादुपलभ्येत, नचोपलभ्यते; अतोऽनुपलब्धिविरोधो दुर्विरहः ॥

किंच अनुमानविरुद्धमिदमनुमानम् । तथाहि क्षित्यादिकमकर्तृकम्, शरीर्यजन्यत्वात् आकाशवत्; अकार्यत्वप्रयुक्तेयं व्याप्तिरिति चेन्न, उभयोरपि प्रयोजकत्वे विरोधाभावात् । तथा विषादाध्यासितं क्षेत्रज्ञकर्तृकम्, चेतनकर्तृकत्वात्, घटादिवत् । तथा क्षित्यादिकमशरीरकर्तृकं न भवति, कार्यत्वात्, घटादिवत् । तथा क्षित्यादिकं नित्यप्रयत्नेच्छाज्ञानवत्कर्तृकं न भवति, कार्यत्वात्, घटादिवत् । एवं प्रमेयत्वादाकाशादिवदिति वा । तदुक्तम्–

"प्रत्यक्षाद्यविसंवादि प्रमेयत्वादि यस्य च ।
सद्भाववारणे शक्तं को नु तं कल्पयिष्यति ॥" इति ॥

एतेषामनुमानानां दृष्टस्वलक्षणत्वाददृष्टस्वलक्षणात् भवदीयानुमानात् बलीयस्त्वम् । किं च प्रकरणसमश्चायं हेतुः । तथाहि स्वपक्षसिद्धावप्येक एव हेतुः त्रीरूपः (विरुद्धः) प्रकरणसमः । विवादाध्या-

सितं सकर्तृकमिति वदतोऽशरीरकर्तृकत्वमेव विवक्षितम्; तत्र कार्यत्वादित्ययमेव हेतुः सशरीरकर्तृकत्वमपि साधयति । तथाहि – विवादाध्यासितं शरीरिकर्तृकम्, कार्यत्वात्, घटादिवदिति अतोऽसिद्धविरुद्धानैकान्तिकानध्यवसितकालात्ययापदिष्टप्रकरणसमाख्यानि न्यायशास्त्रसिद्धानि सर्वाणि दूषणानि भवदीयानुमानस्योत्पादितानि ।।

यत्तूक्तम् – अदृष्टादिकं चेतनाधिष्ठितम् । अचेतनत्वात्, वास्यादिवदिति; तदयुक्तम्; अधिष्ठेयस्वरूपशक्तिकार्यज्ञ एवाधिष्ठाता; नह्यदृष्टादिविषयज्ञानं संभवति; शक्यज्ञानं चाचेतनं वास्यादि चेतनाधिष्ठितं दृष्टमिति हि व्याप्तिः; अशक्यज्ञानं चादृष्टम्; अतो विशेषव्याप्तिबाधितत्वान्नाचेतनत्वसामान्यव्याप्तिरुन्मिषति । नापि पक्षधर्मतयाऽदृष्टज्ञानादिसंभवः, तन्मूलभूतस्याधिष्ठातृत्वस्य वारितत्वात् । पूर्वोक्तान्यपि दूषणानि यथासंभवमत्राप्युद्भाव्यानि ।।

यत्पुनरेतदभिहितम् – किं विलक्षणमङ्गीकृत्य ज्ञानानित्यत्वादि साध्यतेऽनङ्गीकृत्य वा? अङ्गीकृत्य ग्राहकप्रमाणबाधः, अनङ्गीकृत्य चेदाश्रयासिद्धिरिति, तदतिस्थवीयः पूर्वोक्तदूषणजातैस्तद्ग्राहकप्रमाणस्य दूषितत्वान्न केन (चित्) ज्ञानादितीत्येतान्यनुमानबाधः । अतो नानुमानेन विलक्षणसिद्धिः ।।

एवं चानुमानिकत्वमेवेश्वरस्य निराकृतम्, नेश्वरोऽपि निराकृतः। अत एव न प्रभाकरगुरुभिरीश्वरनिरासः कृतः; तत्समर्थनं च वेदान्तमीमांसायां क्रियत इत्यभिप्रेतम् । अत एवाहुरात्मवादान्ते मृदितकषायाणामेवैतत्कथनीयं न कर्मसङ्गिनामिति सर्वमुपपनम् ।।

इति नन्दीश्वरस्य प्रभाकरविजये आनुमानिकेश्वर-
निराकरणप्रकरणम् ।।

---

(१९) आत्मनः शरीरादिभेदसमर्थनम् ॥

*सम्प्रति शरीरेन्द्रियमनःप्राणबुद्धिभ्यो भिन्नत्वं नानात्वं ग्राहकतया सिद्धत्वं चात्मनः प्रतिपाद्यते । तत्र तावत् बार्हस्पत्याः शरीरमेवात्मानमाचक्षते । तथाहि – प्रत्यक्षत एव देहात्मत्वमवगम्यते । ज्ञाता त्वात्मा भवतीति निर्विवादं सर्ववादिनाम् । तत्र शरीरस्यैव ज्ञातृत्वं प्रतीयते अहं जानामीति । अहङ्कारगोचरश्चाभेदः; स्थूलोऽहम् कृशोऽहं गच्छाम्यहं तिष्ठाम्यहमिति स्थौल्यादियुक्तेन देहेनाहङ्कारस्य सामानाधिकरण्यस्य प्रतीतेः ॥

अथायं प्रयोगो लाक्षणिकः, अतो न शरीरालम्बनत्वमिति चेन्न। मुख्यपूर्वको हि सर्वत्र लाक्षणिकप्रयोगः । न चात्र देहातिरेकेणान्यो मुख्यार्थ उपलभ्यते ॥

---

*अव्यवहितपूर्वप्रकरणे-आत्मवादान्ते मृदितकषायाणामेवैतत् कथनीयं न कर्मसङ्गिनामिति उपसंहारेण वेदान्तमीमांसायां तदुपयोगितया निरूपणीयमात्मस्वरूपमन्यत्, कर्मप्रसंगे निरूपणीयमात्मस्वरूपमन्यदिति यत् सूचितम्, तदनुसारेण कर्मप्रसङ्गोपयुक्तमात्मस्वरूपं निरूपयितुमुपक्रमते–संप्रतीति । शरीरात्मत्वविज्ञानं पारलौकिकफलककर्मानुष्ठानविरोधीति सर्वसंप्रतिपन्नम् । अतः प्रथमतः शरीरात्मवादनिरासः क्रियते । एतेनेन्द्रियात्मवादोऽपि व्याख्यातः; तस्य गोलकान्येवेन्द्रियाणीति मते शरीरस्येवेन्द्रियाणामपि भस्मसाद्भावान्न परलोकगमनमिति स वादः कर्मानुष्ठानविरोधीति निगदव्याख्यातमिदम् । शक्तिरेवेन्द्रियम् इति मते निराश्रयस्यतस्य लोकान्तरगमनमसंभव्येव । एतेन प्राणात्मवादोऽपि व्याख्यातः । आत्मैकत्ववादस्तु व्यावहारिकः जातिवर्णाश्रमभेदेन विधीनां प्रवृत्तिविरोधीति नानात्मवादोऽपि कर्मप्रसङ्गोपयुक्तः । अस्मिन् प्रसङ्गेऽद्वैतवादनिरासोऽपि क्रियमाणो नाद्वैतनिरसार्थोऽपि तु कर्मणि प्रवृत्तिविशेषसंपादनार्थ इति रहस्यं न कैरपि विस्मर्तव्यमिति शम् ॥

ननु करचरणाद्यनेकावयवरूपाद्यन्वितं शरीरम्, तदालम्बनत्वे अहमिति ज्ञात्रवभासस्य तदीयानेकावयवरूपादिप्रतिभासान्वयोऽपि स्यात्, शरीरप्रतिभासवत्; न च तथा दृश्यते । अतः शरीरादिनिमित्तार्थेऽहम्प्रत्ययः । सत्यमवयवरूपादिप्रतिभासान्वयः; बाह्येन्द्रियप्रत्यक्षघटादौ(त)न्नियमदर्शन(ना त्) । अयं च मानसः प्रत्ययः । मन – इन्द्रियस्य त्वान्तरगुणग्रहण एव सामर्थ्यनियमात्तथा नावभासः ।।

किञ्च बाह्येन्द्रियप्रत्यक्षेऽप्येवं नियमो नास्ति, अनेकावयवयोगिनस्त्र्यणुकस्य ग्रहणेऽवयवग्रहणाभावात्, तथा त्वगिन्द्रियेण वा वायुप्रतीतौ स्पर्शाधिष्ठानमात्रतयैव प्रतीतिः, नत्ववयवप्रतिभासान्वयः । भवतामपि देहव्यतिरिक्तालम्बनत्वेऽप्यहंप्रत्ययस्य तदीयगुणसुखादिगुणप्रतिभासान्वयः समान एव । किञ्च शरीर एव चैतन्योपलम्भादन्यत्रानुपलम्भाच्च शरीरगुण एव चैतन्यम् ।।

ननु शरीरगुणत्वे चैतन्यस्यासाधारणत्वाद्विशेषगुणत्वं प्राप्तं भवतीति चेत्, तर्हि कारणगुणपूर्वकत्वमपि स्यात् । तदपि भवत्विति चेन्न, प्रत्येकं शरीरारम्भकेष्ववयवेषु चैतन्यप्रसङ्गादेकस्मिन् शरीरेऽनेकसहस्रचैतन्यप्रसङ्गः । नचैतद्दृष्टमिष्टं वा । अतो न शरीरगुणत्वं चैतन्यस्य, नैवम्; शरीरगुण एव चैतन्यम्, तत्रैवोपलम्भात् । यद्यपि कारणगुणपूर्वकविशेषगुणत्वं न संभवति; तथापि शरीरगुणत्वं न निराकर्तुं शक्यते। न चयावच्छरीरभावित्वादित्यादिभिरनुमानैः शरीरगुणत्वप्रतिषेधः, प्रत्यक्षबाधितविषयत्वात्तेषाम् । विशेषगुणत्वप्रतिषेधे च देहगुणत्वाभ्युपगमप्रसङ्गश्च । यद्यप्यारम्भकावयवेषु चैतन्यं नास्ति; तथापि क्रमुकफलताम्बूलीदलावयवादिष्वविद्यमानोऽपि कार्ये परिदृश्यमानो राग इवारम्भकावयवसंयोगविशेषाच्छरीरे तदुपलम्भो नानुपपन्नः ।।

किञ्च विशेषगुणस्यापि क्वचिदकारणपूर्वकत्वं दृष्टम्, यथा शुक्लकृष्णादिनानातन्तुभिरारब्धे पटे चित्रत्वमारम्भकेषु प्रत्येकमविद्यमानमपि

दृश्यते । यद्यवयविनि चित्रत्वं रूपं नाङ्गीक्रियते, तदा नीरूपत्वादवयविनोऽप्रत्यक्षत्वप्रसङ्गः । विशेषगुणस्यापि करकाठिन्यस्याकारणगुणपूर्वकत्वदर्शनादनैकान्तिकत्वं च । अपिचेच्छानुविधायिक्रियत्वमिन्द्रियाश्रयत्वं च देहे दृश्यमानमचेतनात् घटादेर्व्यावर्तमानं देहस्यैव चेतनत्वमवगमयति ॥

अथेतरभूतसङ्घातेष्वचैतन्याच्छरीरेऽपि नोपपद्यत इति मतम्, भवतामपि पृथिव्यादिद्रव्येषु चैतन्यानुपलम्भात् द्रव्यत्वादेव व्यतिरिक्तात्मन्यपि न संभवेदिति समानोऽयमनुयोगः । मम शरीरमित्यादिव्यतिरेकदर्शनमपि ममात्मेति व्यतिरेकवदौपचारिकत्वेन समाधेयम् ॥

अथोच्येत दृश्यस्य देहस्य द्रष्टृत्वं न घटते, एकस्य कर्मकर्तृभावविरोधादिति, नैवम्; व्यतिरिक्तात्मवादे वा कथमहंप्रत्ययदृश्यस्य द्रष्टृत्वम् ? रूपभेदादिति चेत्, तदस्माकमपि समानम् ॥

किञ्च परसमवायिक्रियाफलयोगित्वं हि कर्मत्वम् । तच्च शरीरे व्यतिरिक्तात्मनि च न संभवति; स्वसमवायिज्ञानफलयोगित्वात् । अत उभयवादिसंमतस्य देहस्यैव चेतनत्वोपपत्तौ न तत्त्वान्तरकल्पनायां प्रमाणमस्ति । तथाच सूत्रम्- "पृथिव्यापस्तेजोवायुरिति तत्त्वानि, तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवत् - इति ॥

अत्र प्रतिविधीयते - न तावद्देहस्यात्मत्वं संभवति, प्रत्यक्षेणैव व्यतिरेकस्य प्रतीयमानत्वात् । तथाहि - इदमाकारगोचरशरीरं पराक्तया प्रतीयते, अहमिति च प्रत्यक्तयाऽऽत्मा । अत इदङ्कारगोचराद्देहात् घटादिवत् व्यतिरिक्तगोचरोऽहम्प्रत्ययः । इतरथा परस्पराविभागापत्तिः। नन्वेकस्यैव रूपभेदोपपत्तिः, न चैत्रः कुण्डलिन्यात्मनि रूपभेदेन प्रतिपद्यमानोऽयं कुण्डलीति प्रतिपद्यते, न कुण्डलमहमिति । अतो मिश्रितेदम्प्रत्ययादहम्प्रत्ययाद्भेदसिद्धिः ॥

किञ्चोपरतबाह्येन्द्रियस्याप्यहंप्रत्ययो जायते । तत्र शरीरावयव्यालम्बनत्वेऽवयवप्रतिभासोऽवश्यंभावी स्यात् । नचावयवग्रहणमन्तरेणावयविग्रहणं संभवति । बाह्येन्द्रियप्रत्यक्ष एव तन्नियम इति चेत्, तर्ह्यवयव्यपि बाह्येन्द्रियप्रत्यक्ष एव, न मानसप्रत्यक्षोऽवयवी दृष्टः । अथ बाह्येन्द्रियप्रत्यक्षेऽपि त्र्यणुके व्यभिचार इति चेत्, यत्रावयवग्रहणाधीनोऽवयविग्रहः, तत्रेयं व्याप्तिः । अतः शरीरावयविग्रहणेऽवयवग्रहो दुर्निवार एव । वायोः स्पर्शाधिष्ठानतया ग्रहणे रूपप्रतीतिमात्रमेव नास्ति, अवयवग्रहणं तु विद्यत एव; स्पृश्यमानघटवत् ॥

यत्तु शरीर एवाहंप्रत्ययो दृश्यते-स्थूलोऽहं कृशोऽहमिति स्थौल्यादिसामानाधिकरण्यादिति, तच्च नैवम्; नियमितबहिरिन्द्रियवृत्तेरहमितिप्रतिभासे स्थौल्यादिप्रतीतिरेव न दृश्यते । अतश्चाक्षुषदेहप्रत्ययवदहम्प्रत्ययस्य न स्थौल्यादिसंबन्धनियमः । एवं सति यत्र स्थूलोऽहमिति प्रतीतिस्तत्राहंशब्दः शरीरे लक्षणया वर्तत इत्यङ्गीकर्तव्यम्; मुख्यस्याहमर्थस्य शरीरव्यतिरेकेण प्रतिपन्नत्वात् ॥

ननु मम शरीरमिति व्यतिरेकप्रतीतेः साक्षाद्भेदप्रतीतेः शिलापुत्रकस्य शरीरमिव नौपचारिकत्वमाश्रयितुमुचितम् । ममात्मेत्यत्र तु व्यतिरेकस्योभयवादिसिद्धत्वादविवादाच्च युक्तमौपचारिकत्वम्; अतः शरीरव्यतिरिक्तत्वमात्मनः प्रत्यक्षम् ॥

अनुमानाच्च व्यतिरेकः । तथाहि – विवादास्पदोऽहम्प्रत्ययो न शरीरालम्बनः, तदवयवप्रतिभासरहितत्वात्, यथा घटोऽयमिति प्रतिभासः; तथा शरीरमहम्प्रत्ययगोचरो न भवति, इदमिति गृह्यमाणत्वात्, बाह्येन्द्रियग्राह्यत्वाद्वा, घटादिवदिति; तथा शरीरम्, परार्थम्, सङ्घातत्वात्, शयनासनादिवत्; तथा शरीरम्, प्रयत्नवताऽधिष्ठितम्, हिताहितप्राप्तिपरिहारयोग्यचेष्टायोगित्वात्, यथा रथादि; तथा शरीरं धर्मि

प्रयत्नवताऽधिष्ठितमिति साध्यो धर्मः, इच्छायत्तविकृतकर्मवायुयुक्तत्वात्, यदेवं यथा भस्त्रा; तथा शरीरं प्रयत्नवताऽधिष्ठितं निमेषोन्मेषयुक्तावयवयोगित्वाद्दारुयन्त्रवत्; तथा शरीरस्य वृद्धिक्षतभग्नसंरोहणं व्यतिरिक्तचेतननिमित्तं वृद्धिक्षतभग्नसंरोहणत्वात्, गृहपतिनिमित्तगृहवृद्धिक्षतभग्नसंरोहणवत्; तथा देहो नात्मा भवितुमर्हति, उत्पत्तिमत्त्वात्, परार्थत्वात्सन्निवेशविशिष्टत्वाद्रूपादिमत्त्वात्, भूतत्वात्, घटादिवत्; तथा देहो नात्मा, सच्छिद्रत्वात्, अदेहित्वाद्देहत्वात्, मृतदेहवत्; तथा देहः, स्वव्यतिरिक्तद्रष्टृकः, दृश्यत्वात्, घटादिवदित्यादिसाधनशतैर्बाधितविषयत्वादिन्द्रियाश्रयत्वादित्यादिव्यतिरेकहेतवो न साध्यं साधयितुमीशते ॥

अथानुमानं न प्रमाणम्; एकस्यैव प्रत्यक्षस्य प्रामाण्याभ्युपगमात्, तन्न; किमत्र प्रमाणमनुमानमप्रमाणमिति? प्रत्यक्षमनुमानं वा? न तावत्प्रत्यक्षमनुमानाप्रामाण्यं गोचरयत् किमप्युदीयते । अनुमानं चेत्-अङ्गीकृतमनुमानस्य प्रामाण्यम् । नाप्रत्यक्षं नप्रमाणं प्रत्यक्षान्यत्वात्, तदाभासवदित्येतदेव भवद्भिरुच्यते । वादानधिकारश्चानुमानानभ्युपगमे ॥

किञ्च भवद्भिरनुमानप्रामाण्यमङ्गीकृत्यान्तर्भाव एव कथ्यते; इतरथा लोकविरोधात् । किञ्च ज्ञानसुखादेर्विशेषगुणत्वात्तेषां च कार्यद्रव्ये कारणगुणपूर्वकत्वात् न शरीरविशेषगुणत्वम् । यत्तु मदशक्तिवच्चैतन्यस्यापि शरीरविशेषगुणत्वमुक्तम्, तदनुपपन्नम्; शक्तेरविशेषगुणत्वान्न तत्साम्यं ज्ञानसुखादीनाम् । शरीरगुणत्वे तस्यासाधारणत्वाद्विशेषगुणत्वं ज्ञानादेः ॥

किञ्च ज्ञानादिकम्, विशेषगुणः, कार्यत्वे सत्येकेन्द्रियप्रत्यक्षत्वात्, रूपादिवत्; अतो विशेषगुणत्वादकारणगुणपूर्वकत्वाच्च नशरीरगुणत्वम्; ताम्बूलरागस्तु चर्वणजनितपूर्वद्रव्यावयवविभागानन्तरसंयोगेन कारण-

भूतपरमाणुप्रभृति जन्यत इत्यदोषः; अवयवेष्ववयविरागस्योपलभ्यमानत्वात् । न चात्र शरीरावयवेषु चैतन्यमुपलभ्यत इति वैषम्यम् ।।

यत्तु चित्रत्वमकारणपूर्वकं दृष्टमिति, तन्न, नानारूपतैव चित्रता। नानारूपं तु तन्तुभिरारभ्यत इति न किञ्चिदप्यनुपपन्नं पश्यामः । अस्तु-वा चित्रत्वं नाम रूपविशेषः, सतु कारणगतैर्नानाविधरूपैरेवारभ्यत इति युक्तम् । न चैवमत्र; शरीरावयवेषु चैतन्यं नोपलभ्यत इत्यसकृदुक्तत्वात् । न च करकाठिन्यस्य विशेषगुणत्वम्, संयोगविशेषत्वात्; काठिन्यस्य द्विष्ठत्वमप्यन्योन्यसंश्लिष्टापेक्षयाऽस्त्येव ।।

अपि च स्थिर एव शरीरे गुणान्तरोत्पादाभावेऽपि स्रग्विलेपनगन्धवद्विनिवर्त्यन्ते ज्ञानोदयादयः, न च शरीरगुणत्वेन सम्प्रतिपन्ना रूपादयस्तथा निवर्त्यन्ते । तदुक्तम्-

तस्मिन्दृढेऽप्यसद्भावात्स्रग्विलेपनगन्धवत् । इति

किञ्च ये शरीरगुणरूपादयस्ते स्वस्य च प्रत्यक्षा बाह्येन्द्रियग्राह्याश्च, ज्ञानसुखादयस्तु न तथेति न शरीरगुणः । अतः शरीरव्यतिरिक्त आत्मा सिद्धः ।।

नन्वस्तु शरीरव्यतिरेकः; शरीरस्येदंतया भानादहम्प्रत्ययवेद्यत्वानुपपत्तेः, इन्द्रियाण्येवात्मा भवतु, न च तेषामिदन्तया प्रतीतिरस्ति । नापि तेषामहम्प्रत्ययवेद्यत्वेऽवयवरूपादि प्रतीतिप्रसङ्गः, तेषां सूक्ष्मत्वादवयवप्रतिभासानुपपत्तेः । किञ्चेन्द्रियव्यापारफलं हि ज्ञानम् । अतस्तान्येव ज्ञातृणीति युक्तम्; तद्व्यापारफलस्य तद्गामित्वस्य स्वतः प्राप्तत्वात्, यथा स्नानाध्ययनादिफलं तत्कर्तृगामि; अत इन्द्रियाण्येवात्मेति पौराणिकाः । अत एव वचनं सत्यतपसः ''द्रष्टुश्चक्षुषो नास्ति जिह्वे''ति ।।

एतदपि न साधु । तथाहि – इन्द्रियान्तरदृष्टस्येन्द्रियान्तरेण प्रतिसन्धानं दृश्यते – यमहमद्राक्षं तमहं स्पृशामीति, तदिन्द्रियात्मवादे नोपपद्यते । न हि देवदत्तानुभूते यज्ञदत्तस्य प्रत्यभिज्ञानं संभवति ।।

अथ संहत्येन्द्रियाणामात्मत्वमिति मतम्, तदप्यनुपपन्नम्; न हीन्द्रियाणि संहत्यार्थज्ञातॄणि । ज्ञाता ह्यात्मा भवतीत्यविवादम् ।।

किञ्चैकस्मिन्निन्द्रियेऽपि गते आत्मनः प्रायणमपि प्रसज्येत । न चैतदिष्टं दृष्टं च । अपि चैकेन्द्रियवैकल्येऽपि तदनुभूतार्थविषयिणी स्मृतिर्दृश्यते, सापीन्द्रियात्मवादे न च घटते ।।

यत्पुनरिदमुक्तं यद्यद्व्यापारफलं तत्तत्कर्तृगामि युक्तमिति, तदप्यनैकान्तिकम्; यतः परशूत्पतननिपतनव्यापारजन्यं द्वैधीभावाख्यं फलं न च परशुगामि दृष्टम् ।।

यत्तु सात्यतपसं वचनम् तच्छरणागतपरित्राणस्यावश्यकर्त्तव्यता-मन्यथा च व्याधस्य प्राणयात्रापत्तिं चालोच्योक्तमिति न दोषः ।।

तर्हि मन एवात्मा भवतु ! तथा सतीन्द्रियान्तरदृष्टस्येन्द्रियान्तरेण प्रतिसन्धानं न न घटते; एकत्वात्मसर्वेन्द्रियाध्यक्षत्वाच्च । मनसो नित्यत्वादेवेन्द्रियाभावेऽपि तद्विषयस्मरणमप्युपपद्यते ।।

एतदपि न चतुरश्रम्; मनसः करणत्वात् । यत्करणं तन्न चेतनम्, यथा चक्षुरादिः बाह्याभ्यन्तरज्ञानकरणत्वेन च वादिभिर्मनसोऽव-क्लृप्तिः । अतः करणरूपस्यैव ज्ञानकर्तृत्वं कथमिव संभवति ? स्वातन्त्र्यलक्षणं हि कर्तृत्वम् करणत्वंतु पराधीनाधिष्ठानाधीनपारतन्त्र्य-वत्वम् । अतः कथमिदमन्योन्यविरुद्धं रूपद्वयमेकस्मिन् संभवेत्? अथ तस्य कारणान्तरं कर्तृ, तर्हि नामान्तरेणात्मैवाङ्गीकृतः । अतो न मनसश्चेतनत्वम् ।।

एवं तर्हि प्राण आत्माऽस्तु, तथाच सति जीवच्छरीरे सात्मकत्व-प्रतीतिः लोकान्तरगमनं देहादुत्क्रमणं देहान्तरसञ्चरणं च सुतरामुपपद्यते; गत्वरस्वाभाव्यात्प्राणस्य । अन्यथात्मनः परममहत्त्वे चाभ्युपगम्यमाने स्पर्शशून्यत्वादेव परिस्पन्दानुगमनादयो न मुख्याः स्युः ।।

एतदप्यसारम् । वाय्वात्मकत्वात्प्राणस्य ज्ञानसुखाद्यनुपपत्तेः । अपिच सुषुप्तावात्मा वृत्तिहीन इति निर्विवादम् । प्राणस्य तु तदानी-मपि श्वासप्रश्वासलक्षणा वृत्तिरुपपद्यते ।।

अतः स्पर्शेन्द्रियग्राह्यघटादिवत्स्फुटमनात्मत्वं प्राणस्य । अतः प्राणव्यतिरिक्त एवात्मा ।।

अस्तु तर्हि बुद्धिरेवात्मा, अजडत्वात्, जडत्वव्याप्तं शरीरादिषु दृष्टमनात्मत्वम् । जडत्वं च संविदि निवर्तमानमनात्मत्वमपि निवर्त-यति । अजडत्वं च बुद्धेः प्रभाकरैरभ्युपगतमेव ।।

किञ्च यैस्तु संविद्व्यतिरिक्त एवात्माभ्युपेतः, तैः संवेदनमित्यङ्गी-क्रियत एव । तदधीनत्वात् तत्सिद्धेः । अत उभयवादिसिद्धसंविदैव सकलव्यवहारोपपत्तौ किं तत्त्वान्तराभ्युपगमेन?

नन्वहं जानामीति ज्ञाता व्यतिरिक्त आत्मा प्रत्यक्षतः प्रकाशते, नैवम्; तस्य विकल्परूपत्वात् । तदुक्तम्-

"अविभागे हि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" ।। इति ।।

एतदप्यनुपपन्नम् । क्षणभङ्गिन्याः संविद आत्मत्वे प्रतिविषयमन्यथा भावेन परेद्युर्ज्ञातस्य परेद्युः प्रत्यभिज्ञानानुपपत्तिः । भवति ह्यन्येद्युर्दृष्टे परेद्युरिदमहमदर्शमिति प्रत्ययः । नचास्य निरालम्बनत्वमुचितम्; प्रमाणविरोधात् । निरालम्बनत्वसाधनानां निरालम्बनत्वे निरालम्बन-त्वमेव न सिध्येत्; सालम्बनत्वेनानैकान्तिकत्वम् ।।

अथ विज्ञानलक्षणसन्तानस्थायितया प्रत्यभिज्ञोपपत्तिः, नैवम्; तस्य स्थायित्वे क्षणिकत्वप्रतिज्ञाविरोधादपसिद्धान्तप्रसङ्गाच्च । अथ विज्ञानक्षणानां भेदेऽपि सौसादृश्यात्प्रत्यभिज्ञोपपत्तिः, लूनपुनर्जातनख-केशादिजातिविवेकवदिति चेन्न, तत्र तद्व्यतिरिक्तः पूर्वापरव्यक्तिदर्शी सादृश्यानुसन्धाता चैकः समस्ति; अत्रतु विज्ञानव्यक्तीनां क्षणिकत्वेन परस्परानुसन्धानं च न संभवतीति न सादृश्यनिबन्धनं प्रत्यभिज्ञानम् ।।

किञ्च सादृश्यमपि क्षणिकं स्थायि वा? क्षणिकत्वे ज्ञानतुल्यत्वान्न तन्निबन्धनं प्रत्यभिज्ञानम् । स्थायित्वे च क्षणिकत्वहानिरप-सिद्धान्तश्च । अतः प्रत्यभिज्ञानसमर्थः संविदाश्रयः स्थायी चेतनोऽभ्युप-गन्तव्यः ।।

सच विभुः सर्वत्र कार्योपलम्भात् । तथाहि नानादेशेषु सर्वत्र बुद्धिसुखादीनामुपलम्भात्तत्र सर्वत्रात्मनः सन्निधिरभ्युपगन्तव्यः; गुणिनमन्तरेण गुणस्यावस्थानासंभवात् । तत्र गत्वा सन्निधौ कल्प्य-माने गतिकल्पनं तत्कारणकल्पनं चेति गौरवं प्रसज्यते; अगच्छतोऽपि सन्निधानदर्शनात् । आकाशादौ इदमेव विभुत्वं यदगच्छतोऽपि युगपन्नानादेशेषु सन्निधानम् । किञ्चात्मा, सर्वमूर्तिमद्भिः संयुज्यते, अणुपरिमाणरहितत्वे सति नित्यद्रव्यत्वात्, यदित्थं तदित्थम्, यथाऽऽ-काशादि ।।

अथाणुपरिमाणो भवत्वात्मा, को दोषः? अयमेव दोषः, अणुपरि-माणत्वे युगपदेव शिरःपादवेदना नोपपद्यते । किञ्चात्माणुपरिमाणाधारो न भवति, इन्द्रियग्राह्यगुणाधिकरणत्वात्, घटादिवदिति ।।

ननु भवतु तर्हि शरीरपरिमाणः? तथाहि – आत्मा, यत्रोपलभ्यते तत्परिमाणः, तत्रैव सर्वत्रोपलभ्यमानगुणत्वात्, यदित्थं तत्तथा, यथाऽन्तर्वर्तितयोपलभ्यमानप्रभानुगुणः प्रदीपो गृहपरिमाण इति

दिगम्बराः, तत् नोपपन्नम्; आत्मनः सर्वमूर्त्तिमद्भिः सह संयोगस्य साधितत्वात् तत्रैवोपलभ्यमानगुणत्वं विरुद्धम् । दृष्टान्तश्च साध्यविकलः । नहि गृहोदरवर्तिनी प्रदीपप्रभा गृहसमानपरिमाणा; तदन्तर्वर्तित्वेन न्यूनपरिमाणत्वात् । नहि समानपरिमाणं गृहान्तरं गृहान्तर्वर्त्ति दृष्टम् । तथा साधनविकलश्च । नहि गृहान्तर्वर्तिनी प्रभा गृहे सर्वत्रोपलभ्यते ॥

किञ्च शरीरपरिमाणत्वे सावयवत्वप्रसङ्गः । यन्निरवयवद्रव्यं तदणु वा विभु वा दृष्टम् । अत उभयपरिमाणरहितस्य सावयवत्वमेव । किञ्च मशकहस्तिदेहयोरात्मनो विषमपरिमाणत्वप्रसङ्गश्च । तदपि सावयवस्यैव युज्यते, न निरवयवस्य । तथाच श्रुतिः – "अनन्तमपारं" "सर्वव्यापी सर्वभूतान्तरात्मा" इति च । भगवद्गीता च – "नित्यः सर्वगतः स्थाणुरि"ति । एवं चाणुत्वाङ्गुष्ठपरिमितत्ववादाश्च सूक्ष्मत्वाभिप्राया वेदितव्याः । अतो विभुरेवात्मा ॥

तथा नित्यश्च आत्मा । उपनिषदश्च कार्यपरा अपि नित्यत्वमसकृदनुवदन्ति । तस्मादनित्यत्वानुमानान्यपि आगमविरुद्धत्वान्न साध्यसाधनानि । अतः सिद्धं नित्यत्वम् ॥

तथा प्रतिशरीरं नानाभूतश्च । तथाहि – आत्मभेदप्रतीतिः सर्ववादिसम्मता । एकात्मवादिनोऽपि भेदप्रतीतिमङ्गीकृत्य काल्पनिकत्वमाहुः। अतोऽयं भेदः पारमार्थिकः काल्पनिको वेति वादिनां विप्रतिपत्तिः ॥

तत्र पारमार्थिकत्वमेव भेदस्य युक्तम्; प्रमाणसिद्धत्वात् । तथाहि– प्रत्यक्षानुमानार्थापत्त्यागमैरात्मभेदोऽवसीयते । प्रत्यक्षेण तावदहमिति भोक्तृतया स्वात्मा परात्मनो भिन्नः प्रतीयते । परात्मा चानुमानेनायमिति गृह्यते, नाहमिति । अतो विलक्षणाकारबुद्धिबोध्यतया घटपटयोरिव स्वात्मपरात्मनोः भेदः स्फुटतरः ॥

27.

अथ य एवाहमिति प्रतीयते, स एव परशरीरस्थोऽयमिति प्रतीयत इति, मैवम्; यदि परशरीरेऽपि स एवात्मा, तर्हि करणभेदेऽपि प्रत्यभिज्ञायेत तथा । यथा कर्तुरेकत्वे करणभेदेऽपि चक्षुषा दृष्टस्यार्थस्य त्वगिन्द्रियेण प्रत्यभिज्ञाय अहमद्राक्षमहं स्पृशामीति, तथा परशरीरस्थ आत्मा परानुभूतमपि प्रत्यभिजानीयात्; एकत्वादात्मनोऽनुभवितुः । नच-मनोभेदादप्रत्यभिज्ञेति-वाच्यम्; मनसोऽपि करणत्वात् ।।

तथानुमानेनाप्यात्मभेदोऽवगम्यते । विवादाध्यसितोऽयमात्मा, द्रव्यत्वातिरिक्तपरजात्याधारभेदेन नाना; अश्रावणविशेषगुणाधिकरणत्वात्, यदित्थं तत्तथा, यथा घटादि; तथाऽऽत्मा, नाना भवितुमर्हति, ज्ञानासमवायिकारणाश्रयत्वात्, मनोवत्; तथात्मा, नाना विशेषगुणाधारत्वाद्धटादिवत् ।।

नन्वेकत्वमप्यनुमानेन साधयितुं शक्यते । विवादाध्यासितानि शरीराणि, एकेनाऽऽत्मनाऽऽत्मवन्ति, शरीरत्वात्, प्रतिवादिशरीरवत्; तन्न; सर्वात्मानः सर्वगता इत्यस्मन्मतम् । तत एकस्याप्यात्मनः सर्वशरीरेषु विद्यमानत्वात् सिद्धसाधनम् । अथैकेनैवात्मनात्मवत्त्वं साध्येत, तर्हि प्रतिवादिशरीरे सर्वेषामात्मनां सद्भावात्साध्यविकलता दृष्टान्तस्य ।।

अथैकस्यात्मनो भोगसाधनानीति साध्यते, तर्ह्येकमेव शरीरं यथा-स्वस्य भोगसाधनं तथा स्वस्य च भार्यादीनां शरीराण्यपि भोगसाधनान्येवेति पुनरपि साध्यविकलता । अथ न भोगसाधनत्वमात्रं साध्यम्, किन्तु भोगायतनत्वम्, अतश्च न साध्यविकलतेति, तन्न; किमिदं भोगायतनत्वं नाम? यदि भोगसाधनत्वम्; तर्हि पूर्वोक्तमेव दूषणम् । अथ भोगः सुखम्, तदायतनत्वं नाम सुखसमवायित्वमभिप्रेतम्, तदा शरीरेषु सुखसमवायाभावात् बाधितविषयत्वमपसिद्धान्तश्च । सप्रतिसाधनश्च हेतुः ।।

तथाहि– विवादाध्यासितान्येककालवर्तिशरीराणि, स्वसङ्घयात्मवन्ति, शरीरत्वात्, प्रतिवादिशरीरवत् । नच जन्मान्तरशरीरेष्वनैकान्त्यम्; एककालवर्तिनां पक्षीकृतत्वात् । नच सौभर्यादिशरीरेषु व्यभिचारः; तेषां युगपदेव बहुशरीरपरिग्रहे प्रमाणाभावात्, पुराणवादानां चान्यत्वात् । यदि तेषामनेकशरीराणि सन्तीत्यभिनिवेशः, तदाऽस्मदाद्येककालवर्तीनि शरीराणीति पक्ष विशेष एव कर्तव्यः । तथार्थापत्त्यापि भेदोऽवसीयते । तथाहि – सुखदुःखव्यवस्था तावत् प्रतीयते, एकः सुखमनुभवति यदा, तदैवापरो दुःखी दृष्टः; इयं सुखदुःखादिव्यवस्थाऽऽत्मभेदं विनाऽनुपपद्यमाना भेदं कल्पयति ।।

नन्वियं व्यवस्था एकात्मकत्वेऽप्युपपद्यते, यथैकशरीरे पादे मे वेदना शिरसि मे सुखमिति व्यवस्था, तथा शरीरान्तरेऽपि व्यवस्थोपपत्तेरन्यथोपपत्तेरिति, मैवम्, यत्रैकात्मत्वं सम्प्रतिपन्नम्, तत्र सम्बन्ध्यनुसन्धानमप्यस्ति, यत्र सम्बन्ध्यनुसन्धानं नास्ति तत्रैकात्मकत्वमपि नास्त्येव । शरीरभेदप्रयुक्तमननुसन्धानं नात्मभेदप्रयुक्तमिति चेन्न; आत्मन एकत्वेपि शरीरभेदे जातिस्मरणस्यानुसन्धानदर्शनात् । तथा बालस्य स्तन्याभिलाषादेर्जन्मान्तरानुभूतहर्षहेतुत्वस्मरणनिबन्धनत्वाच्च । एतच्च सर्ववादिभिरभ्युपगतमेव । अन्यथाऽकस्मादेव स्तन्याभिलाषानुपपत्तेः । जन्मान्तरशरीरानुभूते सर्वेषां सर्वविषयमनुसन्धानं किमिति नास्तीति चेन्न; वर्तमानशरीरानुभूतेऽपि अनुभूतस्य सर्वस्यानुसन्धाननियमाभावात् । अतोऽत्यन्ताननुसन्धानमात्मभेदे सत्येवोपपद्यते न शरीरमात्रभेदे ।।

एतेन – मनोभेदादननुसन्धानमित्यपि – प्रत्युक्तम् । अतोऽर्थापत्त्याप्यात्मनानात्वसिद्धिः ।।

तथागमादपि – "द्वे ब्रह्मणी वेदितव्ये परं चापरंच" "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं

स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति'' । ''पृथगात्मानं प्रेरितारं च मत्वा'' ''सर्व एतेऽप्यात्मनोऽभ्युच्चरन्ति'' ''सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा'' ''एको बहूनां विदधाति कामान्'' ''निरञ्जनः परमं साम्य-मुपैति'' ''मम साधर्म्यमागताः'' ''उत्तमः पुरुषस्त्वन्य'' इत्यादि श्रुतिः स्मृतिरपि, तथा ''ब्राह्मणो बृहस्पतिसवेन यजेत'' ''राजा राजसूयेन'' ''वैश्यो वैश्यस्तोमेने'' त्यादिकर्मविधयोऽधिकारिभेदार्थ-मात्मभेदमाक्षिपन्ति ॥

ननु भवतां कृत्स्नस्यागमस्य कार्यपरत्वेन प्रामाण्यान्न 'सिद्धार्थभूता-त्मभेदप्रामाण्यमुपपद्यते, नैवम्; एकात्मवादानां भवतां सिद्धेऽपि प्रामाण्यादात्मभेदे प्रमाणमेवागमः । अस्माकं तु कार्यपरत्वेऽपि भेदानु-वादकत्वादेवागमसिद्धो भेदः । एवं नानात्वग्राहकप्रमाणविरोधादेकत्व-श्रुतयोऽप्यन्यथा व्यावर्णनीयाः । नच प्रत्यक्षादिविरोध आगमस्यैव बलीयस्त्वम्; तथा सत्युपनिषद्वाक्यानां क्वचिद्गौण्या व्यावर्णनं स्वशास्त्रे क्रियमाणमसङ्गतं स्यात् । अतो नाम्नायस्य बलीयस्त्वम् । अतः प्रत्यक्षाद्यविरोधेन द्वैतवादा निर्वर्णनीयाः ॥

तत्रैकमेवाद्वितीयमित्याद्येकत्वश्रुतय एकस्मिञ्छरीरे एक एव स्वामीत्येवंपराः । ''नेह नानास्ति किञ्चने'' त्यादिनानात्वनिषेधश्रु-तयोऽनेकशरीरग्रहणेऽप्येक एवात्मा न नाना इति, एवं ''एष नेति नेती''त्यादयस्तु देहेन्द्रियादिभ्यो भेदपराः । तस्मादागमादप्यात्मनानात्वं सिध्यति । एवंच सति नानात्मवाद एव बद्धमुक्तव्यवस्थोपपत्तिः । एकत्वेतु काल्पनिकी बद्धमुक्तव्यवस्थेति चेत्, तर्हि बन्धमोक्षयोर्मिथ्या-त्वात्साधुसमर्थितोऽद्वैतवादिभिर्मोक्षः ॥

तथा विषयग्रहणे ग्राहकत्वेनैवात्मनः सिद्धिः; न ग्राह्यत्वेन, एकस्य-कर्मकर्तृत्वविरोधात् । यदि विषयग्रहणे कर्तृतयात्मा न प्रकाशते, तदा स्वपरवेद्ययोरनतिशयः स्यात् ॥

अथोच्यते ग्राहकतयाऽनवभासेऽपि आत्मपरवेद्ययोरतिशयः सिध्यत्येव । तथाहि – स्वसमवेतज्ञानजननमेव स्ववेद्यस्यातिशयः, परसमवेतज्ञानजननमेव परवेद्यस्य । यथा यस्यैव गमनं तक्षणं स्पन्दनं तस्येव देशान्तरप्राप्तिः, नास्पन्दनवतः; अथ स्वपरसंबन्धिज्ञानजननव्यवस्थैव कथमवगम्यत इति चेत्, स्वकीयपरकीयेन्द्रियार्थसन्निकर्षादिज्ञानहेतुसामग्रीभेदेन सुखमवगन्तुं शक्यते ।।

ननु ग्राहकस्यापि तत्सामग्र्यन्तर्भूतत्वेनावगमप्रसङ्गः, नैवम्, इन्द्रियादिवदनवगतस्यापि सत्तयापि कारणत्वसंभवात् । विषयबोध एवात्मबोध इति च भ्रान्तभाषितम्, नह्यन्यस्य बोधेनान्यस्य सिद्धिः, अतिप्रसङ्गात् ।।

किञ्च संविदधीना च सकलभावव्यवस्थासिद्धिः, सा विषयप्रकाशकाले न प्रकाशते, किमुत पुनस्तदाश्रयस्यात्मनः प्रकाशे ।।

यत्तु घटमहं जानामीति विषयप्रकाशकाले सर्वत्र नियमेन त्रितयं प्रकाशत इत्युच्यते, तदपि सर्वलोकविरुद्धम्, घटोऽयं पटोऽयमिति विषयमात्रस्यैव प्रकाशनं सार्वत्रिकम्, यत्तु क्वचित् ज्ञानव्यवहारः, स प्राकट्याद्यनुमितज्ञाननिबन्धनः प्रकाशः । ज्ञातृव्यवहारस्तु मानसप्रत्यक्षहेतुक इति न विषयबोधादात्मसिद्धिः ।।

अपिच यदि घटमहं जानामीति व्यवहारादात्मसिद्धेर्विषयज्ञाननिबन्धनत्वम्, तर्हि चाक्षुषं रूपं श्रावणः शब्द इत्यादीन्द्रियविशिष्टव्यवहाराच्चक्षुरादिसिद्धिरपि रूपादिज्ञानात् स्यात् ।।

अथ तत्रानुमानसिद्धचक्षुरादिनिबन्धनश्चाक्षुषादिव्यवहारः, तर्ह्यत्रापि ज्ञानान्तरनिबन्धन इति तुल्यचर्चः । न चैकस्य कर्मकर्तृभावविरोधः, रूपभेदादपि तदुपपत्तेः, चेतनत्वादिरूपेण ग्राह्यत्वं ज्ञातृरूपेण ग्राहकत्वमिति ।।

अत्रोच्यते – सर्वविषयबोधे आत्मनोऽहमिति प्रतीतिरास्थेया; अन्यथा मयेदं विदितमिति प्रतिभासाभावप्रसङ्गात् । भवति च विषयवित्तौ मयेदं विदितमिति सर्वेषां सर्वत्र प्रतिभासः । तदनवभासे स्वपरवेद्ययोरनतिशयो न स्यात् । अस्ति च वैलक्षण्यं स्वरूपतः कार्यतश्च । स्ववेद्यं तु स्वप्रतियोगितया प्रकाशते, परवेद्यं तु परप्रतियोगितया । यथा स्ववेद्यः स्वव्यवहारः कार्यम्, परवेद्यः परव्यवहारः, योऽयं स्ववेद्यस्य परवेद्यादतिशयः सोऽसति स्वभावे नोपपद्यत इत्यर्थापत्तिः ग्राहकसिद्धौ प्रमाणम् ।।

नन्वतिशयोऽन्यथाप्युपपद्यते । स्वसमवेतज्ञानोत्पत्तिरेव स्ववेद्यस्य परवेद्यादतिशयः, यथा यस्यैव गमनं तस्यैव देशान्तरप्राप्तिरिति, तन्न; यदि स्वसमवेतज्ञानाद्वेद्यमात्रमेव ज्ञानम् तदा ज्ञाताद्विषयादज्ञातस्य सोऽतिशयो भवतु, न परज्ञानात् स्वज्ञानस्य, यदा पुनः स्वसमवेतज्ञान आत्मनोऽपि प्रतीतिरस्ति, तदा स्ववेद्यस्य परवेद्याद्रूपवैलक्षण्यं कार्यवैलक्षण्यं चोपपद्यते; अभातस्य व्यवहारानुपपत्तेः । नच वास्तवज्ञानसमवायमात्रादसाधारण्या; (ण्यम्) व्यभिचारात्, नहि स्वकीयेन दीपेन स्वस्यैव प्रकाशो न परस्येति नियमः ।।

यत्तु विषयमात्रमेव प्रथते, व्यवहारोऽपि तस्यैव, आत्मव्यवहारस्तु न विषयग्रहणनियत इति, तन्न, यत्र घटमहं जानामीति आत्मव्यवहारः सम्प्रतिपन्नः, तत्रापि नात्मविषयज्ञानादहंव्यवहारस्योपपत्तिः, आत्म विषयज्ञानस्य शशविषाणायमानत्वात् । नचासिद्धेनान्यथोपपत्तिर्वक्तुं शक्यते । अतस्तत्रापि विषयबोधादेवाहं व्यवहार इति वक्तव्यम् । एवं च सति यत्र विषयमात्रव्यवहारः घटोऽयमिति, तत्रापि विषयज्ञानादेव कर्तृतया आत्मा मे ज्ञात इति, यदि परं व्यवजिहीर्षाभावादात्मनि संविदि व्यवहारो न जातः । नच ज्ञातस्य सर्वस्य व्यवहार-

नियमः, निर्विकल्पादौव्यभिचारात् । अतो विषयबोधादेवात्मा च साभासोऽङ्गीकर्त्तव्यः ।।

किञ्च यद्यर्थमात्रस्यैव ज्ञानम्, न ज्ञानज्ञात्रोः, तदैवं प्रतीतिः स्यात् । घटस्तावदयं ज्ञायते, न वेति न विद्मः, मम वा प्रतिभासते परस्य वेत्यपि नविद्म इति । नच तथा दृश्यते ।।

यत्तु चाक्षुषं रूपमित्यादिप्रतीतिव्यवहाराभ्यां चक्षुषोऽपि विषयज्ञानेन प्रतीतिप्रसङ्ग इति, तदयुक्तम्, तथाविधप्रतीतिनियमाभावाच्चक्षुराद्यनुमानज्ञानपूर्वकत्वमेव निश्चीयते । अत्रतु ज्ञानान्तरमेव न संभवति, व्यवहारोऽपि नियत इत्युक्तम् । नच मानसप्रत्यक्षेणात्मविषयज्ञानं भवति, एकस्यैव कर्तृकर्मभावविरोधात् । नच रूपभेदात्कर्तृकर्मभावोपपत्तिः, निरंशत्वात् ग्राहकैकरूपत्वाच्चात्मनः । द्रव्यादिरूपत्वं तु नात्मन एव ।।

ननु क्रियाजन्यफलभागित्वं हि कर्मत्वम्, यथा गमनजन्यफलभागिनो ग्रामस्य, अत्रापि संवेदनक्रियाजन्यफलं भासनं व्यवहारो वा, तदुभयमप्यात्मन्यभ्युपगतमेव, अतो न कर्तृत्त्वम्; नचैकस्य कर्मकर्तृभावः क्वचिदपि दृष्टः । तस्मादात्मविषयमात्मकर्तृकमेव किमपि ज्ञानं–शशविषाणतुल्यमेव ।।

किञ्च घटमहं जानामीति वर्तमानप्रतीतिव्यवहारौ दृश्येते; तत्र भवतां ज्ञानस्य क्षणिकत्वेन स्वानुमानकालेऽतीतत्वात् अज्ञासिषमिति भूतप्रतीतिव्यवहारावेवस्याताम्; न वर्तमानप्रतीतिव्यवहारौ ।।

किञ्चानुमानादप्यात्मनो ग्राहकतया सिद्धिः; घटमहं वेद्मीत्यात्मनो ग्राहकतया भानं सर्वेषां संमतमेव । तदिदं ग्राहकतया भानम्, विषयवित्त्यधीनम्, भानत्वाद्वित्तिवेद्यभानवत्; वित्तेश्च विषयवित्त्यधीनत्वं साधितमेव ।।

अपिचात्मसाधिका संवित्, स्वाश्रयव्यतिरिक्तकर्मिका, सकर्मक-क्रियात्वात्, पाकादिवत्; घटमहं जानामीत्यात्मनो व्यवहारः, घटज्ञान-निबन्धनः, तदनन्तरमुपजायमानत्वात्, घटव्यवहारत्वात्, आत्मविषय-ज्ञानानन्तरमुपजायमानत्वात् । तदनन्तरमुपजायमानत्वमसिद्धमिति चेन्न; आत्माविषयज्ञानस्यैव शशविषाणतुल्यत्वादसिद्धिरन्यथासिद्धिर्वा वक्तुं न शक्यते ॥

किञ्च विवादाध्यासितात्मस्वरूपसिद्धिर्विषयानुभवनिबन्धना, आत्मस्वरूपसिद्धित्वात्; जाग्रत आत्मस्वरूपवत्; यथा सुषुप्तिकाले आत्मस्वरूपसिद्धिर्नास्ति, प्रबोधदशायां विषयानुभवदर्शनादात्म-स्वरूपसिद्धिर्निश्चीयते तद्वदित्यर्थः । अतस्सिद्धम्-

"बुद्धीन्द्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः ।
नानाभूतः प्रतिक्षेत्रमर्थवित्तिषु भासते ॥" इति ॥

इति नन्दीश्वरस्य प्रभाकरविजये
आत्मनिरूपणप्रकरणम् ॥

———

(२०) व्याप्तिसमर्थनप्रकरणम् ॥

इदानीं सकृद्दर्शनगम्या व्याप्तिरिति प्रतिपाद्यते । संयुक्ताविमावग्नि-धूमाविति प्रतिपत्तिरस्तीति निर्विवादम् । अत्रच देशकालाभ्यां संयोगेन च विशिष्टावग्निधूमौ प्रतीयेते; गुणानां द्रव्यपरतन्त्रस्वभावत्वात् । तदुक्तम् – गुणानां च परार्थत्वादिति । तच्च शब्दानामेव पदार्थान्वय-विषयमिति चेन्न; तस्यापि प्रत्यक्षमूलत्वात् । लोके तु येन प्रकारेण पदार्थानां परस्परान्वयः प्रत्यक्षादिभिर्निश्चितः, तथैव शब्दो ब्रवीति, इतरथा वेदवाक्येषु यथाश्रुतार्थपरित्यागेन लक्षणया गौण्या वा वृत्त्या-ऽन्यथावर्णनं क्रियमाणमयुक्तं स्यात् । अतोऽन्वयमात्रविषयो न्यायः, न शाब्दविषयः । संयोगस्य च देशकालयोश्च द्रव्यविशेषणत्वेन प्रतीतौ स्थितायां संयुक्तावग्निधूमौ इदानीमग्निधूमावित्यन्वयो भवति, नेदानीमग्निधूमयोः संयोग इति; इतरथा संयोगस्य देशकालविशेषणत्वं किमिति नाश्रीयते ? ततश्च यावद्द्रव्यभावितया संयोगस्य प्रतीतत्वात् यत्र धूमस्तत्राग्निसंयोग इत्यनौपाधिक एव धूमस्याग्निसंबन्धः सकृद्दर्शन एव सिद्धः । संयोगस्य च देशकालावच्छेदे इदानीमग्निधूमयोः संयोग इत्यन्वयो भवति । ततश्च देशान्तरे कालान्तरे वा संयोगस्यागृहीतत्वाद्भू योदर्शनमपेक्षणीयम् । नच तथाऽन्वय इत्युक्तम् ॥

ननु संयुक्ताविमाविति प्रतिपत्तावेवं स्यात्, अयमनयोः संयोग इति प्रतिपत्तौ विपरीतं स्यात्? नैवम्; अस्तु तावदयमनयोः संयोग इत्यपि प्रतीतिः, तत्र न व्याप्तिग्रहणमस्माभिरुच्यते; देशकालावच्छेदेन संयोगस्य ग्रहणात्, किन्तु संयुक्ताविमाविति हि प्रतिपत्तावेवानौ-पाधिकत्वग्रहणम् । एतदेवाभिप्रेत्योक्तं प्रकरणपञ्चिकायाम्– 'संयुक्ताविमाविति हि प्रतिपत्तिः, न पुनरयमनयोः संयोगः' इति ।

ननु धूमव्यक्तिविशेषेण संयोगस्यान्वयात् व्यक्त्यन्तरस्य च व्याप्त्यनुपगमः, नैवम्, धूमजात्युपलक्षितस्य विशेषस्यान्वयोपगमात् । व्यक्तिभेद उपाधिरिति शङ्कायां व्यक्त्यन्तरेऽपि संयोगदर्शनेनैव शङ्कानिवृत्तिः ।।

ननु धूमजातेरपि व्यक्तिमात्रेणैवान्वयः, नैवम्; यदि सामान्यमन्तरेणापि व्यक्तेर्ग्रहणमस्ति, तदा स्यात्सामान्यस्य गुणभावः, न च सामान्यमन्तरेण कदाचिदपि व्यक्तेः प्रतीतिः । नहि रूपशून्या काचिदपि रूपिबुद्धिरस्तीत्युक्तत्वात् । अतो जातिविशिष्टस्यैव प्राधान्यात्, तेन संयोगस्यान्वयात् सर्वधूमवता सकृदेवाग्निसत्ता गृहीता भवति । तदुक्तम् – तथा च सति धूमसत्तैव देशान्तरे कालान्तरे वा प्रमाणमपेक्षते, न च तस्यां सत्यामग्निसंयोग इति । एवं गृहीतेऽप्यनौपाधिकत्वे यद्युपाधिशङ्का कस्यचित्स्यात्, तदा भूयोदर्शनादेव शङ्कानिरासमात्रं क्रियते, न व्याप्तिग्रहणम् ।।

ननूपाध्यद (र्श) नेऽपि शङ्कोदयादेव दर्शनमपि शङ्कितमेव स्यात्, एवं तर्ह्यतिप्रसङ्गः, घटादिग्रहणेऽपि बाधकशङ्कया घटादिग्रहणस्याप्यनिश्चयप्रसङ्गः ।।

नन्वग्निना संयोगस्य सकृद्दर्शनेऽन्वयात् सकृद्दर्शनेनाग्निना धूमानुमानं प्रसज्यते, मैवम्, सकृद्दर्शनेनैवाग्नेर्धूमसंयोगोऽप्यनौपाधिक इति प्राप्तम्, उत्तरकालं तु आर्द्रेन्धनाद्युपाधिदर्शनादौपाधिकत्वनिश्चयः । न चोपाधिदर्शनादौपाधिकत्वनिश्चये उपाध्यदर्शनेऽपि तत्प्रसङ्गः; अतः सकृद्दर्शनादेव व्याप्तिग्रहः, न च सकृद्दर्शनस्याशक्तौ भूयोदर्शनस्यापि शक्तिः; भूयोदर्शनानामपि प्रत्येकं सकृद्दर्शनत्वात् । न च दर्शनानां भूयस्त्वं ग्राहकम् । रत्नतत्त्वग्रहणे तथा दृष्टमिति चेत्, नैवम्, न तत्रापि भूयोदर्शनस्य ग्राहकत्वम्, किन्तु विवेचकाकारग्रहणे प्रवृत्तस्तस्य

चातिसौक्ष्म्यान्मनस्समवधानाद्यभावाच्च न तत्त्वं ग्रहीतुं प्रभवति, केवलं रत्नमात्रमेव गृह्णाति, एवमनेकदर्शने जाते मनस्समवधानादिसामग्रीसंभवात् अर्थादेकदा तत्त्वं गृह्णाति । अतो न भूयोदर्शनस्य तत्त्वग्रहण उपयोगः । भूयोदर्शनस्य कारणत्वाभ्युपगमे इन्द्रियसंबन्धादिवत्सर्वेषां भूयोदर्शननियमोऽपि स्यात् । न च तथा दृश्यते, एकस्सकृद्दर्शनादेव तत्त्वं गृह्णाति, अपरस्तु शतदर्शनात् । अतो न भूयोदर्शनाद्रत्नतत्त्वग्रहणम् ।।

यत्तूक्तं सकृद्दर्शनस्यासामर्थ्येऽप्येकस्य दर्शनजातीयस्यैव सामर्थ्यं संभवति, तथा एकस्य वृश्चिकदंशस्य मरणहेतुत्वं एकस्य (?) खर्जूरस्य पिण्डवत्त्वमित्यादि, तदप्ययुक्तम्; तत्रापि भ्रान्तिभेदेन देशभेदेन वा सामर्थ्यं कल्पनीयम्, नत्वेकविधस्यैव शक्तिद्वयम् । अतः सकृद्दर्शनगम्या व्याप्तिरिति ।।

इति व्याप्तिसमर्थनं समाप्तम् ।।

---

(२१) भेदाभेदनिरास प्रकरणम् ।।

सम्प्रति भेदाभेदौ निराक्रियेते । केचिज्ज्ञातिव्यक्तिगुणगुण्यवयवावयव्यादीनां भेदाभेदौ वर्णयन्ति । तथाहि – जातिव्यक्त्योर्भेदस्तावत्सर्वजनसिद्धः । अभेदोऽपि तयोः प्रतीयते । खण्डो गौरित्यत्र प्रतीतौ तावत्खण्डतादात्म्येन गोत्वं प्रतीयते; अन्यथा खण्डश्च गौश्चेति प्रतीतिः स्यात्, खण्डस्य गोत्वमिति वा । न कदाचिदपि तथा प्रतिपत्तिः । अतः खण्डतादात्म्येन गोत्वस्य प्रतीतित्वात्खण्ड एव गौरित्यभेदः प्रतीतः । तथाऽत्रैव प्रतीतौ खण्ड एव गौः, न मुण्ड इति व्यवहारात्, खण्डतादात्म्येन प्रतिपन्नस्यैव मुण्डाद्भेदोऽवसीयते । तथा मुण्डो गौरित्यत्र मुण्डतादात्म्येन प्रतिपन्नस्य सामान्यस्य न खण्ड इति व्यावृत्तिदर्शनाद्भेदोऽप्यवसीयते ।।

एतदुक्तं भवति–यस्यां व्यक्तौ तादात्म्येन सामान्यस्य प्रतीतिः, तस्यां व्यक्तौ तया प्रतीत्या तदभेद एव प्रतीतः ।।

अथास्यामेव प्रतीतौ भेदस्य विषयीकर्तुमशक्यत्वम्, किन्तु व्यक्त्यन्तराद्भेदः प्रतीयते, अतो जातिव्यक्त्योः प्रत्यक्षेणैव भेदोऽभेदश्च प्रतीतः । नच भेदाभेदावेकत्र संभवतः, विरुद्धत्वात्, सदसत्त्ववदिति वाच्यम्; विरोधाभावात्, ययोरेकत्र प्रतीतिर्नास्ति, तयोरेव विरुद्धत्वम्, यथा सदसतोः; तदुक्तम्–

'प्रतीयते चेदुभयं विरोधः कोऽयमुच्यते ।' इति । प्रतीतयोरपि विरोधेऽङ्गीक्रियमाण एकस्यैव सामान्यस्य नानाभूतासु व्यक्तिषु युगपत्परिसमाप्य वृत्तिर्नाङ्गीक्रियेत । यदि प्रतीतिबलादङ्गीक्रियते, तर्हि भेदाभेदयोरपि समानमिति तुल्यचर्चः ।।

किञ्च प्रथमव्यक्तिदर्शने तावदेव प्रतीयते, तदानीमनुवृत्ताकारस्य न प्रतीतिरेवाङ्गीकृता सर्ववादिभिः । किंचाभेदप्रतीतिर्नास्तीति यो

वदति, तस्य सर्वलोकविरोधः । सर्वेषामेव विस्फारिताक्षाणां पुरतः स्थितेषु वस्तुषु प्रथममेकाकारेणैव प्रतीतिः । अतः सर्वेषु वस्तुषु सर्वेषां प्रथममभेदप्रतीतिरेव समुत्पद्यते, पश्चाद्भेदप्रतीतिः । अतोऽबाधितविषयप्रतीतिसिद्धौ भेदाभेदौ नापह्नवमर्हतः ।।

किञ्चायं गौरिति सामानाधिकरण्येन प्रतीतिरस्तीति निर्विवादम्। तत्रात्यन्तभिन्नयोर्गवाश्वयोः यथा सामानाधिकरण्यं न दृश्यते, तथाऽत्यन्ताभिन्नजात्यादिस्वरूपप्रतिपत्तौ न च दृश्यते । अतोऽत्यन्तभिन्नादत्यन्ताभिन्नाच्च व्यावृत्तं सामानाधिकरण्यं भेदाभेदौ कल्पयति । न च वाच्यमत्यन्तभिन्नयोरपि प्रकारप्रकारितया प्रतीतत्वेन सामानाधिकरण्योपपत्तिरिति, प्रकारप्रकारित्वस्यैवात्यन्तभिन्नयोरत्यन्ताभिन्नयोश्चादर्शनात्तदपि भेदाभेदमेव कल्पयति । नह्यत्यन्तभिन्नयोर्दण्डपुरुषयोः प्रकारप्रकारित्वं सामानाधिकरण्यं वा दृश्यते । न च समवायनिबन्धनं सामानाधिकरण्यम्; समवायसंबन्धस्यैव प्रमाणाभावेनानभ्युपगमात्। अतो येन पिण्डेनाभिन्नं सामान्यं प्रतीयते, तदपेक्षया भिन्नमेव पिण्डान्तरापेक्षयाऽभिन्नम् । यथा एक एव देवदत्तः पुरुषान्तरापेक्षया दीर्घः प्रतीयते, स एवान्यापेक्षया ह्रस्वो भवति; तथा भेदाभेदावप्येकप्रतीतिबलसिद्धत्वान्नापह्नवमर्हतः । तदुक्तम्–

सर्ववस्तुषु बुद्धिर्या व्यावृत्त्यनुगमात्मिका ।
जायते द्व्यात्मकत्वेन विना सा च न सिद्ध्यति ।। इति ।।

अत्रोच्यते – ययोर्जातिव्यक्त्योर्भेदः प्रतीतः, तयोरेवाभेदः प्रतीयत इति दुर्घटं वचः । तथाहि – अनुवृत्ताकारस्वभावा जातिः प्रतीता, व्यवृत्ताकारस्वभावा च व्यक्तिः । अत आकारद्वयव्यतिरेकेण तयोरभेदकं नामाकारान्तरं न पश्यामः । आकारान्तरभासेऽपि सोऽपि तृतीय एवाकारः स्यात्, नतु जातिजातिमतोरभेदावभासः सः, यथायमनयोः संयोग इति प्रतीतौ संयोगिद्वयाकारव्यतिरेकेण संयोगाकारस्तृतीयः।।

ननु यथा संयोगिनोराकारः संयोगाकारः, एवं जातिव्यक्त्योरभेद इति प्रतीतावभेदाकारे जात्याद्याकारो न स्यात् । अथोच्येत न वयं जातिव्यक्त्योरभेद इत्यभेदप्रत्तिपत्तिमभ्युपगच्छामः, किन्तु भिन्नाकारेण प्रतिपत्तिमेव, नहि जातिव्यक्ती एकाकारेण कदाचित्प्रतीयेते । अतो न तृतीयाकारप्रसङ्ग इति, तन्न; भिन्नाकारेण प्रतीतयोः कदाचिदेकाकार-प्रतीतिरसिद्धैव, तथाप्युच्यते, स चायमेकाकारेण यदि तयोः संबन्धित्वेन प्रतीतः, तदा संयोगवत्तृतीयाकारः स्यादिति दू... (?) प्रतीतिर्नास्ति केवलमेकाकारप्रतीतिरेव, तर्हि जातिव्यक्त्योः का वार्ता? वस्त्वन्तर प्रतीतिरेव भवतु को दोषः?

अथ निरूप्यमाणवस्त्वन्तरस्यादर्शनात्तयोरेव आकार इत्यङ्गीक्रियेत, तर्हि भिन्नाकारेण प्रतिपन्नयोरेकाकारप्रतीतिर्भ्रान्तिरेव स्यात्; अन्यथाव-स्थितस्यान्यथाप्रतिभानात् ।।

अथ प्रतीतत्वादेकाकारस्य तयोरेकत्वमप्यस्तीति मन्यसे, तर्हि नानाभूतानामपि वृक्षाणामेकं वनमित्येकत्वमभ्रान्तमेव स्यात् । अथासीदतां नानावृक्षानुसन्धानात् एकं वनमित्यननुसन्धानाच्चैकत्वं बाधितम्, अतो वनप्रत्ययो भ्रान्त इति चेन्न; तर्ह्यत्रापि भेदप्रतीतिकाले-ऽभेदस्याननुसन्धानादभेदस्य भ्रान्तत्वं स्यात्, तत्रापि वनप्रत्ययकाले नानात्वानुसन्धानं नास्ति, नानात्वानुसन्धानकाले एकत्वानुसन्धानम्।।

अथ भेदो नास्तीति बाधकज्ञानं न दृश्यते, अतो न भ्रान्तत्वमिति, तर्ह्यत्रापि नेदमेकं वनमिति बाधकज्ञानं नास्ति, नानात्वानुसन्धाना-दर्थादेकत्वस्य बाध इति । अथ दूरत्वादपि दोषसंभावनया वनप्रत्ययस्य भ्रान्तत्वमिति, तर्ह्यत्राप्यतिनिरन्तरतया भेदभ्रम इति सर्वं समानमन्यत्रा भिनिवेशात् ।।

किञ्चास्तु तावदेकाकारप्रतिभासः; अस्तु च तस्याभ्रान्तत्वम्; तथाप्याकारप्रतिभासो जातिः; जातिभागस्य पिण्डभागस्य वा द्वितीयावभास एव स्यात्, नतु जातिजातिमतोरभेदावभासः । अथोच्येत न विलक्षणाकारेण वस्तुद्वयप्रतीतिरेव भेदप्रतीतिः*

इति नन्दीश्वरस्य प्रभाकरविजयः

समाप्तः ।।

---

*मातृकायामेतावदेवोपलभ्यते । तथापि विज्ञायतेऽधिकमपि प्रभाकरविजयो वर्तत इति । यतोऽपरिपूर्णमेवेदं प्रकरणं दृश्यते ।

Central Sanskrit University
CENTRAL LIBRARY
Rajiv Gandhi Campus